23 K7 missing (cf. v. l. 6). D4 om. up to सवर्ण (cf. v. l. 19). — a) T2 पृथिवीं क्षपयंस्तेते. — b) Ś1 K1. 2 गुणा (for गुणो). Ś1 K1. 2. 4 D6 इव (for इति). Ś1 K1. 2. 4 स्मृताः; K6 V1 Bo. 8 Dn1. n4 D5 D2. 3. 8 M5 श्रुतिः; B6. 7. 9 Das. a4 श्रुतः; D5 स्थितः; D9 स्थितिः (for स्मृतः). — c) K1 -भूताश्च; K6 D5 G1 M1 -भूतं (for -भूतश्च). — d) K6 Bo. 6. 7. 9 Das. a4 Dn1. n4 D5 D2. 3. 5. 6. 8 M5 प्रकाशते; D7 T G1. 3. 6 M1. 6. 7 न दृश्यते (for प्रणश्यति).

वर्णतो गृह्यते चापि कामात्पिबति चाशयान् ।
न चास्य तेजसा रूपं दृश्यते शाम्यते तथा ॥ २४
अहंकारस्य विजितैः पञ्चैते स्युर्वशानुगाः ।
षण्णामात्मनि बुद्धौ च जितायां प्रभवत्यथ ॥ २५
निर्दोषा प्रतिभा ह्येनं कृत्स्ना समभिवर्तते ।
तथैव व्यक्तमात्मानमव्यक्तं प्रतिपद्यते ॥ २६
यतो निःसरते लोको भवति व्यक्तसंज्ञकः ।
तत्राव्यक्तमयीं व्याख्यां शृणु त्वं विस्तरेण मे ।
तथा व्यक्तमयीं चैव संख्यां पूर्वं निबोध मे ॥ २७
पञ्चविंशतितत्त्वानि तुल्यान्युभयतः समम् ।
योगे सांख्येऽपि च तथा विशेषांस्तत्र मे शृणु ॥ २८
प्रोक्तं तद्व्यक्तमित्येव जायते वर्धते च यत् ।
जीर्यते म्रियते चैव चतुर्भिर्लक्षणैर्युतम् ॥ २९
विपरीतमतो यत्तु तदव्यक्तमुदाहृतम् ।
द्वावात्मानौ च वेदेषु सिद्धान्तेष्वप्युदाहृतौ ॥ ३०
चतुर्लक्षणजं त्वन्यं चतुर्वर्गं प्रचक्षते ।

C. 12. 8677
B. 12. 237(8). 32
K. 12. 242. 33

---

24 K7 missing (cf. v. l. 6). D7 T G1. 3. 6 M5 read 24 after 22^{ab}. — a) K6 Ds1 वर्णता (for °तो). Bo. 6–8 Dn1. n4 Ds2 D2. 3. 8 गुह्यते (for गृ°). V1 Bo. 6. 9 Da3. a4 नापि; B8 D5 वापि; D6 सोपि; D7 T G1. 3. 6 M7 चाप्सु; M1. 5. 6 नाप्सु (for चापि). — b) Ś1 K1. 2 B3 (marg. as in text) Ds D4. 6. 9 कामान्; D7 T G1. 3. 6 M1. 5–7 नापः (for कामात्). Ś1 K1. 2 D7 T G1. 3. 6 M5 Cs (gloss: पिपासया) चाशया; V1 B6. 7. 8 (marg.). 9 Da3. a4 D5 वापयः; Bo. 8 चाश्रयात्; Dn1. n4 D2–4. 8. 9 Ca (gloss: समुद्रादीन्) चाश्रयान्; Ds M1. 6. 7 वा(M6. 7 चा)शयात् (for चाशयान्). — c) D4. 9 वास्य (for चास्य). Da3. a4 तेजसो; Dn1 Ds. 8 °सां (for °सा). Ś1 K1. 2. 4 न चास्य तेजो रूपं च. — d) V1 Bo. 6–9 Da3. a4 D4–7. 9 T G1. 3. 6 M1. 5–7 दह्यते (for दृश्यते). Ś1 K1 चाप्यते; K2 चास्यते (for शाम्यते). V1 च वा; D6 [ऽ]पि वा; M5 [ऽ]थ वा (for तथा).

25 K7 missing (cf. v. l. 6). — a) K4. 6 B6. 8 Dn1. n4 Ds D2. 3. 5. 8 अहंकारेस्य; D4. 6. 9 °रे तु (for °रस्य). K2. 4. 6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 विजिते; V1 D7 T G1. 3. 6 M1. 5–7 विजये (for विजितैः). — b) B6. 9 Da3. a4 [ऽ]स्य (for स्युर्). — c) T1 बुद्ध्या. D4–7. 9 T G1. 3. 6 M1. 5–7 तु (for च). — d) Da3 जिताया; D4. 9 जितानां (for °यां). B8 प्रभवंति. K2 अपि; Da4 अपः; D4. 7. 9 T G1. 3. 6 M1. 5–7 उत (for अथ).

26 K7 missing (cf. v. l. 6). — a) K4. 6 Bo. 8 Dn1. n4 Ds D3. 8. 8 निर्दोष-; D5 °षात्; M1. 6 °षः (for °षा). K6 -प्रतिमा; M1. 6 प्रातिभा (for प्र°). D5 T2 ह्येनां; M1. 5–7 ह्येषा (for ह्येनं). — b) ❀ Cs: कृत्स्ना सर्वव्यापिनी । ❀

27 K7 missing (cf. v. l. 6). — a) K4. 6 Da4 Ds2 Ds निःसरतो; Dn1. n4 विसरते (Dn4 °तो); D5 G3. 6 निःसा(D5 °स)रितो (for निःसरते). D7 T1 G1 सतो निःसारितो लोके (G1 °को). — b) M1 ह्युक्त- (for व्यक्त-). Ś1 K1. 2. 4 -संज्ञितः (K2 °ताः); D4. 6. 9 (before corr.) T2 -संज्ञिकः (for -संज्ञकः). — After 27^{ab}, M1. 5–7 read 32^{cd} for the first time, repeating it in its proper place. — c) D5 अत्र (for तत्र). K6 B8 Ds1 व्यक्तिमयीं; V1 Bo. 6. 7. 9 Da3 Dn4 Ds2 D5. 6 G3. 6 M1. 5–7 व्यक्तमयीं; D2. 8 [अ]-व्यक्तिमयीं (for °क्तमयीं). K6 दिव्यां; Bo. 7. 8 Dn1. n4 Ds D2. 3. 8 विद्यां; B8 (marg.) Da3. a4 संख्यां (for व्याख्यां). — d) G1 तं (for त्वं). K4 ते; V1 B6–9 Da3. a4 D4. 6. 7. 9 T G1. 3. 6 M5. 7 वै (for मे). — e) Dn1 यथा; D5. 6 अथ (for तथा). K4 Bo. 6. 9 Dn4 D2. 3. 8 व्यक्तमयं (for °मयीं). — f) K6 V1 Bo. 6–9 Ds1 D6. 7. 9 T G1. 3. 6 M1. 5–7 संख्या-; Dn1. n4 Ds2 D2. 3. 5. 8 सांख्ये (for संख्यां). Ds1 ते; D5 वै (for मे).

28 K7 missing (cf. v. l. 6). — a) Ds -तत्त्वेन (for -तत्त्वानि). — c) G3 योग- (for योगे). G1 तदा (for तथा). — d) K4. 6 Bo. 9 Da4 Dn1. n4 Ds D2. 3. 8 M1. 6. 7 विशेषं (for °षांस्). B7 विशेषं शृणु तत्र मे.

29 K7 missing (cf. v. l. 6). — a) D4–6. 9 यद् (for तद्). Ś1 K1 इतीव; Da4 Dn4 इत्येवं (for °व). — b) D6 ज्ञायते (for जा°). D6 [ऽ]पि (for च). D4–6. 9 तद् (for यत्). — c) Ś1 K1. 2. 4 हीयते; K6 Ds D8 (by corr.) जायते; Dn4 जीयते (for जीर्यते). K1 प्रियते; Dn4 द्वीयिते (sic) (for म्रियते). D4 ह्येव (for चैव). — d) Da4 G1 युगं (for युतम्).

30 K7 missing (cf. v. l. 6). — a) D6. 7 G1 यस्तु; G3. 6 वस्तु (for यत्तु). — c) K2 देवेषु (for

C. 12. 8677
B. 12. 237(6). 32
K. 12. 242. 33

व्यक्तमव्यक्तजं चैव तथा बुद्धमथेतरत् ।
सत्त्वं क्षेत्रज्ञ इत्येतद्द्वयमप्यनुदर्शितम् ॥ ३१
द्वावात्मानौ च वेदेषु विषयेषु च रज्यतः ।
विषयात्प्रतिसंहारः सांख्यानां सिद्धिलक्षणम् ॥ ३२
निर्ममश्चानहंकारो निर्द्वंद्वश्छिन्नसंशयः ।
नैव क्रुध्यति न द्वेष्टि नानृता भाषते गिरः ॥ ३३
आक्रुष्टस्ताडितश्चैव मैत्रेण ध्याति नाशुभम् ।
वाग्दण्डकर्ममनसां त्रयाणां च निवर्तकः ॥ ३४
समः सर्वेषु भूतेषु ब्रह्माणमभिवर्तते ।
नैवेच्छति न चानिच्छो यात्रामात्रव्यवस्थितः ॥ ३५
अलोलुपोऽव्यथो दान्तो न कृती न निराकृतिः ।
नास्येन्द्रियमनेकाग्रं नातिक्षिप्तमनोरथः ।
अहिंस्रः सर्वभूतानामीदृक्सांख्यो विमुच्यते ॥ ३६
अथ योगाद्विमुच्यन्ते कारणैर्यैर्निबोध मे ।

वेदेषु). —^{d}) Dn4 उदाहृतं. B9 सिद्धांते चाप्युदाहृतौ.

31 K7 missing (cf. v. l. 6). —^{a}) Ś1 K1. 2 त्वन्यद्; K6 V1 Bo. 5. 7. 9 Da3 Dn1. n4 D3 D2. 3. 6. 8 त्वार्थं; B3 त्वन्ये; Da4 ह्यार्थं; D7 T G3. 6 M1. 5–7 त्वन्यच् (for त्वन्यं). D5 चतुर्लक्षणसंख्यायां. —^{b}) Ś1 K1. 2. 4 चतुर्वेगं; D7 °लक्षं (for °र्वर्गं). Ds1 प्रचक्ष्यते; D5 प्रशस्यते (for प्रचक्षते). —^{c}) M1. 6 च व्यक्तजं; M7 चाव्य° (for अव्य°). Da3. a4 चान्ये (for चैव). —^{d}) T2 तदा (for तथा). D7 T G1. 3. 6 M1. 5–7 बुद्धिर् (for बुद्धम्). K1. 4 D4. 6. 9 अथेतरं; K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 D3 D2. 3. 5. 8 अचेतनं (for अथेतरत्). —^{e}) D5 सत्त्व- (for सत्त्वं). B8 D5 एव (for एतद्). —^{f}) Ś1 K1. 2 B3 D4–6. 9 अप्यत्र; V1 अन्यत्र (for अप्यनु-). B6 -दर्शनं (for -दर्शितम्). D7 T G1. 3. 6 M1. 5–7 द्वयमव्यक्तदर्शनं (M6 °र्शितं).

32 ^{a}) D6 अध्यात्मानौ (hypermetric) (for आत्मानौ). T2 देवेषु (for वेदेषु). —^{b}) K6 Da3 Dn1. n4 D3 D2. 3. 8 [अ]नु-; B6 (marg. as in text). 7. 9 तु (for च). D5 विषयेषु दुरत्ययः. — M1. 5–7 read 32^{cd} for the first time after 27^{ab}. —^{c}) K6 विधयात्; K7 विषयः; Da3. a4 D4–6. 9 M1. 5. 6 (last three first time). 7 (both times) विषय-; D7 T G1. 3. 6 M6 (second time) विषयान् (for °यात्). —^{d}) K4 संख्यानां; D5 पंचानां; D6 संख्यानं (for सांख्यानां). Ś1 K1. 2. 4 V1 Bo. 6–9 Dn1. n4 D2. 3. 8 विद्धि (for सिद्धि-). T2 -लक्षणः; M7 (first time) -कारणं (for -लक्षणम्).

33 ^{b}) D6 निर्द्वंद्वं (for निर्द्वंद्वश्). —^{d}) K7 D4. 6. 9 नानृतां; M1. 5–7 °तं (for °ता). K7 गिरां; D4. 6. 9 गिरं; M1. 5–7 गिरा (for गिरः).

34 ^{a}) K1 आक्रष्टस्; Ds1 T2 आक्रु°; D5 अक्रुध्यं; D7 G1 अक्रुष्टस् (for आ°). K7 -स्ताडितश् (sic); V1 तानितश्; D7 M1 ताधि(D7 °सि)तश् (for ताडितश्). D7 T G1. 3. 6 M1. 5–7 चापि (for चैव). —^{b}) Da3. a4 मित्रेण (for मै°). D4 om. from ध्याति up to ब्रह्माण (in 35^b). Ś1 K1. 2. 4 ध्येति; K6 [ध्या]ध्याति (for ध्याति). K7 नाशुवं (for नाशुभम्). D6. 7 T G1. 3. 6 M1. 5–7 मैत्रीं (D6 °त्रो; G6 °त्रं) ध्यायति नाशुभं. —^{c}) K6 Ds1 वाग्दंडः (for वाग्दण्ड-). K6 -मनसा (for °सां). D7 T G1. 3. 6 M6 वाङ्मनःकायदंडानां. —^{d}) M1. 6. 7 त्रि- (for नि-).

35 D4 om. up to ब्रह्माण (cf. v. l. 34). —^{a}) K4 सम-; Ds1 समाः (for समः). —^{b}) K2. 6 Ds1 ब्राह्मणम् (for ब्रह्मा°). K6. 7 Bo. 7–9 Da3 D3 D4. 6. 7. 9 T G1. 6 M6. 7 अति-; Da4 इति; G3 lacuna (for अभि-). G3 lacuna for वर्तते. —^{c}) K1 इच्छंति. K6 वाविष्टो; D5 वानिच्छो; D6 चानिच्छे; G3. 6 °च्छा (for °च्छो).

36 ^{b}) K1 न ह्रती (sic); K6 न कृतिर्; Da4 न कृतिर्; D3 D5. 7 T G1. 3. 6 M1. 5–7 नाकृतिर् (for न कृती). B1. 9 निराकृतः (for °कृतिः). —^{c}) D3 T2 अनैकाग्रं; D7 T1 G1 अनेकाग्र्यं (for °काग्रं). K7 D4–6. 9 नास्येंद्रियमनोव्यग्रं. —^{d}) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 D3 D2. 3. 8 M1. 6 नाविक्षिप्त- (M1. 6 °प्तो); D5 न विक्षिप्त-; D7 T G1 नातिक्षिप्तो; M7 नावक्षिप्त- (for नाति°). Da3. a4 -मनोरथाः. G3. 6 नाक्षिप्तो नासमनोरथः. — After 36^{cd}, K7 Ds2 D4–6. 9 Kumbh. ed. ins.:

679* सर्वभूतहितो मैत्रः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ।
अस्पृहः सर्वकामेभ्यो ब्रह्मचर्ये दृढश्च यः ।

[Lines 1–2 = (var.) 6. 36. 24. —(L. 1) D5 -समो; Kumbh. ed. -सदृङ् (for -हितो). —(L. 2) K7 तुल्या- (for तुल्य-). —(L. 3) K7 Ds2 D5 Kumbh. ed. ब्रह्मचर्य- (for °चर्ये). D5 Kumbh. ed. -दृढव्रतः (for दृढश्च यः).]

—^{e}) K4 Da3 अहिंसः; Da4 °सा; D7 °सुः (for °स्रः). —^{f}) Ś1 K1. 2 एष (for ईदृक्). Da3. a4 संख्या; Dn4 संख्यो; D3 सांख्ये D7 G1 सां(G1 सं)ख्याद्

योगैश्वर्यमतिक्रान्तो योऽतिक्रामति मुच्यते ॥ ३७
इत्येषा भावजा बुद्धिः कथिता ते न संशयः ।
एवं भवति निर्द्वंद्वो ब्रह्माणं चाधिगच्छति ॥ ३८

इति श्रीमहाभारते शान्तिपर्वणि अष्टाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२८ ॥

२२९

व्यास उवाच ।
अथ ज्ञानप्लवं धीरो गृहीत्वा शान्तिमास्थितः ।
उन्मज्जंश्च निमज्जंश्च ज्ञानमेवाभिसंश्रयेत् ॥ १
शुक उवाच ।
किं तज्ज्ञानमथो विद्या यया निस्तरति द्वयम् ।
प्रवृत्तिलक्षणो धर्मो निवृत्तिरिति चैव हि ॥ २
व्यास उवाच ।
यस्तु पश्येत्स्वभावेन विना भावमचेतनः ।
पुष्यते च पुनः सर्वान्प्रज्ञया मुक्तहेतुकः ॥ ३
येषां चैकान्तभावेन स्वभावः कारणं मतम् ।

C 12. 8691
B. 12. 231(7). 4
K. 12. 243. 4

(for सांख्यो). K7 यमुच्यते (for विमु°).

37 T1 om. (hapl.) 37. — a) K6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 यथा (for अथ). Ds2 योगैर् (for योगाद्). K7 D4. 9 विमुच्येत (for °च्यन्ते). — b) D7 G1 करणैर् (for का°). K1 Da4 निबोधसे (Da4 °नात्) (for °ध मे). K6 Bo. 6–9 Da3 Dn1. n4 Ds D2. 3. 8 तत् (for मे). — d) Dn1. n4 Ds D2. 3. 5. 8 निष्क्रामति (for ऽतिक्रा°). Dn1. n4 स मुच्यते (for मुच्यते).

38 a) K7 Ds D4. 7. 9 T G3. 6 M6. 7 Cs (gloss: सांख्ययोगजा) [ऽ]भयजा; Da4 भावना; G1 M1. 5 भयजा (for भावजा). Ś1 K1. 2. 4 शुद्धिः; K7 D4. 5. 9 सिद्धिः (for बुद्धिः). D6 इत्येषामात्मजा सिद्धिः. — b) M1. 6 कथितां. — D5 reads 38^{cd} twice. — c) D5 (second time) कर्मणा मनसा युक्तो. — d) K7 D4. 9 ब्राह्मणं (for ब्रह्माणं). B6 (marg.). 8 (marg. as in text) D5 (second time) T2 M1. 6. 7 ब्रह्माणं चातिवर्तते; D7 T1 G1. 3. 6 ब्रह्म(G1 ब्रह्मा°; G3. 6 ब्राह्म)णश्चातिवर्तते.

Colophon: G2 missing; K3. 5 B1–5 Da1. a2 Dn2. n3 D1 G1, 5 M2–4 absent. — *Sub-parvan*: Ś1 K1. 2. 4, 6. 7. Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–4. 8. 9 T G1. 3. 6 M1. 5–7 मोक्षधर्म. — *Adhy. name*: Ś1 K1. 2. 4 शुकप्रश्नः; K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 M5 शुकानुप्रश्नः; K7 D4. 6. 9 शुकानुप्रश्ने योगोपदेशः; M1. 6. 7 मोक्षोपायविधिः. — *Adhy. no.* (figures, words or both): K7 5; Dn1 Ds1 D7 T1 G1. 3. 6 M5 63; Dn4 Ds2 62; D3 M1. 6. 7 61; D8 58. — *Śloka no.*: Dn1 39; Dn4 40.

229

☞ This adhy. is missing in G2 (cf. v. l. 12. 222. 19).

1 D5 om. the ref. — a) G1 धीमान् (for धीरो). D5 अथ ज्ञानलवं कर्तुं. — b) K6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 आत्मनः (for आस्थितः). D5 गृही शांतिमवस्थितः. — d) D7 T G1. 3. 6 M5 विद्याम् (for ज्ञानम्).

2 Da4 व्यास (for शुक). — a) K7 D4. 6. 9 नु (for तज्). M5 अहो; Cap अथो (as in text). Ś1 K1. 2 V1 Ca (Cap as in text) विद्याद्; Da4 विप्र; Dn1. n4 Ds1 D2. 3. 8 Cs विद्यां (for विद्या). ❀ Ca: ज्ञानं ज्ञानकारणं, ज्ञायतेऽनेनेति व्युत्पत्त्या । ❀ — b) Ś1 K1. 2 V1 येन; K4 तेन; Bo Dn1. n4 Ds1 D2. 8 G1. 6 यथा (for यया). K2. 4 विस्तरति; K6 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 M1. 6. 7 निस्तरते (for °रति). — c) Ds1 प्रकृति° (for प्रवृत्ति°). — d) K1 निर्वृत्तिर्; G1 निवृत्तिम् (for °त्तिर्). G3 इह; M7 अथ (for इति). K6 V1 Bo. 6–9 Da3 Dn1. n4 Ds D2. 3. 8 वा वद; K7 D4. 6. 9 चोच्यते; Da4 वाहवः (sic); M1. 5–7 चैव ह (for चैव हि). — After 2, G1 reads 10.

3 After the ref., D7 T G3. 6 read 10. — a)

C. 12. 8691
B. 12. 238(7). 4
K. 12. 243. 4

पूत्वा तृणबुसीकां वै ते लभन्ते न किंचन ॥ ४
ये चैनं पक्षमाश्रित्य वर्तयन्त्यल्पचेतसः ।
स्वभावं कारणं ज्ञात्वा न श्रेयः प्राप्नुवन्ति ते ॥ ५
स्वभावो हि विनाशाय मोहकर्ममनोभवः ।
निरुक्तमेतयोरेतत्स्वभावपरभावयोः ॥ ६
कृष्यादीनि हि कर्माणि सस्यसंहरणानि च ।
प्रज्ञावद्भिः प्रक्लृप्तानि यानासनगृहाणि च ॥ ७
आक्रीडानां गृहाणां च गदानामगदस्य च ।
प्रज्ञावन्तः प्रवक्तारो ज्ञानवद्भिरनुष्ठिताः ॥ ८
प्रज्ञा संयोजयत्यर्थैः प्रज्ञा श्रेयोऽधिगच्छति ।
राजानो भुञ्जते राज्यं प्रज्ञया तुल्यलक्षणाः ॥ ९
पारावर्यं तु भूतानां ज्ञानेनैवोपलभ्यते ।

Bo. 8 (marg.) Dn1. n4 D8 D2. 8. 8 पश्यन् (for पश्येत्). D5 यः पश्येत्स्वस्वभावेन. — b) K7 B6 (marg. as in text) D4–6. 9 T2 G3 अचेतनं (for °नः). B8 (marg. as in text) स विना भावचेतनः; Da4 corrupt. — c) Ś1 K1. 2 B6 पश्यते; K7 V1 D4. 5. 9 T2 G3. 6 M1. 5–7 पुष्णाति; Da4 उच्यते; D6. 7 T1 G1 मुष्णाति (for पुष्यते). K7 न; D7 T G1. 3. 6 M1. 5. 6 स (for च). K7 D4–6. 9 M1. 6 भावं (for सर्वान्). — d) K1 प्रज्ञाया. K6 Bo. 7. 8 D8 युक्त-; K7 B6 (orig.) D4. 9 मुक्ति-; B6 (marg.) युक्ति-; Ca त्यक्त- (for मुक्त-). K6 Bo. 6. 7. 8 (marg.). 9 Da3 Dn1. n4 D2. 3. 8 -हेतुकान्; B8 T2 M7 -हे(M7 -है)तुकं; Da4 -हेतुमान् (for -हेतुकः).

4 a) D7 T G1. 3. 6 M1 एषां (for येषां). D4 वा (for च). — b) Bo. 7. 8 (marg.). 9 Dn1. n4 D8 D2. 3. 8 स्वभावात्; M7 °वं (for °वः). K6 मनः; V1 B6. 9 Da3. a4 मतः; D7 T G1. 3. 6 महत् (for मतम्). — c) K2. 4 पूत्वा (K4 °र्वा) तृणवसीकां वै; K6. 7 (marg.) Bo. 8 (marg.). 9 Dn4 D8 श्रु(Bo पू)त्वा तृ(B8. 9 Dn4 D8 तृ)णाम्रुषीणां वा; K7 दूर्वातृणांबुसीकान्वै; V1 B7 Da3. a4 Dn1 D2. 5. 8 Ca पूत्वा तृणमिषीकां वा (B7 °काया); B6. 8 ढुष्ट्वा (B8 [marg.] पूत्वा) तृणमिषीकां वा (B8 °काणां); D8 दूर्वातृणवृषीका वा; D6 श्रुत्वा तृणमृषीणां वै; D7 T G1. 3. 6 Cv दूर्वातृणव्र-(T2 °वृ)सीका वै; M1. 5–7 भूत्वा तृणबुसीका वै. ❀ Cv (reading दूर्वातृणवृसीका ये): परवञ्चनार्थं दूर्वातृणादिकृतं बृसीकमासनं येषां ते । ❀ — d) K4 च किंचन; D7 T1 G1 कथंचन.

5 a) B6 (marg.). 8 (marg. as in text) चैवं (for चैनं). — b) K4 B7. 8 (marg.) Dn1. n4 D8 D2. 3. 8 निवर्तंति; B8 D7 T1 G1. 3. 6 वर्तयंते; Da4 corrupt; D5 वर्णयंति (for वर्त°). Dn1. n4 D2. 3. 8 G1 -मेधसः (for -चेतसः). — c) K7 D4. 9 स्वभावे (for °वं). — d) T1 नि- (for न). K7 D4. 9 च (for ते).

6 b) D8 मोहकर्म (for °कर्म-). K7 D4. 6. 9 -समुद्भवः; D7 T G1. 3. 6 -मनोभवं (for °भवः). ❀ Ca: मोहकर्ममनोभवः, मोहेनाज्ञानेन, कर्मणा पुण्यपापलक्षणेन मनसा चाहंकारादिमता जन्यते इति । ❀ — c) Ś1 K1. 2 Da3. a4 G3. 6 एव; D7 T G1 M5 एवं (for एतत्). — d) Dn1. n4 Ds1 D2. 3. 8 M5 -परि-; M7 -वर- (for -पर-).

7 a) K2 कृष्टादीनि (for कृष्या°). K6 Bo. 6–8 Da3 Dn1. n4 D8 D2. 3. 5. 7. 8 T1 G1. 3. 6 M1. 6 [इ]ह; B9 Da4 ह (for हि). Dn4 कर्म च (for कर्माणि). — b) K6 यस्य; V1 शस्य- (for सस्य-). K4 -संहारणानि; D7 T1 G1. 3. 6 M1. 6 -संग्रह(G1 °र)णानि; T2 M7 -संधार° (for -संहर°). — c) Ds1 प्राज्ञावद्भिः; G1 प्रजा° (for प्रज्ञा°). K6 Dn4 D4 प्रकृप्तानि; B8 प्रकृष्टानि; B8 (marg.) प्रकुप्तानि; Da4 प्रक्लृप्ताभिर् (for प्रक्लृप्तानि). — d) B9 पानापन- (for यानासन-). Ś1 K1. 4 D6 -गृहानि; Da4 -ग्रहाणि (for -गृ°).

8 a) K1 अक्रीडानां; K7 आक्रीडाणां; Da4 आक्रीडतां (for °डानां). Ś1 K1. 2 D5 गृहानां; Da4 ग्रहाणां (for गृ°). — b) K6 पदानाम् (for ग°). D7 T1 G1. 3. 6 गतानामागतस्य च. — c) Da4 प्रज्ञावंतं (for °वन्तः). K4. 6. 7 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2–6. 8. 9 प्रयोक्तारो (for प्रव°). — d) D3 ज्ञानविद्भिर् (for °वद्भिर्). G3. 6 M7 अनुष्ठितं (M7 °तां).

9 a) D6 प्राज्ञा; D6 प्रज्ञाः. Ś1 K1. 2. 4 संचोदयति; Da3 संयोजयंति; D5 संयोगयति; M7 संयाज° (for संयोज°). Dn4 D4 अर्थः; D6 अर्थं (for अर्थैः). Da4 प्रज्ञानं योजयंत्यर्थैः. — b) K7 प्रजा; M7 प्राज्ञः (for प्रज्ञा). — c) K2 भुंज्यते; M1 भुंजितो. — d) Da3 -लक्षणः; D7 T1 G1 -लक्षणं.

10 D7 T G3. 6 read 10 after the ref. of stanza 3; G1 after st. 2. — a) K1. 2. 4. 7 V1 Bo. 8 D4. 9 परावर्यं; B6. 7. 9 Da3 Dn1. n4 D8 D2. 3. 8 प(Da3 पा)रावरं; Ca. v पारावर्यं (as in text). K2 च (for तु). — b) K7 D4. 6. 9 -मन्यते (for -लभ्यते). K2 प्रज्ञानेनैव लभ्यते. — c) B6 (marg.) चातु- (for तात). K7 सृष्टानां; B8 (marg. as in text) सृष्टानि; D7 G1. 3. 6

विद्यया तात सृष्टानां विद्यैव परमा गतिः ॥ १०
भूतानां जन्म सर्वेषां विविधानां चतुर्विधम् ।
जराय्वण्डमथोद्भेदं स्वेदं चाप्युपलक्षयेत् ॥ ११
स्थावरेभ्यो विशिष्टानि जङ्गमान्युपलक्षयेत् ।
उपपन्नं हि यच्चेष्टा विशिष्येत *विशेष्ययोः ॥ १२
आहुर्द्विबहुपादानि जङ्गमानि द्वयानि च ।
बहुपाद्भ्यो विशिष्टानि द्विपादानि बहून्यपि ॥ १३
द्विपदानि द्वयान्याहुः पार्थिवानीतराणि च ।
पार्थिवानि विशिष्टानि तानि ह्यन्नानि भुञ्जते ॥ १४
पार्थिवानि द्वयान्याहुर्मध्यमान्युत्तमानि च ।
मध्यमानि विशिष्टानि जातिधर्मोपधारणात् ॥ १५
मध्यमानि द्वयान्याहुर्धर्मज्ञानीतराणि च ।
धर्मज्ञानि विशिष्टानि कार्याकार्योपधारणात् ॥ १६
धर्मज्ञानि द्वयान्याहुर्वेदज्ञानीतराणि च ।

C. 12. 8704
B. 12. 236[7].17
K. 12. 243. 17

दृष्टानां; T1 धृ° (for सृ°). — ^{d}) D7 T1 G1 हि (for [ए]व). K4. 6. 7. V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2–6. 8. 9 विद्यैवेह (K7 D4. 6. 9 °व हि) परा (Da4 °रां) गतिः.

11 ^{a}) Ś1 K1. 2. 4 चैव (for जन्म). — ^{b}) Da4 चतुर्विधां. — ^{c}) K6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2–6. 8. 9 जरायुजांडजोद्भिज्ज- (K6. 7 B9 D4–6. 9 °द्भेद-); D7 T1 G1. 3. 6 जरा चांडमथोद्भेद-. — ^{d}) K4. 6 V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 8 -स्वेदजं (K6 °पं) च; K7 D4. 5. 9 -स्वेदजेति; B8 (marg.) -स्वेदजांश्च; D6 -स्वेदजानि; D7 T G1. 3. 6 M1. 5–7 स्वेद इति (for स्वेदं चापि).

12 K2 om. 12^{a}. — ^{a}) B9 विसृष्टानि (for विशि°). — K2 reads 12^{b} after द्व (in 13^{b}) and repeats thereafter from उपपन्नं (in 12^{c}) up to द्व (in 13^{b}). — ^{b}) K6. 7 V1 B8 Da3. a4 Dn1. n4 D8 D2–4. 6. 8. 9 M1. 6. 7 -धारयेत्; B0. 6 (marg. as in text). 7. 9 D5 -लक्षय (D5 °ये) (for -लक्षयेत्). — ^{c}) K7 D4. 6. 9 तु (for हि). Ś1 K1. 2 (first time). 4 M7 यश्रेष्टा; D7 T1 G1. 3. 6 यच्चेष्टे; T2 °ष्टं (for °ष्टा). — ^{d}) K2 (first time) विशिशेत (sic); K2 (second time) विशेषित-; Dn1 D2. 8 विशेष्येत; T2 विशिष्टेन (for °ष्येत). Ś1 K1. 2 (both times). 4 B8 (marg.) विशेषयोः; K6 V1 विशिष्ययोः; B0. 6. 7. 9 Da3. a4 D5. 6 M6 विचेष्टया; B8 (orig.) विचिंतया; Dn1. n4 D8 D2. 3. 8 M1 विशेष्य या (M1 °ष्यतः); D7 T1 G1. 3. 6 M5 विचेष्टकः (M5 °तः); T2 विशेषतः (for *विशेष्ययोः). K7 D4. 9 M7 विशेष्ये- (M7 °शिष्यै)ताविचेष्टया (M7 °तः).

13 For the repetition in K2, cf. v. l. 12. — ^{a}) B6. 7. 9 Da3 D5 चतुर् (for आहुर्). Ś1 K2 (both times) द्विविध-; K4. 6. 7 B0 Dn1. n4 D8 D2. 3. 8 वै बहु-; B8 (marg.) Da3 हि बहु-; D7. 9 T1 G1. 3. 6 द्विबाहु- (for द्विबहु-). D4. 9 -पादीनि (for -पादानि). M7 आहुर्द्विबहुधादीनि. — ^{b}) K6 Da3. a4 तु यानि; B8 M1 च यानि (for द्वयानि). K6. 7 B0. 6–8 Dn1. n4 D8 D2–9 T G1. 3. 6 M1. 5–7 तु (for च). — K2 om. (hapl.) 13^{c}–14^{b}. — ^{c}) Ś1 K1 D5 M7 बहुपद्भ्यो; D7 T G1. 3. 6 द्विपा(G1. 3. 6 °प)दानि (for बहुपाद्भ्यो). — ^{d}) Ś1 K1 B9 Da4 D5 द्विपदानि; Da3 lacuna; D4. 9 M1. 6. 7 द्विपादीनि (for °दानि). D7 T G1. 3. 6 M5 जातिधर्माव(M5 °र्मोप)धारणात्.

14 K2 om. 14^{ab} (cf. v. l. 13). — ^{a}) K7 D4. 9 M1. 6. 7 द्विपादीनि; Ds1 D2. 6. 7 T G3. 6 M5 द्विपादानि (for द्विपदानि). Ś1 K1 Ds2 बहूनि; Da4 द्वयाणि; T2 च यानि. — ^{b}) D5 मध्यमान्युत्तराणि च. — K1. 2 om. (hapl.) 14^{d}–15^{c}; Ś1 reads the same on marg. D4 repeats 14^{d}–15^{a} after 16^{abc}. — ^{d}) D5 यानि (for तानि). B6 (marg. as in text) कृत्स्नानि; M1 चान्नानि (for ह्य°).

15 For the repetition in D4, cf. v. l. 14. K1. 2 om. 15^{abc} (cf. v. l. 14). Ś1 reads 15^{abc} on marg. — ^{a}) D9 पार्थिवाणि. — ^{b}) K7 D4. 6. 9 अधमानि; D5 उत्तराणि (for °मानि). K4 B8 Dn1. n4 D8 D2. 3. 8 तु (for च). — ^{c}) Ś1 V1 D7 T G1. 3. 6 उत्तमानि; D5 मध्यस्थाने (for °मानि). — ^{d}) B8 (marg.) जातिधर्माव- (for °धर्मोप-).

16 D5 om. (hapl.) 16. — ^{a}) D7 T G1. 3. 6 M5 उत्तमानि (for मध्य°). V1 B7 D3. 7 T1 G3. 6 द्वयानाहुर् (for °न्याहुर्). — D4 repeats 16^{bc} after the repetition of 14^{d}–15^{a}. — ^{b}) D9 reads from तराणि up to ज्ञानि (in 16^{c}) on marg. — Ś1 K1. 2. 4 om. (hapl.) 16^{c}–17^{b}. D4 om. (hapl.) 16^{d}–17^{c}. — ^{d}) T2 कार्याकार्याव- (for °कार्योप-). G1 -कारणात् (for -धारणात्).

17 Ś1 K1. 2. 4 om. 17^{ab}; D4 om. 17^{abc} (for both, cf. v. l. 16). — ^{b}) M7 वेदज्ञान्यपराणि च. — K2 om. (hapl.) 17^{d}–18^{c}; K1 reads the same

C. 12. 8704
B. 12. 238(?). 17
K. 12. 243. 17

वेदज्ञानि विशिष्टानि वेदो ह्येषु प्रतिष्ठितः ॥ १७
वेदज्ञानि द्वयान्याहुः प्रवक्तॄणीतराणि च ।
प्रवक्तॄणि विशिष्टानि सर्वधर्मोपधारणात् ॥ १८
विज्ञायन्ते हि यैर्वेदाः सर्वधर्मक्रियाफलाः ।
सयज्ञाः सखिला वेदाः प्रवक्तृभ्यो विनिःसृताः ॥ १९
प्रवक्तॄणि द्वयान्याहुरात्मज्ञानीतराणि च ।
आत्मज्ञानि विशिष्टानि जन्माजन्मोपधारणात् ॥ २०
धर्मद्वयं हि यो वेद स सर्वः सर्वधर्मविद् ।
स त्यागी सत्यसंकल्पः स तु क्षान्तः स ईश्वरः ॥ २१
धर्मज्ञानप्रतिष्ठं हि तं देवा ब्राह्मणं विदुः ।
शब्दब्रह्मणि निष्णातं परे च कृतनिश्चयम् ॥ २२
अन्तःस्थं च बहिष्ठं च येऽऽधियज्ञाधिदैवतम् ।
जानन्ति तान्नमस्यामस्ते देवास्तात ते द्विजाः ॥ २३
तेषु विश्वमिदं भूतं साग्रं च जगदाहितम् ।

---

twice. — d) K_7 (orig.) देवो; K_7 (marg.) वेदा; T_2 G_1 वेदे (for वेदो). $Ś_1$ K_1 (both times), 4 येषु; $D_{a3, a4}$ D_5 ह्येष (for ह्येषु).

18 For the repetition in K_1 and om. of 18[abc] in K_2, cf. v. l. 17. — a) B_9 वेदज्ञान- (for °ज्ञानि). T_2 [इ]तराणि (for द्वयानि). — b) K_7 D_9 प्रवक्षाणि; B_6 °हूणि; D_4 °क्रणि (for °क्तॄणि). — c) K_7 प्रवक्ष्यीणि; B_6 °हूणि; D_{n4} प्रचक्षणीर्; D_{s1} D_9 प्रवक्तृनि; D_4 प्रवक्रणि (for °क्तॄणि). — d) $K_{2, 6}$ ज्ञा(K_6 जा)तिधर्मोप-; K_7 $D_{4, 6, 9}$ वेदज्ञानोप-; D_{a4} सर्वे धर्मोप-; $M_{1, 6, 7}$ धर्माधर्मोप- (for सर्व°). G_1 -कारणात् (for -धा°).

19 a) K_2 ह; $M_{1, 6}$ [ऽ]पि (for हि). K_7 $D_{4, 6, 9}$ तैर् (for यैर्). — b) K_6 V_1 $B_{0, 6–9}$ $D_{a3, a4}$ $D_{n1, n4}$ D_8 $D_{2, 3, 5, 8}$ सधर्माः स-; K_7 $D_{4, 6, 9}$ सयज्ञाः स-; $M_{1, 6}$ सर्वधर्माः; M_5 सहधर्म- (for सर्व°). B_0 -फलक्रियाः (for -क्रियाफलाः). D_7 T $G_{1, 3, 6}$ सहधर्मफलक्रियाः. — c) K_2 $D_{5, 7}$ सर्वज्ञाः; D_{a3} lacuna; $D_{n1, n4}$ D_8 $D_{2, 3, 8}$ सधर्माः (for सयज्ञाः). $Ś_1$ $K_{1, 4}$ चाखिला; K_2 च खिला; K_7 $D_{4–7, 9}$ सफला; $D_{n1, n4}$ D_2 निखिला; D_{s2} त्व° (for स°). T_2 प्रज्ञायंते हि यैर्वेदाः. — d) D_{s1} प्रवेक्तृभ्यो. $K_{1, 4}$ विनिस्सृताः; K_2 °गताः; D_5 विनिश्रिताः (for विनिःसृताः). K_7 $D_{4, 7, 9}$ T $G_{1, 3, 6}$ $M_{1, 5–7}$ प्रवक्तृष्वभिनिःसृताः (D_7 G_1 °तान्).

20 a) K_7 D_{n4} प्रवक्षाणि (for °क्तॄणि). K_1 द्वयानाहुर् (for °न्याहुर्). — b) K_1 आत्मज्ञानेतराणि च; D_{a4} °जातीतराणि च. — d) $Ś_1$ $K_{1, 2, 4}$ धर्माधर्मोप-; B_8 अन्मजन्मोप-; D_6 जन्मकर्मोप-; D_7 T_1 $G_{1, 3, 6}$ जन्ममोक्षोप- (for जन्माजन्मोप-). G_1 -कारणात् (for -धा°).

21 b) B_9 $M_{1, 5}$ धर्मज्ञः; D_7 T_1 $G_{1, 3, 6}$ सर्वज्ञः (for स सर्वः). K_6 V_1 $B_{0, 6–8}$ $D_{a3, a4}$ $D_{n1, n4}$ D_8 D_3 $M_{6, 7}$ स धर्मज्ञः स सर्व($B_{0, 7}$ $M_{6, 7}$ धर्म)वित्; K_7 $D_{4–6, 9}$ T_2 स सर्वज्ञः स धर्मवित्; $D_{2, 8}$ स सर्वज्ञः स सर्ववित्. — c) K_7 D_9 संत्यागी; D_7 T $G_{1, 3, 6}$ $M_{1, 5–7}$ सत्याशीः (for स त्यागी). — d) $K_{6, 7}$ V_1 $B_{6, 7, 8}$ (marg.), 9 $D_{a3, a4}$ $D_{4–7, 9}$ T $G_{1, 3, 6}$ $M_{1, 5–7}$ सत्यक्षांतिर् (V_1 B_8 °तः); $B_{0, 8}$ (orig.) $D_{n1, n4}$ $D_{2, 3, 8}$ सत्यः शुचिर् (for स तु क्षान्तः). K_6 $B_{0, 6–9}$ $D_{a3, a4}$ $D_{n1, n4}$ D_8 $D_{2, 3, 8}$ [अ]थ (for स).

22 a) K_6 $B_{6–9}$ D_{a3} $D_{n1, n4}$ $D_{2, 3, 8}$ ब्रह्म-; D_5 सर्व- (for धर्म-). D_{n4} -विशिष्टं; D_7 T_1 $G_{1, 3, 6}$ -प्रतिष्ठा; T_2 -प्रतिष्ठां (for °ष्ठं). — b) D_{a4} ब्रह्मणं; M_1 ब्राह्मणो (for °णं). — c) K_2 निष्क्रांतं; D_{n4} निस्नातं; $M_{1, 6, 7}$ निष्णाताः (for °तं). — d) $M_{1, 6}$ तु (for च). G_1 $M_{1, 6}$ -निश्चयाः (G_1 °यः).

23 a) G_1 अंतस्थश् (for अन्तःस्थं). $Ś_1$ $K_{1, 2, 6}$ B_0 D_{a3} D_{n1} D_8 T_1 बहिःस्थं; G_1 बहिष्ठश् (for बहिष्ठं). — b) $K_{6, 7}$ $B_{0, 6, 7, 8}$ (marg.), 9 $D_{a3, a4}$ $D_{n1, n4}$ D_8 $D_{2–9}$ साधि-; B_8 पंच-; T_1 ये च (for येऽऽधि-). M_7 -यज्ञाति- (for -यज्ञाधि-). — c) $Ś_1$ $K_{1, 2, 4}$ न पश्यामस्; V_1 नमस्यंति (for नमस्यामस्). K_6 $B_{0, 6, 7, 8}$ (marg.), 9 $D_{a3, a4}$ $D_{n1, n4}$ D_8 $D_{2, 3, 8}$ ज्ञानान्विता हि पश्यंति; B_8 (orig.) जानंति ते नमस्याश्च; D_5 ज्ञानान्वितान्नमस्यामस्. — d) K_6 transp. देवाः and ते. K_7 $D_{4, 9}$ ते च वै; D_6 तात न (for तात ते).

24 a) D_5 येषु; $M_{1, 6, 7}$ तेषां (for तेषु). — b) K_2 साग्रजं; K_6 V_1 $B_{0, 6–9}$ $D_{a3, a4}$ $D_{n1, n4}$ $D_{2, 3, 5, 8}$ सर्वं (for साग्रं). — c) T $G_{1, 3, 6}$ महात्म्य- (T_2 G_6 °त्म-; G_1 °त्मा-) (for माहात्म्य-).

25 a) $K_{4, 6}$ V_1 $B_{0, 6, 7, 9}$ $D_{a3, a4}$ $D_{n1, n4}$ D_8 $D_{2, 3, 6, 8}$ आद्यं ते; K_7 $D_{4, 9}$ अर्हते; B_8 आद्यंतौ; D_5 विज्ञेय-; D_7 T_1 $G_{1, 3, 6}$ आद्यंत-; T_2 आद्यं तं (for आदिं ते). — b) D_7 T_1 $G_{1, 3, 6}$ धर्म (for कर्म). D_{a4} चातित्य; D_{s1} D_7 T_1 $G_{3, 6}$ $M_{1, 6}$ चाधी(D_{s1} °धि)त्य (for चातीत्य). K_7 $D_{4, 6, 9}$ सर्वतः (for °ज्ञः). — d) D_{a4} सर्वदेवाः; D_7 $M_{1, 6}$ सर्वस्येशः; G_1 धर्म-

तेषां माहात्म्यभावस्य सदृशं नास्ति किंचन ॥ २४
आदिं ते निधनं चैव कर्म चातीत्य सर्वशः ।
चतुर्विधस्य भूतस्य सर्वस्येशाः स्वयंभुवः ॥ २५

इति श्रीमहाभारते शान्तिपर्वणि एकोनत्रिंशदधिकद्विशततमोऽध्यायः ॥ २२९ ॥

२३०

व्यास उवाच ।
एषा पूर्वतरा वृत्तिर्ब्राह्मणस्य विधीयते ।
ज्ञानवानेव कर्माणि कुर्वन्सर्वत्र सिध्यति ॥ १
तत्र चेन्न भवेदेवं संशयः कर्मनिश्चये ।
किं नु कर्म स्वभावोऽयं ज्ञानं कर्मेति वा पुनः ॥ २
तत्र चेह विवित्सा स्याज्ज्ञानं चेत्पुरुषं प्रति ।
उपपत्त्युपलब्धिभ्यां वर्णयिष्यामि तच्छृणु ॥ ३
पौरुषं कारणं केचिदाहुः कर्मसु मानवाः ।
दैवमेके प्रशंसन्ति स्वभावं चापरे जनाः ॥ ४
पौरुषं कर्म दैवं च फलवृत्तिस्वभावतः ।

C. 12. 8717
B. 12. 238(8). 5
K. 12. 244. 5

स्येशाः. D7 G1 स्वयंप्रभुः (for °भुवः). ❀ Cv: स्वयं-भुवः, स्वयं स्वतन्त्रः परमात्मा, भूः स्थानमेषां ते तथोक्ताः । ❀

Colophon: G2 missing; K3. 5 B1–5 Da1. a2 Dn2. n3 D1 G4. 5 M2–4 absent. —*Sub-parvan:* Ś1 K1. 2. 4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2–4. 6–9 T G1. 3. 6 M1. 5–7 मोक्षधर्म. —*Adhy. name:* Ś1 K1. 2. 4 शुकप्रश्नः; K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 5. 8 M1. 6 शुकानुप्रश्नः; K7 D4. 6. 9 शुकानुप्रश्ने ज्ञान-प्राधान्यं; M5 शुकानुप्रश्ने ज्ञानप्रशंसा; M7 शुकानुप्रश्ने आत्म-ज्ञानप्रशंसनं. —*Adhy. no.* (figures, words or both): K6 D8 M1. 6. 7 62; K7 D4. 6. 9 6 (sic); Dn1 D7 T1 G1. 3. 6 M5 64; Dn4 Ds2 63; D8 59; T2 78. —*Śloka no.:* Dn1. n4 D8 25.

230

☞ This adhy. is missing in G2 (cf. v. l. 12. 222. 19).

1 Da4 om. the ref. — a) K7 D4. 9 पूर्वकृता (for °तरा). — b) ❀ Ca: ब्राह्मणस्य ब्रह्मज्ञानाय प्रवृत्तस्य । ❀ — c) B8 (marg.) ज्ञानवानिव; D5 °न्येव. — d) T2 सिध्यते.

2 a) K6 Bo न चेत्तत्र (for तत्र चेन्न). Ś1 K1. 2 देव; B8 एतं; D4. 7. 9 T G1 एव (for एवं). — b) B6 (marg. as in text) सर्व- (for कर्म-). K7 Dn1. n4 D2–6. 8. 9 -सिद्धये (for -निश्चये). — c) K4. 7 B6 (marg.) Da3 Dn1. n4 D2. 5–8 T2 G1 तु (for नु). D7 T G1. 3. 6 M7 वा; M5 वो (for स्व). — d) Ś1 K1. 2 M1. 6 ज्ञान-; D7 T G1. 3. 6 M5 दैवं (for ज्ञानं).

3 Ds1 om. 3ab. — a) Ś1 K1. 2. 4 देह- (for चेह). K6 Bo चेज् (for स्याज्). V1 B8 D5 तत्र वे(V1 चे)-दविधित्सा स्याज्; B6. 7. 9 त(B7 अ)त्र चेदविहिंसा स्याज्; Dn1. n4 Ds2 D2. 3. 8 तत्र वेदविधिः स स्याज्; D7 T1 G1. 3. 6 M1. 6. 7 तत्र वेदविवि(M1. 6 °दि)त्सार्थं (M1. 6. 7 °र्थं); T2 किं तत्र वेदवित्साध्यं. — b) Da3. a4 कृत्वा (for ज्ञानं). Ś1 K1. 2. 6 Bo Da3. a4 सत्-; V1 तत्-; D7 T G1. 3. 6 M5 यत्- (for चेत्). D4. 6. 9 पुरुषं.

4 With 4, cf. 12. 224. 50. D8 repeats 4ab after 4. — a) K7 D4. 6. 7. 9 T2 G1. 3. 6 M1. 5–7 पुरुषं (for पौ°). — b) T2 G3 केचित् (for आहुः). K6. 7 V1 D4. 5. 9 कर्म च; T2 G3. 6 कर्मेति (for कर्मसु). — c) G1 देवम् (for दैवम्). K7 D4. 9 एकं; D6. 7 T1 G1 एव (for एके). — d) K7 D4. 9 स्वभाव. K4 Bo. 8 Da4 Dn1. n4 D8 D2. 3. 7. 8 T1 G1. 6 अपरे; K6. 7 V1 B6–8 Da3 D4. 6. 9 इतरे (for चापरे). D5 स्वभावं भूत-चिंतकाः.

5 = (var.) 12. 224. 51. — a) Da4 पुरुषं; M7 पौरुषः. Ś1 K1. 2. 4. 6. 7 Bo. 6–9 Da3. a4 D8 D5–6. 8. 9 M1. 7 तु (for च). — b) Ś1 K1. 2 Ds1 फलवृत्तिः;

C. 12. 6717 B. 12. 239(8). 5 K. 12. 244. 5

त्रयमेतत्पृथग्भूतमविवेकं तु केचन ॥ ५
एवमेतन्न चाप्येवमुभे चापि न चाप्युभे ।
कर्मस्था विषमं ब्रूयुः सत्त्वस्थाः समदर्शिनः ॥ ६
त्रेतायां द्वापरे चैव कलिजाश्च ससंशयाः ।
तपस्विनः प्रशान्ताश्च सत्त्वस्थाश्च कृते युगे ॥ ७
अपृथग्दर्शिनः सर्वे ऋक्सामसु यजुःषु च ।
कामद्वेषौ पृथग्दृष्ट्वा तपः कृत उपासते ॥ ८
तपोधर्मेण संयुक्तस्तपोनित्यः सुसंशितः ।
तेन सर्वानवाप्नोति कामान्यान्मनसेच्छति ॥ ९
तपसा तदवाप्नोति यद्भूत्वा सृजते जगत् ।
तद्भूतश्च ततः सर्वो भूतानां भवति प्रभुः ॥ १०
तदुक्तं वेदवादेषु गहनं वेददर्शिभिः ।
वेदान्तेषु पुनर्व्यक्तं क्रमयोगेन लक्ष्यते ॥ ११
आरम्भयज्ञाः क्षत्रस्य हविर्यज्ञा विशः स्मृताः ।

K7 D4. 6. 9 फलं वृत्ति-; B7. 8 Dn1. n4 Ds2 D2. 3. 8 कालवृत्ति- (Dn4 °त्तिः); D7 T1 G1 फलवृत्तिं; T2 G6 फलवंति- (for °वृत्ति-). — c) B6 द्वयम्; D3 वयम् (for त्रयम्). D4 पृथग्भूते. — d) V1 D7 T G1. 3. 6 M5 च (for तु). K6 केन च; G1 M5 किंचन (for केचन). ❀ Cn: अविवेकं समुच्चयम् ॥ Cs: अविवेकं विवेकरहितं मूढभाषितमित्यर्थः । ❀

6 = (var.) 12. 224. 52. — ab) K7 D4. 9 एव; D4. 7 T1 G3. 6 एवं; T2 एतं (for एतन्). — K1 om. (hapl.) 6b–7a. — b) K7 D4. 9 चैवं; T2 M5 एवं (M5 °व) (for चापि). V1 उभे वापि न चाप्युभौ; D8 उभे चैव न चाप्युभे; D7 T1 G1. 3. 6 M1. 6. 7 उभावेव (T1 G1. 3. 6 °वं) न चाप्युभौ (M7 °भे). K6 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 एतदेवं च नैवं (Da4 च दैवं; D5 न चैवं) च न चोभे नानुभे (D5 चाप्युभे) तथा (B8 न च). — c) K7 D4. 9 कर्मस्थ-; D6 एकस्था (for कर्मस्था). K4. 6. 7 B0. 6–9 Dn1. n4 Ds2 D2–6. 8. 9 M6 Cn विषयं (for °मं). Da3. a4 प्राह (for ब्रूयुः). ❀ Cn: कर्मस्थाः आर्हताः । ❀ — d) K7 Da4 सत्त्वस्था. Ś1 K2. 4 -दर्शनाः (for -दर्शिनः).

7 K1 om. 7a (cf. v. l. 6). K7 om. 7. — b) K6 कलिजाघ-; B0 °जश्च. Ś1 K1. 2. 4 कलौ (K1 उभे) चापि न संशयः; D5 T2 कलिजाश्च न संशयः; D7 G1 °जाताश्च संशयाः (G1 °यः). — For 7ab, K6 (also) B6–9 Da3. a4 subst.:

680* त्रेतायुगे विधिस्त्वेष धर्माणां न कृते युगे ।

— Da4 om. (hapl.) 7cd. — c) K4 प्रशांत्यश् (for प्रशान्ताश्). D4–6 हि (for च). ❀ Cn: प्रशान्ताः निःसंशयाः । ❀ — d) K2 कृते (for युगे).

8 = (var.) 12. 224. 63. — a) K6 B0 Dn1. n4 Ds2 D2. 3. 6. 8 -दर्शनाः; Ds1 -दर्शनात् (for -दर्शिनः). — K7 reads 8b twice. — b) K7 (first time) D6 om. सु. K6 V1 B0. 7. 8 Ds D2. 3. 6 G3. 6 यजुःसु (for यजुःषु). D7 T1 G1 अपि (for च). K2 ऋक्सामस्वयजःस्व च; K7 (second time) ऋक्सामयजूंषि च. — c) B6 कामक्रोधौ (for °द्वेषौ). K7 D4. 9 वशे (for पृथग्). K2 सृष्टा; K7 Dn1. n4 D2. 4. 8. 9 कृत्वा; Da4 दृष्टा; Ds1 दृष्ट्या (for दृष्ट्वा). — d) M1. 6 कृतम्.

9 a) K7 D4. 6. 9 M7 संयुक्तास्; G3. 6 °क्तं (for °क्तस्). — b) K1 ततो नित्यः; K4 D2. 8 तपोनित्यं; D8 °निष्ठः (for °नित्यः). K6 Da3 Ds2 D5 सुशंसितः; V1 सुसंयतः; B8 °स्कृतः; Da4 °सति; D7 T1 G1. 3. 6 °हितः (D7 T1 °तं) (for सुसंशितः). K7 D4. 9 तपोयज्ञसुसंशिनः; D6 °नित्याः सुशंसिताः. — 9cd = (var.) 12. 224. 53cd. — c) Ś1 K1. 2 सर्वम् (for सर्वान्). — d) B0 काम्यान्यान्; Da4 कामं यान्; D7 T1 G1 यान्कामान् (by transp.).

10 = (var.) 12. 224. 54. — b) D8 D7 T G1. 3. 6 M1. 5–7 यद्भूतं (for °त्वा). K7 D4. 6. 9 भूतं सृजति यज्जगत्. — c) K6 B6 (marg.) Da4 D5 उद्भूतश्. Ds2 तपः (for ततः). K4 Da4 Dn4 सर्वे; Dn1 सर्वं (for सर्वो). D7 T1 G1. 3. 6 सत्यं तपश्च भूतानां; T2 M1. 6. 7 स तद्भू(M1. 6 तु भू)तश्च भूतानां; M5 स तद्भूतं च सर्वेषां. — d) D7 T G1. 3. 6 M1. 6. 7 सर्वेषां (for भूतानां).

11 = (var.) 12. 224. 58. — a) K7 D4. 6. 9 यदुक्तं; B9 तमुक्तं (for तदुक्तं). K7 -पादेषु (for -वादेषु). — b) K7 D4–6. 9 तत्त्व- (for वेद-). D8 -वादिभिः (for -दर्शिभिः). ❀ Ca: गहनं, गहनमिव लेशतः दर्शितम् । ❀ — c) Ś1 K1. 2. 4 पदांतेषु; D5 वेदांगेषु (for वेदान्तेषु). K6 [अ]पुनर्. Ś1 K1. 2 व्यस्तं (for व्यक्तं). — d) K6 B0. 6. 7. 8 (marg. as in text). 9 Da3. a4 Dn1. n4 Ds1 D2. 3. 5. 8 Cn कर्म- (for क्रम-). Da3 -योगं न; D5 -योगे च (for -योगेन). K6 B6 (marg. as in text). 7 Da3. a4 युज्यते; Dn4 लक्षते; D5. 6 T2 G1. 3. 6 M1. 6. 7 लभ्यते (for लक्ष्यते).

परिचारयज्ञाः शूद्राश्च जपयज्ञा द्विजातयः ॥ १२
परिनिष्ठितकार्यो हि स्वाध्यायेन द्विजो भवेत् ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ १३
त्रेतादौ सकला वेदा यज्ञा वर्णाश्रमास्तथा ।
संरोधादायुषस्त्वेते व्यस्यन्ते द्वापरे युगे ॥ १४
द्वापरे विप्लवं यान्ति वेदाः कलियुगे तथा ।
दृश्यन्ते नापि दृश्यन्ते कलेरन्ते पुनः पुनः ॥ १५
उत्सीदन्ति स्वधर्माश्च तत्राधर्मेण पीडिताः ।
गवां भूमेश्च ये चापामोषधीनां च ये रसाः ॥ १६
अधर्मान्तर्हिता वेदा वेदधर्मास्तथाश्रमाः ।
विक्रियन्ते स्वधर्मस्थाः स्थावराणि चराणि च ॥ १७
यथा सर्वाणि भूतानि वृष्टिर्भौमानि वर्षति ।
सृजते सर्वतोऽङ्गानि तथा वेदा युगे युगे ॥ १८
विसृतं कालनानात्वमनादिनिधनं च यत् ।
कीर्तितं तत्पुरस्तान्मे यतः संयान्ति यान्ति च ॥ १९
धातेदं प्रभवस्थानं भूतानां संयमो यमः । C. 12. 8732 B. 12. 229(8). 20 K. 12. 244. 20

---

12 = (var.) 12. 224. 61. — a) Dn1 D8 D3 आलंभ- (for आरम्भ-). Ś1 K1. 2 -यज्ञः (for -यज्ञाः). K6 Bo. 6. 8 (marg.). 9 Da3. a4 Dn1. n4 D8 D2. 3. 8 क्षत्राश्च; B7. 8 T2 क्षत्राः स्युर्; D5 क्षत्रा हि; G1 कंत्रस्य (for क्षत्रस्य). K4 आरंभक्षत्रयज्ञश्च. ※ Cs: आलम्भः पश्वालम्भः । यद्वा पाठान्तरे रक्षाहेतुषु युद्धादिषु आरम्भयज्ञाः । ※ — b) Ś1 K1. 2 M7 -यज्ञो (for -यज्ञा). M1. 6. 7 विशां (for विशः). Ś1 K1. 2. 4 स्मृतः (for स्मृताः). — c) Hypermetric. K2 -यज्ञः (for -यज्ञाः). K7 D4. 6. 7. 9 T G1. 3. 6 M1. 6. 7 तु (for च). — d) D8 तपोयज्ञा (for जप°).

13 a) B7 Da3. a4 -निश्चित- (for -निष्ठित-). — b) Dn4 स्वाध्यायो न; M6 °ये यो (for °येन). B6 (marg.) द्विजोत्तमः (for द्विजो भवेत्). K7 D4–6. 9 स्वाध्यायेनैव ब्राह्मणः. — 13^{cd} = Manu. 2. 87^{cd}. — c) K2. 6 अन्यं न; Da4 Dn1 अन्यत्र (for °न्न).

14 = (var.) 12. 224. 65. With 14^{ab}, cf. 1. 209. 5^{ab}; 5. App. I (No. 3), line 28. — a) D6 त्रेतादेः; D7 T G1. 3. 6 त्रेतायां (for °दौ). K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 5. 8 केवला; D7 T1 G1. 3. 6 संहिता; M5 सखिला (for सकला). — b) K2 यज्ञ- (for यज्ञा). Ds1 वर्णेश्रमास्. K7 D4. 6. 9 वेदधर्मास्तथाश्रमाः; D5 यज्ञा वर्णास्तथाश्रमः. — c) K1 सरोधाद्. Ś1 K2. 4 त्वेव; K1 त्वेह (for त्वेते). M1 संरोधास्त्वायुषस्त्वेते. — d) K7 D4. 6. 9 तथा (for युगे).

15 15^{ab} = (var.) 12. 224. 62^{cd}. — a) Da4 विप्लुवं; D8 विफलं (for विप्लवं). — b) D7 देवाः (for वेदाः). — 15^{cd} = (var.) 12. 224. 66^{ab}. — c) M7 दृश्यते. K6 चापि (for नापि). Ds1 दृश्यते. — d) Da4 कालेरंतः (for कलेरन्ते). Bo Dn1. n4 D8 D2. 3. 8 किल (for the second पुनः).

16 16^{ab} = (var.) 12. 224. 66^{cd}. — a) G1 स्वकर्माश्च (for स्वध°). — D8 om. (hapl.) 16^{b}–17^{a}. — b) D4 नात्र (for तत्र). D7 G1 धर्मेण (for [अ]धर्मेण). — c) Da4 भूतेषु (for भूमेश्च). K7 D4. 9 हीयंते; D6 पयसाम्; D7 ये पापा (for ये चापाम्). — d) Ds1 M1. 6. 7 औषधीनां (for ओ°).

17 With 17, cf. 12. 224. 68. D8 om. 17^{abc} (cf. v. l. 16). 17^{ab} is partly damaged in B7. — a) Ś1 K1. 2. 4 अधर्मांतरिता; Da4 °तर्हितो; D5 अधर्मांतर्हितो. — b) D4 वेदधर्मैस्तथाश्रमः. — c) B6 Dn1. n4 D8 D5 T1 G1. 3. 6 विक्रीयंते. K7 D4. 9 स्वधर्माद्वै; D7 T G1. 3. 6 M1. 5–7 °र्माश्च (M6 °श्च) (for °र्मस्थाः). — d) M1. 5. 6 त्रसानि (for चराणि).

18 With 18, cf. 12. 224. 69. — a) K6 यथा भूतानि सर्वाणि. — b) B8 यच्छति (for वर्षति). D7 T G1. 3. 6 M1. 5–7 वृष्ट्या तृप्यंति प्रावृषि. — c) Ś1 K1. 2 सृजंति; D7 T1 G1. 3. 6 M6 सृज्यंते; T2 M7 सृजंते (for सृजते). D7 T G1. 3. 6 वेदतो (for सर्वतो). — d) Da4 यथा; D6 यतो (for तथा). Da3. a4 भावा; D4. 9 वेदाद् (for वेदा). M7 कृते (for the first युगे). Da4 D8 om. the second युगे.

19 = (var.) 12. 224. 71. — a) K1. 4 विसृत्वं; K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 5. 8 निश्चितं; K7 D4. 6. 9 विस्तृतं; D7 T G1. 3. 6 M5 विहितं (for विसृतं). — c) K4. 6. 7 Bo. 7 Da4 Dn1. n4 D8 D2–4. 6. 8. 9 यत् (for तत्). B8 (marg. as in text) D6. 7 T G1. 3. 6 M1. 5–7 ते (for मे). — d) M7 यत्र (for यतः). K7 D7 T1 G3. 6 संयाति (for संयान्ति). K7 D4. 6. 7. 9 T G1. 3. 6 M1. 5–7 च प्रजाः (for यान्ति च). K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 5. 8 सूते यच्चास्ति (K6 यच्चांति; V1 यथांति) च प्रजाः.

C. 12. 8732
B. 12. 230(s). 20
K. 12. 244. 20

स्वभावेन प्रवर्तन्ते द्वंद्वसृष्टानि भूरिशः ॥ २०
सर्गः कालो धृतिर्वेदाः कर्ता कार्यं क्रियाफलम् ।
एतत्ते कथितं तात यन्मां त्वं परिपृच्छसि ॥ २१

इति श्रीमहाभारते शान्तिपर्वणि त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥

२३१

भीष्म उवाच ।
इत्युक्तोऽभिप्रशस्यैतत्परमर्षेस्तु शासनम् ।
मोक्षधर्मार्थसंयुक्तमिदं प्रष्टुं प्रचक्रमे ॥ १
शुक उवाच ।
प्रजावाञ्श्रोत्रियो यज्वा वृद्धः प्रज्ञोऽनसूयकः ।
अनागतमनैतिह्यं कथं ब्रह्माधिगच्छति ॥ २
तपसा ब्रह्मचर्येण सर्वत्यागेन मेधया ।
सांख्ये वा यदि वा योगे एतत्पृष्टोऽभिधत्स्व मे ॥ ३
मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं समवाप्यते ।
येनोपायेन पुरुषैस्तच्च व्याख्यातुमर्हसि ॥ ४

---

20 = (var.) 12. 224. 72. — a) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 यच्चेदं ; D7 T1 G1. 6 यातेदं (G1 °तं) ; G3 सा तेदं (for यातेदं). Da3. a4 प्रभवं ; Dn1 °वः (for °व-). — c) B7. 8 (marg.) Dn1. n4 Ds D2. 3. 8 स्वभावेनैव वर्तते. — d) K6 Bo. 6 (marg. as in text). 9 Da3. a4 D5 ब्रह्म- (for द्वंद्व-). Ś1 K1. 2 -शास्त्राणि ; K7 D4–6. 9 -युक्तानि (for -सृष्टानि). B8 (marg.) सर्वशः (for भूरिशः).

21 = (var.) 12. 224. 73. — a) K7 सर्गं ; B8 (marg.) G3 स्वर्गः ; Da4 Ds सर्गाः (for सर्गः). B8. (marg.) कामो (for कालो). D6 भूतिर् ; D7 T G1. 3. 6 M5 क्रिया (for धृतिर्). — b) K2 कांता (for कर्ता). K7 कार्यं- (for कार्यं). — c) B6 (marg.). 8 (marg. as in text) सर्वं (for तात). — d) M1. 6. 7 मा (for मां). G3 -पृच्छति.

Colophon : G2 missing ; K3. 5 B1–5 Da1. a2 Dn2. n3 D1 G4. 5 M2–4 absent. —*Sub-parvan :* Ś1 K1. 2. 4. 6. 7 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–4. 6–9 T G1. 3. 6 M1. 5–7 मोक्षधर्म. — *Adhy. name :* Ś1 K1. 2. 4 शुकप्रश्नः ; K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 M5 शुकानुप्रश्नः ; K7 D4. 6. 9 शुकानुप्रश्ने धर्मानुख्यापनं ; M1. 6 क्रियाफलप्रतिपादनः ; M7 क्रियाफलविपाकः. — *Adhy. no.* (figures, words or both) : K6 M1. 6. 7 63 ; K7 7 ; Dn1 D7 T1 G1. 3. 6 M5 65 ; Dn4 Ds2 64 ; D8 60 ; T2 79. — *Śloka no. :* Dn1. n4 Ds 21.

231

☞ This adhy. is missing in G2 (cf. v. l. 12. 222. 19).

1 Da4 व्यास (for भीष्म). — a) K7 D4. 6. 9 [ऽ]थ ; B9 तु ; D7 T1 G1. 3. 6 हि (for ऽभि-). — b) B9 च (for तु). — c) K6 -चयार्थं- (for -धर्मार्थ-). M1 -सहितम् (for -संयुक्तम्). — d) B6 इमं ; B7 इति (for इदं). B6 (marg. as in text). 7. 9 प्रश्नं ; B8 (marg.) वक्तुं (for प्रष्टुं). D5 इदं वचनमब्रवीत्.

2 a) K4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–9 T1 G3 प्रज्ञावान् (for प्रजा°). — b) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 कृत- ; T2 M5 वृद्ध- ; M7 वृद्धं (for वृद्धः). K1. 2. 4. 7 D4. 7. 9 T1 G1. 3. 6 M1. 5–7 प्राज्ञो (for प्रज्ञो). — c) D5 अनागतमते तिष्ठन्. ❀ Ca : अनागतं, प्रत्यक्षादिप्रमाणानवधृतम् । अनैतिह्यं, इतिहासादावश्रुतम् । ❀

3 b) Ś1 K1. 2. 4 संग- (for सर्व-). D7 मे यथा (for मेधया). — c) K7 D4. 6. 9 सांख्यो ; D7 T1 G1. 3. 6 सांख्यं (for सांख्ये). D4. 6. 9 योगी ; D7 T1 G1. 3. 6 योगं (for योगे). — d) K6. 7 V1 Bo 6–9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 वदस्व ; D7 T G1. 3. 6 M1. 5–7 ब्रवीहि (for ऽभिधत्स्व).

4 a) K7 D5 वा (for च). — b) K4 एकाग्र्यं. K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 यथैका-

व्यास उवाच ।

नान्यत्र विद्यातपसोर्नान्यत्रेन्द्रियनिग्रहात् ।
नान्यत्र सर्वसंत्यागात्सिद्धिं विन्दति कश्चन ॥ ५
महाभूतानि सर्वाणि पूर्वसृष्टिः स्वयंभुवः ।
भूयिष्ठं प्राणभृद्ग्रामे निविष्टानि शरीरिषु ॥ ६
भूमेर्देहो जलात्सारो ज्योतिषश्चक्षुषी स्मृते ।
प्राणापानाश्रयो वायुः खेष्वाकाशं शरीरिणाम् ॥ ७
क्रान्ते विष्णुर्बले शक्रः कोष्ठेऽग्निर्भुक्तमर्छति ।
कर्णयोः प्रदिशः श्रोत्रे जिह्वायां वाक्सरस्वती ॥ ८
कर्णौ त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
दर्शनानीन्द्रियोक्तानि द्वाराण्याहारसिद्धये ॥ ९
शब्दं स्पर्शं तथा रूपं रसं गन्धं च पञ्चमम् ।
इन्द्रियाणि पृथक्त्वर्थान्मनसो दर्शयन्त्युत ॥ १०
इन्द्रियाणि मनो युङ्क्ते वश्यान्यन्तेव वाजिनः ।
मनश्चापि सदा युङ्क्ते भूतात्मा हृदयाश्रितः ॥ ११
इन्द्रियाणां तथैवेषां सर्वेषामीश्वरं मनः ।

C. 12. 8745
B. 12. 240(39).12
K 12. 243. 12

ऽयम(Da4 °ऽम- ; D5 °ऽयाद)वाप्यते ; K7 D4. 6. 7. 9 T G1. 3. 6 M1. 5–7 ऐ(K7 D4. 9 [अ]प्यै)काऽयं यदि वा(D4. 9 °दि चा- ; M1. 5. 6 °द्वा)प्यते ; B8 (marg.) यथैकाऽयं समश्नुते. —c) D6 केन (for येन). B8 (marg.) पुरुषस् ; Da4 °षौ (for °षैस्). —d) Ś1 K1. 2 तं च ; K4. 6. 7 B0. 6. 7. 8 (marg. as in text). 9 Da3. a4 Dn1. n4 Ds D2–5. 8. 9 तत्त्वं ; V1 तन्मे (for तच्च). Da4 Dn4 अर्हति.

5 a) ❀ C8 : तपः सात्विको निवृत्तिधर्मः । ❀ —b) Ś1 K1 -विग्रहात् (for -नि°). —c) D7 T G1. 3. 6 M1. 6. 7 लोभ- (for सर्व-). Ś1 K1 -संन्यासात् ; K2 -संध्यासात् (for -संत्यागात्). —d) D5 सर्वं (for सिद्धिं). V1 B8 (marg.) D5 मानवः ; Da4 कश्च नः.

6 a) B8 (marg. as in text) महान्त्येतानि (for महाभू°). —b) K2 B7 पूर्वा सृष्टिः ; K6 पूर्वसृष्टिं ; K7 पूर्वं सृष्टिः ; B0 पृथक्सृष्टिः ; B8 (orig. ; marg. as in text) भूतसृष्टिः ; B8 (also marg.) Dn4 Ds D2. 3 पृथक्सिद्धिः ; D5 सर्वसृष्टिं ; D7 T1 G1. 3, 6 पूर्वसृष्टौ (for °सृष्टिः). —c) D7 T G1. 3. 6 M7 -काये (for -ग्रामे). K2 भूयिष्ठिं प्राणभूद्ग्रामे (sic) ; K7 D4. 6. 9 °ष्ठं भूत(D6 प्राण)संघाते ; D5 °ष्ठं प्राणभिद्ग्राहैर्. —d) K1 निर्विष्टानि ; K2 विनि° ; B0 विवि° (for निवि°).

7 G3 om. 7a–8b. —a) Ds2 D7 T G1. 6 देहा (for देहो). K4. 7 D4. 6. 9 स्वेदो ; K6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 स्नेहो ; D5. 7 T G1. 6 M1. 5–7 स्रोतो (for सारो). —b) D7 T1 G6 सृते (for स्मृते). —c) D9 वायुं. V1 Da4 D8 प्राणपानाश्रितो (Da4 °समो) वायुः. —d) Ds1 खं च ; D4. 6. 9 खानि (for खेषु). D7 T G1. 6 M7 आकाशः (for °शं).

8 G3 om. 8ab (cf. v. l. 7). —a) D7 G1 क्रांते (for क्रान्ते). K2 Da3 विष्णुर्बलैः ; Da4 Dn4 M5 विष्णुबले (Da4 °लैः). —b) K1 कौष्ठे ; K2. 4 V1 Ds2 काष्ठे (for कोष्ठे). K6 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 भोक्तुम् ; B8 (marg.) भुजम् ; D7 T1 G1. 6 भुक्तिम् (for भुक्तम्). K4. 6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5–8 T1 G1. 6 M1 इच्छति (Dn4 °सि) ; B8 (marg.) T2 M5–7 ऋच्छति (for अर्छति). —c) Dn1 M5. 7 च (for प्र-). Ś1 K1. 2. 4 Dn1 Ds D2. 3. 8 श्रोत्रं (for श्रोत्रे). K7 D4. 9 कर्णमूले दिशः श्रोत्रे. —d) K7 D4. 9 च (for वाक्). Ds1 शरीरिणी (for सरस्वती).

9 a) D5 दशैतानि ; D7 T G1. 3. 6 M1. 5. 6 दश तानि (for दर्शनानि). K6 B0. 6 (marg.). 7. 8 (marg.) Da3 a4 Dn1. n4 Ds D2. 3. 8 दर्शनीयेंद्रियोक्तानि. —d) K1 आवार- ; D7 T G1. 3. 6 आहार्य- (for आहार-).

10 a) K1. 4. 7 T1 शब्दस्पर्शं ; K6 B0. 6. 7. 8 (marg. as in text) Da3 Dn1. n4 Ds D2. 3. 5. 8 शब्दः स्पर्शस् ; B9 Da4 शब्दस्पर्शस् ; M1. 5–7 शब्दः स्पर्शं (for शब्दं स्पर्शं). —b) K4. 6 B0. 6. 7. 8 (marg. as in text). 9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 M7 रसो गंधश्च पंचमः (K4 °मं). —c) V1 B0. 6–8 Dn1. n4 Ds D2. 3. 8 इंद्रियार्थान् (V1 °र्थे) (for °याणि). K6 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 विद्याद् ; K7 D4. 6. 9 चार्थान् ; D7 T G1. 3. 6 M1. 5–7 स्वार्थान् (for त्वर्थान्). —d) K6 V1 B6. 7 Da3 D7 T G1. 3. 6 M1. 5–7 मनसा (for °सो). B0. 8. 9 Dn1. n4 Ds D2. 3. 5. 8 इंद्रियेभ्यस्तु (B9 °श्च) नित्यदा ; Da4 मनसादर्शयत्पुनः.

11 a) K1 Da4 Dn4 युक्ते. —b) B6. 8 वश्मीन् (for वश्यान्). Da3. a4 D7 यंते च (for यन्तेव). —c) K4. 6 Da4 Dn4 सदा युक्ते ; B7 समायुंक्ते. —d) M1 भूतानां (for °त्मा). Ś1 K1. 2 हृदयस्थितः ; K4 °यसंस्थितः (hypermetric) ; D7 T1 G1. 3. 6 °ये स्थितः (for °याश्रितः).

12 a) K4. 6 B9 Da3 Dn1. n4 Ds1 D2. 3 तथैवैषां ;

C. 12. 8745
B. 12. 240(39). 12
K. 12. 245. 12

नियमे च विसर्गे च भूतात्मा मनसस्तथा ॥ १२
इन्द्रियाणीन्द्रियार्थाश्च स्वभावश्चेतना मनः ।
प्राणापानौ च जीवश्च नित्यं देहेषु देहिनाम् ॥ १३
आश्रयो नास्ति सत्त्वस्य गुणशब्दो न चेतना ।
सत्त्वं हि तेजः सृजति न गुणान्वै कदाचन ॥ १४
एवं सप्तदशं देहे वृतं षोडशभिर्गुणैः ।
मनीषी मनसा विप्रः पश्यत्यात्मानमात्मनि ॥ १५
न ह्ययं चक्षुषा दृश्यो न च सर्वैरपीन्द्रियैः ।
मनसा संप्रदीप्तेन महानात्मा प्रकाशते ॥ १६
अशब्दस्पर्शरूपं तदरसागन्धमव्ययम् ।
अशरीरं शरीरे स्वे निरीक्षेत निरिन्द्रियम् ॥ १७
अव्यक्तं व्यक्तदेहेषु मर्त्येष्वमरमाश्रितम् ।
योऽनुपश्यति स प्रेत्य कल्पते ब्रह्मभूयसे ॥ १८
विद्याभिजनसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १९
स हि सर्वेषु भूतेषु जङ्गमेषु ध्रुवेषु च ।

K7 V1 D4. 6. 9 M5 य(V1 अ)थैतेषां; D7 T G1. 3. 6 यथा तेषां; M1. 6 तथैतेषां; M7 तथा तेषां (for तथैवेषां). — b) B8 (marg. as in text) ईश्वरो. — Ś1 K1. 2. 4 om. (hapl.) 12^{c}–13^{b}. — d) Da3 Dn1. n4 D2. 8 मानसस् (for म°). D5 तदा (for तथा). ❀ Ca : भूतात्मा अहंकारः ॥ Cn : बुद्ध्युपाधिर्जीवः । ❀

13 Ś1 K1. 2. 4 om. 13^{ab} (cf. v. l. 12). D4 reads 13 twice. — c) D6 om. from जीव up to देहेषु (in 13^{d}). K6 जीवस्तु; K7 D4 (both times). 6. 9 देही च; Da3. a4 जीवस्य (for °श्च). — d) M7 नित्य- (for नित्यं). M1. 6. 7 भूतानि (for देहेषु).

14 a) K6 आश्रमो; T2 G1 (before corr.) आश्रये (for °यो). D4 M1. 5. 6 नाति- (for नास्ति). Ś1 K1. 2. 4 शब्दस्य; T1 देहस्य; G1 तत्त्वस्य (for सत्त्वस्य). ❀ Ca : आश्रयः उपादानकारणम् । सत्त्वस्य आत्मनः ॥ Cn : सत्त्वस्य बुद्धेराश्रयः प्रागुक्तो देहः ॥ Cv : सत्त्वस्य प्राणिसमूहस्य । ❀ — b) K4 Da4 गुणशब्दे; B7–9 Dn1. n4 D3 D2. 8 Cs : गुणाः शब्दो (D8 °ब्दे); D8 गुणः शब्दो (for गुणशब्दो). K6 Bo Da3. a4 चेतनः (for °ना). D7 T G1. 3. 6 M1. 5–7 गुणः सत्त्वस्य चेतना. ❀ Ca : गुणत्वेन कार्यत्वादिना शब्द्यत इति गुणशब्दो बुद्ध्यादिर्विषयान्तः । ❀ — c) Dn4 सत्त्वे (for सत्त्वं). M7 चेतः (for तेजः). ❀ Ca : सत्त्वमात्मा तेजो बुद्धिं सृजति ॥ Cn : तेजः वासना सत्त्वं सृजति, न तु गुणान् ॥ Cs : तेजः दर्शनस्पर्शनादिसामर्थ्यम् । ❀ — d) K4 [अ]गुणान्; Cap गुणाः (for गुणान्). K7 V1 Bo. 6. 8 Dn1. n4 D2–6. 8. 9 कथंचन (for कदा°).

15 a) Dn4 सप्तदशे. V1 B6. 7. 8 (marg. as in text). 9 Da3 D7 T G1. 3. 6 देहं; Da4 स्नेहं (for देहे). — b) K6 घृतं; K7 Da4 D4. 9 वृत्तं (for वृतं). ❀ Ca : सप्तदशमात्मानं षोडशभिर्विकारैर्भूतैरेकादशेन्द्रियैः ॥ Cn : सप्तदशं चिदात्मानं, षोडशभिः पञ्चेन्द्रियाणि पञ्चेन्द्रियार्थाः स्वभावादयश्च षट् तैः ॥ Cs : षोडशभिः एकादशेन्द्रियपञ्चमहाभूतैः । ❀ — c) D5 मनीषा (for षी°). K7 विप्र; D5 व्यग्रः. — d) Ś1 K1. 2 Bo D5 Cp (gloss : स्वरूपेण) आत्मना (for °नि).

16 a) Da3. a4 चक्षुषो; T2 °षां. K1 दृश्येन्; M5 ग्राह्यो (for दृश्यो). — b) D8 हि (for च). — c) K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 D3 D2–6. 8. 9 मनसा तु प्रदीपेन; D7 T G1. 3. 6 M1. 5–7 °सा दीपभूतेन. — d) Da4 महात्मा न (for °नात्मा).

17 With 17, cf. Kaṭha Up. 1. 3. 15; 2. 22. — a) Ś1 K1. 2 -रूपस्पर्शं (for -स्पर्शरूपं). D7 च; T G1. 3. 6 M1. 6. 7 तम् (for तद्). — b) D7 मनसा गंधमव्ययं. — c) B8 (marg.) अशरीरी (for °रीरं). K2. 4. 6 V1 Bo. 7. 8 (marg. as in text) Dn1. n4 D3 D2. 3. 7. 8 T G1. 3. 6 M5 शरीरेषु; K7 D4–6. 9 °रस्थं; B6. 9 °रे स्वं (for °रे स्वे). — d) K6. 7 Dn1 D8 T1 M1 निरींद्रियं (M1 °यः); M6. 7 निरिंद्रियः.

18 a) K6. 7 Bo. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 D3 D2–9 T G1. 3. 6 M1. 5–7 सर्व- (for व्यक्त-). T1 G3. 6 -देवेषु; M5 -भूतेषु (for -देहेषु). — b) B8 (marg.) सत्त्वेषु (for मर्त्येषु). K1. 4. 6. 7 Bo. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 D3 D2–6. 8. 9 परम्; K2 अपरम्; D7 T G1. 3. 6 M7 अमृतम् (for अमरम्). D7 T G1. 3. 6 आहितं (for आश्रितम्). V1 मर्त्येषु शरणाश्रितं. — c) Da4 यो न. Da4 D5 M6 सं- (for स). — d) Ś1 K1. 2 D5 -भूतये; Da3 -भूयते (for -भूयसे).

19 = (var.) 6. 27. 18. — a) K7 D4. 6. 7. 9 T G1. 3. 6 M5 (*inf. lin.* as in text) विद्याविनयसंपन्ने; Da2 D3. 5 °विजनसंपन्ने. — d) ❀ Cv : समदर्शिनः समं नारायणं पश्यतीति समदर्शिनः । ❀ — After 19, K7 reads 22^{a} followed by 20^{d}–21^{d} for the first time, repeating the same in the proper place.

20 For the repetition in K7, cf. v. l. 19. K7

वसत्येको महानात्मा येन सर्वमिदं ततम् ॥ २०
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
यदा पश्यति भूतात्मा ब्रह्म संपद्यते तदा ॥ २१
यावानात्मनि वेदात्मा तावानात्मा परात्मनि ।
य एवं सततं वेद सोऽमृतत्वाय कल्पते ॥ २२
सर्वभूतात्मभूतस्य सर्वभूतहितस्य च ।
देवापि मार्गे मुह्यन्ति अपदस्य पदैषिणः ॥ २३
शकुनीनामिवाकाशे जले वारिचरस्य वा ।
यथा गतिर्न दृश्येत तथैव सुमहात्मनः ॥ २४
कालः पचति भूतानि सर्वाण्येवात्मनात्मनि ।
यस्मिंस्तु पच्यते कालस्तं न वेदेह कश्चन ॥ २५
न तदूर्ध्वं न तिर्यक्च नाधो न च तिरः पुनः ।
न मध्ये प्रतिगृह्णीते नैव कश्चित्कुतश्चन ॥ २६
सर्वेऽन्तःस्था इमे लोका बाह्यमेषां न किंचन ।
यः सहस्रं समागच्छेद्यथा बाणो गुणच्युतः ॥ २७
नैवान्तं कारणस्येयाद्यद्यपि स्यान्मनोजवः ।
तस्मात्सूक्ष्मात्सूक्ष्मतरं नास्ति स्थूलतरं ततः ॥ २८
सर्वतःपाणिपादान्तं सर्वतोक्षिशिरोमुखम् ।

C. 12. 8762
B. 12. 240(38). 28
K. 12. 245. 30

reads 20 on marg. — a) D7 T1 G1.3.6 च (for हि). D2 om. भूतेषु. — c) D7 T1 G1.3.6 महात्मा तु (for °नात्मा). — d) G1 ततः (for ततम्).

21 With 21, cf. 6. 28. 29. For the repetition in K7, cf. v. l. 19. — a) Dn4 -भूते हि (for -भूतेषु). — Ś1 K1.2.4 om. (hapl.) 21^{c}–22^{b}.

22 Ś1 K1.2.4 om. 22^{ab} (cf. v. l. 21). — a) D7 T G1.3.6 M1.6.7 मे ह्यात्मा (for वेदात्मा). ❀ Cs: वेदात्मा वेदपुरुषः । आत्मा जीवात्मा । परमात्मनीति विवेकः स्यादिति योग्यपदाध्याहारः । यावद्यावद्वेदाभ्यासो भवति तावत्तावदात्मविवेकबुद्धिर्भवतीति भावः । ❀ — c) K6 D4 एव (for एवं). — d) K6 यो (for सो).

23 With 23, cf. B. 12. 262. 32; 269. 22: B. 13. 113. 7. Quoted in Br. Sūtra. Bhāṣya under iv. 2. 14. — a) D3 -भूतात्मा; D4 lacuna. — b) Bom. ed. विभोर् (for सर्व-). D4 वा (for च). — c) Ś1 K1.2 M1.6.7 (*sup. lin.* as in text) च; G1 वि- (for [अ]पि). T2 मुह्यंते. V1 देवा अपि विमुह्यंति. — d) Ś1 K1.2 चापदस्य; K4 ह्यापा°; M1.5.6 ह्यप° (for अप°). ❀ Cs: अपदस्य पदन्यासरहितस्य, पदन्यासलक्षणरहिते ब्रह्मणि वर्तमानस्य, मार्गागम्ये परमात्मनि पदैषिणः पदन्यासं कर्तुमिच्छन्तः ॥ Cv: अपदस्य, पद्यते ज्ञायते अनेनेति पदं प्राकृतदेहः तद्रहितस्य । ❀

24 With 24, cf. 12. 174. 19; B. 12. 323[2]. 19. — a) K6 V1 Bo.6–9 Da3.a4 Dn1.n4 D8 D2.3.8 श(Dn4 स)कुंतानाम्; K7 D4–6.9 शकुनानाम् (for °नीनाम्). — b) K7 D4–6.9 T G1.3.6 च (for वा). K6 V1 Bo.6–9 Da3.a4 Dn1.n4 D8 D2.3.8 मत्स्यानामिव चोदके. — c) K7 तथा (for यथा). V1 दृश्यंते (for दृश्येत). — d) D5 [अ]स्य (for सु-). K6 V1 Bo.6–9 Da3.a4 Dn1.n4 D8 D2.3.8 तथा ज्ञानविदां गतिः.

25 a) ❀ Cn: कालः उक्तरूपो जीवः । ❀ — c) K1.2.4 पश्यते (for पच्यते). — d) Dn4 ते (for तं). K6 Bo.6.7.9 Da3.a4 Dn1.n4 D8 D2.3.5.8 transp. न and वेदेह. Da4 कश्च नः.

26 D5 om. (hapl.) 26^{a}–27^{b}. — a) D7 T G1.3.6 M5 नात; M1.6.7 न चैव (for न तद्). — b) K6 Bo.6.7.8 (marg.).9 Da3.a4 Dn1.n4 D8 D2.3.8 पुनः; B6 (marg.) पुरः (for तिरः). K7 D4.9 तु नः (for पुनः). D6 नाधस्ताच्चापि पार्श्वतः; D7 T G1.3.6 M5.7 नाधश्चरति वा पु(M7 यत्पु)नः; M1.6 नाधस्ताच्च कुतश्चन. — After 26^{ab}, M1.6.7 ins.:

681* इन्द्रियैरपि बुद्ध्या वा गृह्यते न कदाचन ।

— c) D4.6.9 परि- (for प्रति-). K2 -गृह्णेत; K7 Da3 D4.6.9 -गृह्णीत (K7 °ता); D7 T G1.3.6 M1.5–7 -गृह्णाति (for -गृह्णीते). — d) K6 B6 Da3.a4 नैवं; D7 T1 G1.3.6 न तु (for नैव). K6 Bo.6–9 Da3 Dn1.n4 D8 D2.3.8 किंचित्; Da4 किं स्वित् (for कश्चित्). Da4 कुतश्च नः.

27 D5 om. 27^{ab} (cf. v. l. 26). — a) D7 सर्वेतर्था. Da4 हीमे (for इमे). — c) K6.7 V1 Bo.6.8 (marg.).9 Dn1.n4 D2.3.5.8 यद्यजस्रं (for यः सहस्रं). — d) Dn1 बाणोर्. K2 Da3 T G1.3.6 गुणाच्च्युतः; Da4 गुणोच्युतः (for गुण°).

28 a) D5 [ए]ष (for [इ]याद्). — b) B7.8 (marg. as in text) यद्यदि; D7 T1 G1.3.6 यदि च (for यद्यपि). Da1 मनोजवाः. — c) K2.6.7 D4.6.7.9 T G1.3.6 M1.5–7 तस्मात्सूक्ष्मतरं नास्ति. — d) K2 सूक्ष्मात् (for नास्ति). D7 T1 G1.3.6 स्थूलतमं (for °तरं). K6 यथा; B8.9 Da4 तथा; G1 तमः (for ततः).

C. 12. 8762
B. 12. 240(39). 29
K. 12. 245. 29

सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ २९
तदेवाणोरणुतरं तन्महद्भ्यो महत्तरम् ।
तदन्तः सर्वभूतानां ध्रुवं तिष्ठन्न दृश्यते ॥ ३०
अक्षरं च क्षरं चैव द्वैधीभावोऽयमात्मनः ।
क्षरः सर्वेषु भूतेषु दिव्यं ह्यमृतमक्षरम् ॥ ३१
नवद्वारं पुरं गत्वा हंसो हि नियतो वशी ।
ईशः सर्वस्य भूतस्य स्थावरस्य चरस्य च ॥ ३२
हानिभङ्गविकल्पानां नवानां संश्रयेण च ।
शरीराणामजस्याहुर्हंसत्वं पारदर्शिनः ॥ ३३
हंसोक्तं चाक्षरं चैव कूटस्थं यत्तदक्षरम् ।
तद्विद्वानक्षरं प्राप्य जहाति प्राणजन्मनी ॥ ३४

इति श्रीमहाभारते शान्तिपर्वणि एकत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३१ ॥

---

29 = (var.) 6. 35. 13. —a) Da4 Dn1 ·पादं तं ; D7 T G1. 3. 6 M1. 5–7 ·पादं तत् (for ·पादान्तं). ❀ Cs : सर्वत इति सार्वविभक्तिकस्तसिः सर्वेषां पाणयः पादाश्च यस्य । ❀ —c) D8 लोकं (for लोके).

30 a) K6 अण्वतरं ; K7 (also as in text) Ds1 अनुतरं. —b) D7 T G1. 3. 6 महद्भ्यश्च महत्तरं. —c) Da4 तदांतः. —d) T2 ध्रुवस् (for ध्रुवं). Ś1 K1. 2. 4 सर्वं (for तिष्ठन्). G1 दृश्य च (for दृश्यते).

31 a) D5 चाक्षरं (for च क्षरं). D7 T G1. 3. 6 अक्षरश्च क्षरश्चैव. —b) Da4 द्वैधि· (for द्वैधी·). —c) Ś1 K1. 2 M5 क्षरं (for क्षरः). —d) D7 T G1. 3. 6 M5 दिवि (for दिव्यं). K6 V1 Bo. 6–9 Da3. a4 Dn1 Ds D3. 6. 8 त्वमृतम् ; K7 Dn4 D2. 4. 9 तमृतम् (for ह्यमृ°). Ś1 K1. 2. 4 अव्ययं ; K7 D4. 6. 9 अक्षयं (for °रम्). D5 दिव्यं त्वक्षरमव्ययं.

32 a) Ds1 om. (hapl.) रं पु. — V1 reads 32b–34c on marg. —b) K7 D8 D4–6. 9 T M5. 6 Cs वि· ; D7 G1. 3. 6 M1. 7 [ऽ]पि (for हि). D4 नियता ; M7 नयते (for नियतो). ❀ Cs : विनियतो बद्धः । ❀ —c) Da3 om. सर्वं. K7 D4–6. 9 य ईशः सर्वभूतस्य ; V1 Bo. 8 (marg.) Dn4 D7 T1 G1. 3. 6 M7 ईश्वरः (B8 ईदृशः) सर्वभूतस्य.

33 V1 reads 33 on marg. —a) K7 D9 ही (D9 हा)नानांग· ; Bo. 8 (marg. as in text) D4. 6 हानेनांग· ; B7 हानिभंग· ; T2 एतेनांग· (for हानिभङ्ग·). D7 T1 G1. 3. 6 M1. 5–7 भावे (M1. 5–7 हाने) न ग (M5 ह) त· कालानां ; Cs पातेनाजं विकल्पानां. —b) Da4 नराणां (for नवानां). K4. 6 B6–9 Dn1. n4 Ds D3. 5. 7. 8 T G1. 3. 6 M1. 5–7 संचयेन ; V1 Bo संश्रयेन (for °येण). —d) Ś1 K1 M6 पर· ; Dn4 पाद· (for पार·).

34 V1 reads 34abc on marg. —a) K6 Da3 हंसोक्ते (for °क्तं). Bo. 7–9 Da4 Dn4 D3 M7 च क्षरं ; Da3 त्वक्षरं ; D7 T G1. 3. 6 M1. 5. 6 Cs यत्क्षरं (for चाक्षरं). —b) D9 कूटकं (for °स्थं). B8 (marg.) कूटस्थत्वात्तदक्षरं. —c) K4 प्राप्तो ; B8 (marg.) ब्रह्म (for प्राप्य). —d) Ś1 K1. 2. 4 मृत· (for प्राण·). K6 ·कर्मणी ; B7 ·जन्मनां ; Da4 Dn4 Ds1 ·जन्मनि (for °नी). D7 T G1. 3. 6 M1. 5–7 जह्यान्मरणजन्मनी (D7 T1 G1 °नि). — After 34, D7 T G1. 3. 6 M1. 5–7 read 12. 232. 2cdef for the first time, repeating the same in the proper place.

Colophon: G2 missing; K3. 5 B1–5 Da1. a2 Dn2. n3 D1 G4. 5 M2–4 absent. — *Sub-parvan :* Ś1 K1. 2. 4 6. 7 V1 Bo. 6. 8. 9 Da3. a4 Dn1. n4 Ds D2–9 T G1. 3. 6 M1. 5–7 मोक्षधर्म. — *Adhy. name :* Ś1 K1. 2. 4 शुकप्रश्नः ; K6. 7 V1 Bo. 8. 9 Da3. a4 Dn1. n4 Ds1 D2–6. 8. 9 M5 शुकानुप्रश्नः ; M1. 6 ब्रह्माभिगमनाभ्युपायनं (M6 °पायं) ; M7 ब्रह्माधिगमाद्युपायकथनं. — *Adhy. no.* (figures, words or both) : K6 D8 M1. 6. 7 64 ; K7 8 ; Dn1 D7 T1 G1. 3. 6 M5 66 ; Dn4 Ds2 65 ; D8 61 ; T2 80. — *Śloka no.:* Dn1 34 ; Dn4 D8 33,

२३२

व्यास उवाच ।
पृच्छतस्तव सत्पुत्र यथावदिह तत्त्वतः ।
सांख्यन्यायेन संयुक्तं यदेतत्कीर्तितं मया ॥ १
योगकृत्यं तु ते कृत्स्नं वर्तयिष्यामि तच्छृणु ।
एकत्वं बुद्धिमनसोरिन्द्रियाणां च सर्वशः ।
आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम् ॥ २
तदेतदुपशान्तेन दान्तेनाध्यात्मशीलिना ।
आत्मारामेण बुद्धेन बोद्धव्यं शुचिकर्मणा ॥ ३
योगदोषान्समुच्छिद्य पञ्च यान्कवयो विदुः ।
कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम् ॥ ४
क्रोधं शमेन जयति कामं संकल्पवर्जनात् ।
सत्त्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति ॥ ५
धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा ।
चक्षुः श्रोत्रे च मनसा मनो वाचं च कर्मणा ॥ ६
अप्रमादाद्भयं जह्याल्लोभं प्राज्ञोपसेवनात् ।
एवमेतान्योगदोषाञ्जयेन्नित्यमतन्द्रितः ॥ ७
अग्नींश्च ब्राह्मणांश्चार्चेद्देवताः प्रणमेत च ।
वर्जयेद्दुषितां वाचं हिंसायुक्तां मनोनुगाम् ॥ ८

C. 12. 8776
B. 12. 241(40). 9
K. 12. 246. 9

232

☞ This adhy. is missing in G2 (cf. v. l. 12. 222. 19). — With this adhy., cf. Brahmapurāṇa (Ānandāshram) 235. 36–68.

1 a) K1, 2, 4 मत्पुत्र (for सत्पुत्र). — b) Ds2 D3, 5, 7 सत्त्वतः; T2 तत्परं (for तत्त्वतः). — c) K4 G1 सांख्यं (for सांख्य-). K6 B0, 6–9 Da3, a4 Dn1, n4 Ds D2, 3, 8 -ज्ञानेन (for -न्यायेन). Ś1 K1, 2 M5 युक्तं यत्; K7 D4, 6, 9 युक्तं च (for संयुक्तं). — d) Ś1 K1, 2 V1 B9 D5 M5 तदेतद् (for यदे°).

2 a) Da4 -कृतं (for -कृत्यं). K6 च; D4 नु (for तु). D7 G1, 3, 6 तत्; T1 यत् (for ते). — b) K1, 2, 4, 6 D5 वर्णयिष्यामि; M5 कीर्त° (for वर्त°). — D7 T G1, 3, 6 M1, 5–7 read 2cdef for the first time after 12. 231. 34. — c) K6 एकस्त्वं (for °त्वं). K1 -मानसोर् (for -म°). ❀ Cn: एकत्वं बुद्धिमात्रेणावस्थानम्, बुद्धिवृत्तिनिरोध इति यावत् । ❀ — e) K2 ध्यायनस्; K6 V1 B0, 6–9 Da3, a4 Dn1, n4 Ds D2, 3, 5, 8 व्यापिनस्; D7 T1 G1, 3 (all second time) व्यधि°; D7 T1 (both first time). 2 (both times) G1, 3 (both first time). 6 (both times) M1 (second time). 5–7 (all both times) [S]व्ययि°; M1 (first time) [S]प्ययिनस् (for ध्यायि°). — f) T2 ज्ञानमेव तदुत्तमं.

3 b) Dn4 -शालिना (for -शी°). T2 दांतेनाध्यात्मनि स्थितं. ❀ Cs: अध्यात्मशीलिना देहात्मविवेकतत्परेण । ❀ — c) D5 D7 T G1, 3, 6 M1, 5–7 शुद्धेन (for बु°). ❀ Cn: बुद्धेन अविचलता तत्त्वज्ञानात् । ❀ — d) K7 श्रुति-; D7 T1 G1, 3, 6 शुद्ध- (for शुचि-).

4 a) K2 समुच्छ्रित्य; K7 D4, 9 °त्सृज्य; D7 T G1, 3, 6 M7 समुच्छिद्यात् (for °च्छिद्य). — 4b is damaged in B7. — b) D7 T1 G1 पंचधा (for पञ्च यान्). — c) B0 Da4 काम- (for कामं). — d) D6 om. (hapl.) from पञ्चमम् up to पादं च (in 6b).

5 D6 om. 5 (cf. v. l. 4). — a) K7 D4, 9 दमेन (for शमेन). — c) K6 सत्य-; Da4 G3 सत्त्वं (for सत्त्व-). ❀ Cn: सत्त्वसंसेवनात् सत्त्वेन बुद्ध्या संसेवनं परिशीलनमर्थानां तेन । ❀ — After 5, D7 T G1, 3, 6 M5 read 7.

6 D6 om. up to पादं च (cf. v. l. 4). — a) V1 रक्ष्येत्. — b) Da4 -पादस्य; T2 -पादौ च; M1, 6 -पादश्च (for -पादं च). — c) D7 T1 G1, 3, 6 श्रोत्रं (for श्रोत्रे). — d) M1, 6 वाचश्च (for वाचं). D5 बुद्धिमान्; D7 T G1, 3, 6 M1, 5–7 विद्यया (for कर्मणा). D4, 6, 8, 9 मनोबुद्धिसमाधिना. ❀ Cn: कर्मणा यज्ञादिना । ❀

7 D7 T G1, 3, 6 M5 read 7 after 5. — a) K1 अप्रसादाद् (for अप्रमा°). — b) Ś1 K1, 2, 4, 6 V1 B0, 6–9 Da3, a4 Dn1, n4 Ds D2, 3, 5, 8 दंभं; D6 दम्भं (for लोभं). D7 T1 G1, 3, 6 M1 प्रज्ञोप- (for प्राज्ञोप-).

8 = (var.) 12. 227. 9. — a) Ś1 K1, 2 Da4 D5 अग्निं च (for अग्नींश्च). D5, 7 T G1, 3, 6 अर्चेद् (for चा°). — b) Da4 M1, 6 प्रणमेन (for °मेत). G3, 6

C. 12. 8776
B. 12. 241[40]. 9
K. 12. 245. 9

ब्रह्म तेजोमयं शुक्रं यस्य सर्वमिदं रसः ।
एकस्य भूतं भूतस्य द्वयं स्थावरजङ्गमम् ॥ ९
ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा ।
शौचमाहारसंशुद्धिरिन्द्रियाणां च निग्रहः ॥ १०
एतैर्विवर्धते तेजः पाप्मानं चापकर्षति ।
सिध्यन्ति चास्य सर्वार्था विज्ञानं च प्रवर्तते ॥ ११
समः सर्वेषु भूतेषु लब्धालब्धेन वर्तयन् ।
धुतपाप्मा तु तेजस्वी लघ्वाहारो जितेन्द्रियः ।
कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदम् ॥ १२
मनसश्चेन्द्रियाणां च कृत्वैकाग्र्यं समाहितः ।
प्राग्रात्रापररात्रेषु धारयेन्मन आत्मना ॥ १३
जन्तोः पञ्चेन्द्रियस्यास्य यदेकं छिद्रमिन्द्रियम् ।
ततोऽस्य स्रवति प्रज्ञा दृतेः पादादिवोदकम् ॥ १४
मनस्तु पूर्वमादद्यात्कुमीनानिव मत्स्यहा ।

वा (for च). — c) K2 रुपितां; K6 V1 Bo. 6. 8 (marg. as in text). 9 Da3. a4 Ds1 D5 Cp (gloss: दाहिकां, परोपतापिनीं) उषतीं; K7 Ds2 D3. 4. 7. 9 T G1. 3. 6 M1. 5–7 रुशतीं; B7 Dn4 उशतां; Dn1 D2. 8 Ca (Cap कृषतीं) Cn (gloss: कामप्रधानां, विटगोष्ठीरित्यर्थः) उशतीं; D6 असतीं (for रुषितां). — d) Da4 D5 हिंसायुक्तं; Ds1 °युक्तो; D4. 9 °युक्ता (for °युक्तां). K6 मनोनुगः; K7 D4. 6. 9 मनस्तुदां; Bo. 8 Dn1. n4 Ds2 D2. 3. 8 Cn (gloss: मनोभङ्गकारिणीं) मनोनुदां; D5 मनस्तथा; G1 मनोयुग्मं; M1. 6. 7 अनर्थिकां (for मनोनुगाम्).

9 a) D7 T1 G1. 3. 6 M1. 6. 7 शुक्लं (for शुक्रं). — b) D7 T G1. 3. 6 यस्मिन् (for यस्य). D5 T2 (sup. lin.) M1. 7 रसं; D7 T2 (orig.) G3. 6 ततं; G1 ततः (for रसः). — c) V1 B6. 8 (marg.) Da3 Dn1. n4 Ds D2. 3. 5–8 एतस्य (for एकस्य). K6. 7 D4. 9 नूनं; T1 सर्व-; M1. 5. 6 भूत- (for भूतं). Dn1 D2 भव्यस्य (for भूतस्य). ❀ Ca: भूतं सत्यं न तु विवर्तवादिनामिवासत्यम् । भूतस्य सिद्धस्याकल्पितस्य । ❀ — d) K4. 6 B6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 दृष्टं (for द्वयं).

10 a) Ś1 K1. 2 दानम् (for ध्यानम्). Ś1 K1 ध्यानं; D6 lacuna (for दानं). — b) Da4 सद्भक्तिर् (for सत्यं ह्रीर्). — c) K6 Bo. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 Ds D2. 3. 8 आचार- (for आहार-). Ś1 K1. 2. 4 D8 (marg. as in text). 6 -संसिद्धिर् (for -संशुद्धिर्). — d) K6 संग्रहः; Dn1 वि° (for नि°).

11 11^{ab} = (var.) 12. 227. 7^{cd}. — a) K7 D4. 9 विवर्धयंस् (for °र्धते). D4 om. from तेजः up to वर्तयन् (in 12^{b}). — b) D7 पापानां (for पाप्मानं). D5 घाति- (for चाप-). — K7 M1. 6. 7 om. 11^{cd}. — c) Bo सर्वात्मा (for °र्था). — d) G1 प्रज्ञानं (for वि°). B8 (marg.) प्रवर्धते; D7 T G1. 3. 6 प्रकाशते (for प्रवर्तते). ❀ Ca: विज्ञानं साक्षात्कारलक्षणम् । ❀

12 D4 om. 12^{ab} (cf. v. l. 11). — a) D5 स्थितः (for समः). — b) K6. 7 D6. 9 यथालब्धेन (for लब्धाल°). K2 M1. 7 वर्धय(M1 °ये)त्; K6 Bo Dn4 Ds D7 T G1. 3. 6 M5. 6 वर्तयेत् (for °यन्). — c) V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 6. 8 T G1. 3. 6 M1. 5–7 धूतपाप्मा; D7 घृत° (for धुत°). Ds1 lacuna; Ds2 T2 च (for तु). — d) G1 M1 लब्धाहारो (for लघ्वा°). D4 यतेंद्रियः (for जितेन्द्रियः). — D7 G1 om. 12^{e}–13^{d}; G3 om. (? hapl.) 12^{e}–14^{b}. Ds1 reads 12^{e}–13^{b} on marg. — e) K1. 2 Da4 D4 कामक्रोधो (K1 °धा) (for °क्रोधौ). — f) ❀ Ca: निनीषेत्, निदिध्यासनेनेच्छेत् ॥ Cn: निनीषेद् वशीकर्तुमिच्छेत् । Cs: निनीषेद् आत्मानमिति शेषः । ❀

13 13^{ab} = (var.) B. 12. 251[50]. 4^{ab}. D7 G1. 3 om. 13 (cf. v. l. 12). Ds1 reads 13^{ab} on marg. — b) K2 Da4 D5 T2 कृत्वैकाग्रं (for °ग्र्यं). K7 समाहितं. — c) K6. 7 V1 Bo. 6–9 Dn1. n4 Ds D2–6. 8. 9 Cp पूर्वरात्रापरार्धे (K7 D4. 9 °त्रे) च; Da3. a4 प्राग्रात्रेपररात्रे च; T पूर्वरात्रेपरात्रे च; G6 M1. 5. 7 पूर्वरात्रेपररात्रे च; M6 पूर्वरात्रेपरारात्रे; Cpp प्राग्रात्रापररात्रे च. Ca cites प्राग्रात्रेर्. — d) Ś1 K1. 2. 4 Bo धारयन् (for °येन्). Ś1 K1. 2. 4 आत्मवान्; K6. 7 V1 Bo. 8 Dn1. n4 Ds D2–6. 8. 9 G5 आत्मनि (G6 °नः) (for °ना).

14 = (var.) 5. 33. 65; (var.) Manu. 2. 99. G3 om. 14^{ab} (cf. v. l. 12). T1 reads 14^{ab} twice. — a) D7 T1 (second time) G1. 6 ततः (for जन्तोः). — b) B6 यद्येकं (for यदेकं). K4 इंद्रियः. ❀ Ca: छिद्रं विषयासङ्गि । ❀ — c) K4 [s]सि (for ऽस्य). K6. 7 D6 श्रवति (K6 °ते); V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 M1. 6. 7 स्रवते (for °ति). — d) D5 गिरेः; D7 T1 G3. 6 द्रुतेः; G1 सृतेः (for दृतेः). K2. 4 पात्राद् (for पादाद्). K6 इवोधकं (sic). ❀ Cn: दृतेः चर्मकोशस्य । ❀

15 a) Ś1 K1. 2. 4 विषयान् (for मनस्तु). K7 D4–6. 9 तत् (for तु). D5 सर्वम् (for पूर्वम्). — b)

ततः श्रोत्रं ततश्चक्षुर्जिह्वां घ्राणं च योगवित् ॥ १५
तत एतानि संयम्य मनसि स्थापयेद्यतिः ।
तथैवापोह्य संकल्पान्मनो ह्यात्मनि धारयेत् ॥ १६
पञ्च ज्ञानेन संधाय मनसि स्थापयेद्यतिः ।
यदैतान्यवतिष्ठन्ते मनःषष्ठानि चात्मनि ।
प्रसीदन्ति च संस्थाय तदा ब्रह्म प्रकाशते ॥ १७
विधूम इव दीप्तार्चिरादित्य इव दीप्तिमान् ।
वैद्युतोऽग्निरिवाकाशे पश्यत्यात्मानमात्मना ।
सर्वं च तत्र सर्वत्र व्यापकत्वाच्च दृश्यते ॥ १८
तं पश्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः ।
धृतिमन्तो महाप्राज्ञाः सर्वभूतहिते रताः ॥ १९
एवं परिमितं कालमाचरन्संशितव्रतः ।
आसीनो हि रहस्येको गच्छेदक्षरसात्म्यताम् ॥ २०
प्रमोहो भ्रम आवर्तो घ्राणश्रवणदर्शने ।

C. 12. 8790
B. 12. 241[40].23
K. 12. 246. 23

K_6 के मीनम्; V_1 $D_{n1, n4}$ D_s $D_{2, 3, 5, 8}$ T_2 $M_{1, 5-7}$ $C_{n, s}$ कुमीनम्; $B_{0, 6, 7, 8}$ (marg.). $_9$ कूर्मागाम्; D_7 T_1 $G_{1, 3, 6}$ कुळीरम्; D_9 के मीनान् (for कुमीनान्). ꙮ C_a: कुमीनान् क्षुद्रमत्स्यान् ॥ C_n: कुमीनम् जालदंशक्षमम् ॥ C_p (reading कूमीलान्): कूमीन् लान्ति गृह्णन्तीति कूमीला मत्स्याः । तान्यथा उपायेनैकाचित्ततया बध्नाति । ꙮ — ^{c}) T_2 अत्र; M_7 तत्र (for ततः). D_7 T $G_{1, 3, 6}$ च चक्षुश्च; $M_{1, 5-7}$ त्वचं चक्षुर् (for ततश्चक्षुर्). — ^{d}) D_{a4} M_7 जिह्वा- (for जिह्वां). K_1 प्राणं (for घ्राणं).

16 ^{b}) K_1 नमसि (for मनसि). K_6 ध्यापयेद् (for स्थाप°). $B_{7, 9}$ $D_{a3, a4}$ यदि; D_7 T_1 $G_{1, 3, 6}$ व्रती (for यतिः). ꙮ C_a: मनसि स्थापयेत् विषयविमुखानि कुर्यादित्यर्थः । ꙮ — After 16^{ab}, K_7 reads 17^{cd} for the first time, repeating it in its proper place. K_1 G_6 om. (hapl.) 16^c–17^b. — ^{c}) B_8 (marg. as in text) [आ]योज्य (for [अ]पोह्य). T_2 संकल्पं. — ^{d}) K_6 [ऽ]ध्यात्मनि; $D_{a3, a4}$ आत्मनि; D_5 [ऽ]प्यात्मनि (for ह्यात्मनि). K_7 धारये; M_6 (*sup. lin.* as in text) सारयेत् (for धार°).

17 K_1 G_6 M_5 om. 17^{ab} (for K_1 G_6, cf. v. l. 16). — ^{a}) D_7 T_1 $G_{1, 3}$ तं च; T_2 तत्त्व- (for पञ्च). $M_{1, 6, 7}$ स्थावानि (for ज्ञानेन). $K_{4, 6}$ V_1 $B_{0, 6-9}$ $D_{a3, a4}$ $D_{n1, n4}$ D_s $D_{2, 3, 5, 8}$ पंचेंद्रियाणि संधाय (B_6 m. $_8$ [marg. as in text] °यै). ꙮ C_a (reading पञ्चज्ञानेन): पञ्चविषयनिष्ठेन ज्ञानेन । ꙮ — ^{b}) $Ś_1$ K_2 D_7 T $G_{1, 3}$ मनः सं- (for मनसि). B_9 $D_{a3, a4}$ C_{pp} यदि; D_7 T_1 $G_{1, 3}$ व्रती (for यतिः). — K_7 reads 17^{cd} for the first time after 16^{ab}. — ^{c}) K_7 (both times) $D_{4, 7, 9}$ T $G_{1, 3, 6}$ M_7 यदेतानि; V_1 M_1 तदै°; $D_{a3, a4}$ यदि तानि (for यदैतानि). $D_{4, 5}$ एव- (for अव-). K_1 $D_{n1, n4}$ D_s $D_{2, 3, 5, 8}$ $M_{1, 5-7}$ -तिष्ठंति (for -तिष्ठन्ते). — ^{d}) D_4 वा (for च). K_6 $B_{0, 6-9}$ $D_{a3, a4}$ $D_{n1, n4}$ D_s $D_{2, 3, 8}$ मनःषष्ठान्यथात्मनि. — ^{e}) D_5 प्रसीदति. K_6 B_8 D_{s2} D_8 संस्थाप्य; B_6 (marg. as in text). $_{7, 8}$ (marg.). $_9$ °यां (for °य). ꙮ C_a: संस्थाय सम्यग्रूपेणात्मप्रवणतया स्थित्वा ॥ C_n: संस्थाय नाशं प्राप्य । प्रसीदन्ति संकल्पजं कालुष्यं त्यजन्ति । ꙮ — ^{f}) T_1 $G_{1, 3, 6}$ तथा (for तदा).

18 ^{a}) B_9 दीप्तार्चीर्; $D_{a3, a4}$ D_7 T $G_{1, 3, 6}$ सप्तार्चिर्. — ^{b}) K_4 दीप्तमान्; $D_{5, 7}$ T_1 $G_{1, 3, 6}$ मूर्ति° (for दीप्ति°). — ^{c}) $Ś_1$ $K_{1, 2}$ V_1 B_0 वैद्युताग्निर् (for °तोऽग्निर्). — ^{d}) D_7 $G_{1, 3, 6}$ पश्यंति (for पश्यति). K_7 V_1 $D_{4-7, 9}$ T $G_{1, 3, 6}$ $M_{1, 6, 7}$ आत्मनि (for °ना). K_6 $B_{0, 6-9}$ $D_{a3, a4}$ $D_{n1, n4}$ D_s $D_{2, 3, 8}$ दृश्यतेत्मा तथात्मनि; M_5 दृश्येतात्मा तदात्मनि. — ^{e}) D_{n1} $D_{2, 3, 8}$ सर्वस् (for सर्वं). $K_{6, 7}$ V_1 $B_{0, 6-9}$ $D_{a3, a4}$ D_{n1} D_s $D_{2-4, 6-9}$ T $G_{1, 3, 6}$ $M_{1, 5-7}$ तत्र स; D_5 तत्र च (by transp.). D_{n4} सब्रह्मत्रसमर्वत्र (sic). — ^{f}) T_2 व्यापकत्वं (for व्यापकत्वाच्). D_5 $M_{1, 6, 7}$ न (for च).

19 19^{ab} = B. 12. 251[50]. 7^{cd}. — ^{a}) D_5 ते (for तं). G_1 पश्यंती. — ^{b}) D_{n4} D_s ब्राह्मणाय (for °णा ये). — ^{c}) K_2 महायज्ञाः; K_6 $B_{7, 8}$ D_{n1} $D_{3, 7}$ °प्रज्ञाः; G_3 °प्राज्ञः (for °प्राज्ञाः). — ^{d}) M_7 सर्वभूते (for °भूत-).

20 ^{b}) D_{a4} यच्चरन् (for आचरन्). B_6 संसित-; B_7 D_{n4} D_s $D_{3-5, 9}$ शंसित-; $M_{1, 6}$ संशितः (for °त-). $M_{1, 6}$ सदा (for -व्रतः). — ^{c}) C_a रसस्य (for रहसि). — ^{d}) D_{n4} रक्षेद्; C_a इच्छेद् (for गच्छेद्). $K_{4, 6}$ V_1 $B_{0, 6, 7, 9}$ $D_{a3, a4}$ $D_{n1, n4}$ D_s $D_{2, 3, 5, 6, 8}$ M_1 $C_{n, p}$ (C_{pp} as in text) -साम्यतां; B_6 (marg.). $_8$ D_7 T $G_{1, 3, 6}$ M_5 -सात्मतां (for -सात्म्यताम्). ꙮ C_n (reading साम्यतां): समतां लक्षणभेदाभावं, स्वार्थे ष्यञ् । ꙮ

21 ^{a}) $B_{7, 9}$ आमोहो; D_{a4} D_4 $G_{3, 6}$ प्रमोदो; T_1 G_1 प्रमादो (for प्रमोहो). K_2 भ्रुम (sic); D_{a4} ब्रह्म; D_6 भ्रंश (for भ्रम). D_6 आवर्त- (for °र्तो). ꙮ C_a: आवर्तो वातविकारः । उदरमलादीनामावर्तनं शरीर-

C. 12. 8790
B. 12. 241[40].23
K. 12. 246. 23

अद्भुतानि रसस्पर्शे शीतोष्णे मारुताकृतिः ॥ २१
प्रतिभामुपसर्गांश्चाप्युपसंगृह्य योगतः ।
तांस्तत्त्वविदनादृत्य स्वात्मनैव निवर्तयेत् ॥ २२
कुर्यात्परिचयं योगे त्रैकाल्यं नियतो मुनिः ।
गिरिशृङ्गे तथा चैत्ये वृक्षाग्रेषु च योजयेत् ॥ २३
संनियम्येन्द्रियग्रामं गोष्ठे भाण्डमना इव ।
एकाग्रश्चिन्तयेन्नित्यं योगान्नोद्वेजयेन्मनः ॥ २४
येनोपायेन शक्येत संनियन्तुं चलं मनः ।
तं तं युक्तो निषेवेत न चैव विचलेत्ततः ॥ २५
शून्या गिरिगुहाश्चैव देवतायतनानि च ।
शून्यागाराणि चैकाग्रो निवासार्थमुपक्रमेत् ॥ २६
नाभिष्वजेत्परं वाचा कर्मणा मनसापि वा ।
उपेक्षको यताहारो लब्धालब्धे समो भवेत् ॥ २७
यश्चैनमभिनन्देत यश्चैनमपवादयेत् ।
समस्तयोश्चाप्युभयोर्नाभिध्यायेच्छुभाशुभम् ॥ २८
न प्रहृष्येत लाभेषु नालाभेषु च चिन्तयेत् ।

स्यैव भ्रमणमिव वा ॥ Cp : आवर्तो विषयान्तररसास्वादः । ❀ — b) Ś1 K1. 2. 4 V1 Bo Ds1 M1 घ्राणं; K7 प्राण-; Da4 घ्राणः (for घ्राण-). D5 -दर्शनैः. — c) Ś1 K1. 2 V1 Bo. 8 रसस्पर्शौ; D7 T1 G1 रसैः स्पर्शैः; T2 M5 रसे स्पर्शे (for रसस्पर्शे). — d) Da3. a4 शीतोष्ण-; D7 T1 G1 °ष्णो (D7 °ष्णौ) (for °ष्णे). K2 मरुताकृतिः.

22 a) Ś1 K1. 7 D4. 6. 9 प्र(K1 D4. 6. 9 प्रा)तिभान्; K3. 4 प्रतिवान् (for °भाम्). Ś1 K1. 2. 4 उपसंसर्गाद् (for °सर्गांश्च). D7 T1 G1. 3. 6 प्रतिहारापस(G1 °व)-र्गांश्च. ❀ Ca : प्रतिभा कवित्वोत्कर्षः ॥ Cn : सकलशास्त्रार्थभानम् । ❀ — b) Ś1 K1. 2. 4 उप- (for [अ]प्युप-). D7 T G1. 3. 6 M1. 5–7 प्रतिसंहृत्य योगतः. — c) K6 Dn4 तास् (for तांस्). K2 अनामृत्य (sic); Ds1 D4. 7. 9 T1 G1. 3. 6 °वृत्य (for °दृत्य). — d) K4 Da3. a4 Ds D2. 3. 8 आत्मन्येव; K6 आत्मने च; V1 Bo. 6–9 D4 स्वात्मनेव; D7 T G1. 3. 6 M5 मनसैव; M1. 6. 7 सोऽत्मनैव (for स्वा°). D4 [अ]भि- (for नि-). D5 -वर्धयेत् (for -वर्त°).

23 a) D7 आर्यात् (for कु°). K1. 2 परिचरं; Da4 °चयो (for °चयं). Ś1 K1. 2 योगी (for योगे). — b) K4. 6. 7 Bo. 6–9 Dn1. n4 Ds D2–4. 8. 9 M5. 6 Cn त्रैकाल्ये; Da3. a4 °ल्य-; D5 °लो; D6 °ले; M1 °ल्यो (for °ल्यं). ❀ Cn : त्रैकाल्ये, प्रातः पूर्वरात्रे अपररात्रे च ॥ Cp : त्रैकाल्ये, त्रिकालनिर्वाह्ये । ❀ — d) M1 वृक्षाग्र्येषु.

24 b) K6 कोष्ठं; K7 B6 (marg. as in text). 7. 8 (marg.). 9 Dn1. n4 Ds D2. 3. 8 Cn (gloss : हृदयपुण्डरीके) Cp (gloss : गृहाभ्यन्तरे; Cpp as in text) Cs कोष्ठे (for गोष्ठे). D7 T G1. 3. 6 M5 भांडं मनाग् (for भाण्डमना). K2 गोष्ठे गोपोर्जुनीमिव; M1. 6. 7 कोष्ठे भांडं (M7 कांडे) यथापि च. ❀ Ca : गोष्ठे गोसमूहस्य मध्ये यथा दुग्धादिपूर्णभाण्डे अनेकेभ्यो गोभ्य एकमना रक्षितुं चिन्तयत्येवमनेकोपसर्गपराहतमात्मतत्त्वमेकाग्रश्चिन्तयेत् । ❀ — c) K2. 4. 6 Bo. 8 Da4 Dn1. n4 Ds D2. 3. 8 T1 G1. 6 M1. 6 एकाग्रं (for °ग्रश्). K6 विनयेन्; G1 च जयेन् (for चिन्तयेन्). — d) K2 उद्वेजयेन्; V1 B8 D4. 9 नोद्वेच° (for नोद्वेज°).

25 Ś1 K1. 2. 4 om. (hapl.) 25ab; V1 reads the same on marg. — b) K6 संनियंतं. D6 चलेन् (for चलं). B8 नियंतुं चंचलं मनः. — c) K4. 6 V1 Bo. 6 7. 9 Da3. a4 Dn1 Ds D2. 3. 8 तं च; B8 तत्त्व-; Dn4 तत्व; D7 T G1. 3. 6 M1. 5–7 तत्तद् (for तं तं). K4 B7 Dn1 Ds D2. 3. 8 मुक्तो (for युक्तो). — d) K6 निश्चलेत्; T2 विचरेत्; M7 विमलेत् (for विच°).

26 a) M1. 6 शून्यागार- (for शून्या गिरि-). Ds -गुहा (for -गुहाश्). — b) Dn1 दैवतायतनानि च. — D5 om. (hapl.) 26cd. — c) Da4 चैकाग्रे; Ds1 D4 वैकाग्रो. M1. 6 क्षेत्रारण्यानि चैकाग्रो. — d) G3 निवासाग्रम् (for °सार्थम्). K7 D4. 9 उपाक्रमेत् (for उप°).

27 a) K6 नाभियजेत्; Dn1 D8 Cp (gloss : आत्मीयत्वेन न गृह्णीयात्) °स्वजेत्; Dn4 °सज्येत्; D4. 9 °ध्यजेत्; M5 °षज्येत् (for °ष्वजेत्). Ś1 K1. 4 परां (K4 °रं) वाचं (for परं वाचा). ❀ Ca : नाभिष्वजेत् न पीडयेत् । ❀ — b) K7 D4–6. 9 T2 M1. 5–7 तथा; V1 गिरा; Ds1 D8 [अ]पि च (for [अ]पि वा). D7 T1 G1. 3. 6 मनसा कर्मणा तथा. — c) K7 D4. 6. 9 जिताहारो (for यता°). — d) K1 लुब्धालुब्धे; D7 T G1. 3. 6 M1. 5–7 लब्धालब्ध- (for °लब्धे).

28 a) Ś1 K1. 4 न (for यश्). Ś1 K1. 2 D7 T1 G1. 3. 6 अभिनिंदेत (for °नन्देत). — b) B7 अति-; Da4 अपि; D7 T1 G1. 3. 6 अभि-; Ca अव- (for अप-). K7 D9 -वाहयेत् (for -वादयेत्). ❀ Cn : अपवादयेत्

समः सर्वेषु भूतेषु सधर्मा मातरिश्वनः ॥ २९
एवं सर्वात्मनः साधोः सर्वत्र समदर्शिनः ।
षण्मासान्नित्ययुक्तस्य शब्दब्रह्मातिवर्तते ॥ ३०
वेदनार्ताः प्रजा दृष्ट्वा समलोष्टाश्मकाञ्चनः ।
एतस्मिन्निरतो मार्गे विरमेन्न विमोहितः ॥ ३१
अपि वर्णावकृष्टस्तु नारी वा धर्मकाङ्क्षिणी ।
तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ॥ ३२
अजं पुराणमजरं सनातनं
यदिन्द्रियैरुपलभते नरोऽचलः ।
अणोरणीयो महतो महत्तरं
तदात्मना पश्यति युक्त आत्मवान् ॥ ३३
इदं महर्षेर्वचनं महात्मनो
यथावदुक्तं मनसानुदृश्य च ।
अवेक्ष्य चेयात्परमेष्ठिसात्म्यतां
प्रयान्ति यां भूतगतिं मनीषिणः ॥ ३४

C. 12. 8603
B. 12. 241(40). 36
K. 12. 246. 36

इति श्रीमहाभारते शान्तिपर्वणि द्वात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३२ ॥

निन्देत्, स्वार्थे णिच् । ❀ — ᶜ) B8 (marg.) मनस्तयोश्च (for सम°). Dn4 चाशु; D6 वापि (for चापि).

29 ᵃ) M1. 6. 7 प्रहृष्येत्तु (for °ष्येत). — ᵇ) K4 lacuna for नालामेषु. K7 D4. 6. 9 M1. 5–7 वि-; D7 T1 G1. 3. 6 [अ]थ; T2 [अ]व- (for च). Ś1 K1. 2. 4 V1 B8 (marg. as in text) D6 संज्वरेत्; B6 (marg.) चिरं तपेत् (for चिन्तयेत्). — ᵈ) K2 मातरिश्वना; D6 °रिश्वनः. ❀ Ca: मातरिश्वनो वायोः सधर्मा सदृशः । सर्वं स्पृशन्नपि शुचिः गमनशीलो वा । ❀

30 ᵃ) Ś1 K1. 2 D5 सर्वात्मना; K6 Bo. 9 सुस्थात्मनः; V1 B6–8 Da3. a4 Dn1. n4 D8 D2. 3. 8 स्वस्था°; M7 धर्मा° (for सर्वा°). B9 Da4 Dn4 साधो. — ᵇ) K2 -दर्शितः (for °नः). — ᶜ) Da4 Dn4 D6 षण्मासा (for °सान्). — ᵈ) Ś1 K2 V1 -ब्रह्माभि-; K1 -ब्रह्मादि- (for °ति-).

31 ᵃ) K1 वेदनांताः; D6 °नार्तैः; D7 T1 G1. 3. 6 अनंताश्च (for वेदनार्ताः). V1 परान् (for प्रजा). Ds1 दृष्टाः; D6 सृष्ट्वा (for दृष्ट्वा). — ᶜ) Ś1 K1. 2. 6 V1 B6. 7. 9 Da3 M7 एकस्मिन् (for एत°). V1 Bo. 7–9 Da3 Dn1. n4 D8 D2. 3. 8 विरतो; Da4 विस्तरे; D5 अंतरे; G1 अंतरतो (hypermetric) (for निरतो). Ds1 D8 मार्गो (for मार्गे). — ᵈ) Bo Dn1. n4 D8 D2. 3. 8 च (for the second वि-). K7 D4. 5. 9 विहरेद(D5 °त)- विमोहितः; D6 विहारादवमो°.

32 ᵃ) Ś1 K1. 2 D8 (marg. as in text) धर्माप-; K6 V1 D7. 9 T G1. 3. 6 M7 वर्णाप- (for वर्णाव-). Ś1 -कृष्टस्य; Ca -कृष्टा तु (for -कृष्टस्तु). ❀ Ca: वर्णावकृष्टाः शूद्राः संकीर्णजातयो वा । ❀ — ᵇ) D6 नाडी (sic) (for नारी). — ᵈ) Da3 गच्छेते; Da4 °त्य (for तां). D4 (also as in text) पदं (for गतिम्). D7 T G1. 3. 6 M1. 5–7 गच्छेतां परमं पदं.

33 ᵃ) Dn4 अंतं (for अजं). K7 B8 (marg. as in text) D4. 5. 7. 9 T1 G1. 3. 6 परमं (for अजरं). — ᵇ) K6 D6 यदींद्रियैर्; D7 T G1. 3. 6 यतेंद्रि° (for यदिन्द्रि°). K1 B8 Dn1. n4 D8 D2. 3. 5. 8 उपलभेत; K6 V1 °लभ्यते; B6. 7. 9 Da3. a4 लभ्यति वा; D7 T G1. 3. 6 M1. 5–7 उपलभ्येत (for °लभते). K6 V1 Bo च निश्चलैः; B8 Dn1. n4 D8 D2. 3. 8 T2 G3. 6 M1. 5–7 निश्चलैः; Da4 [आ]त्मनोऽकलः; D5 नरोचलं; D7 T1 G1 निश्चये (for नरोऽचलः). K7 D4. 6. 9 यदिंद्रियैरनुपलभ्यमीश्वरैः. — ᶜ) Ś1 K1. 2. 4 M1. 6 अणोरणीयान् (for °णीयो). K2 मरुतो (for महतो). Ś1 K1. 2. 4 महत्तरस्. — ᵈ) K6 B7. 9 Da3 D5. 6 Cp (Cpp as in text) तमात्मना; M7 तमात्मानं (for तदात्मना). K6 Bo Da3. a4 Dn1 D8 D2. 3. 8 मुक्तम्; B8 D7 T1 G1. 3. 6 युक्तम् (for युक्त).

34 ᵃ) Ś1 K1. 2. 4 Da3. a4 इमं (for इदं). Da3. a4 महर्षिर्. — ᵇ) M1. 6 यथा यदुक्तं (for यथावदुक्तं). Ś1 K1. 2. 4. 7 विमृश्य (K1. 2 °ष्य); D4. 6. 9 [अ]नुमृश्य; G3. 6 M7 [अ]नुपश्य (for °दृश्य). Bo. 8 (marg. as in text) ते (for च). Dn4 यथावदुक्तमनुदृश्यते च. ❀ Cn: अनुदृश्य गुरुवचनमनु शब्दतोऽर्थतश्च ज्ञात्वा । ❀ — ᶜ) K4. 6ᵃ V1 Bo. 6. 7. 9 Da3. a4 Dn1. n4 D8 D2. 3. 5. 8 चेमां; B8 चैनां; B8 (marg.) ते मां; D7 T1 G1. 3. 6 चैतत् (for चेयात्). K2. 4 Bo. 6. 7. 9 Da3. a4 Dn1. n4 D8 D2. 3. 7. 8 T1 G1 M1. 6. 7 -साम्यतां; K6 -सात्वतां; V1 B8 D5 T2 G3. 6 -सात्मतां (for -सात्म्यतां). — ᵈ) K4. 6 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 8 चाभूत-; D5 तां भूत-; D4. 6 यां तत्त्व- (for यां भूत-). D2 -गतिद्;

२३३

C. 12. 8833
B. 12. 242(1). 1
K. 12. 247. 1

शुक उवाच ।
यदिदं वेदवचनं कुरु कर्म त्यजेति च ।
कां दिशं विद्यया यान्ति कां च गच्छन्ति कर्मणा ॥ १
एतद्वै श्रोतुमिच्छामि तद्भवान्प्रब्रवीतु मे ।
एतत्त्वन्योन्यवैरूप्ये वर्तेते प्रतिकूलतः ॥ २
भीष्म उवाच ।
इत्युक्तः प्रत्युवाचेदं पराशरसुतः सुतम् ।
कर्मविद्यामयावेतौ व्याख्यास्यामि क्षराक्षरौ ॥ ३
यां दिशं विद्यया यान्ति यां च गच्छन्ति कर्मणा ।
शृणुष्वैकमनाः पुत्र गह्वरं ह्येतदन्तरम् ॥ ४
अस्ति धर्म इति प्रोक्तं नास्तीत्यत्रैव यो वदेत् ।
तस्य पक्षस्य सदृशमिदं मम भवेदथ ॥ ५
द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः ।
प्रवृत्तिलक्षणो धर्मो निवृत्तौ च सुभाषितः ॥ ६
कर्मणा बध्यते जन्तुर्विद्यया तु प्रमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ ७

D7 ·मतिर्; T1 ·मतिं; G1 पतिं; M7 ·मतीर् (for ·गतिं). Da3 मनीषिणाः. ❀ Ca (reading चाभूतगतिं): अभूतगतिं तत्त्वगतिम् । ❀

Colophon: G2 missing; K3. 5 B1–4 Da1. a2 Dn2. n3 D1 G4. 5 M2–4 absent. — *Sub-parvan:* Ś1 K1. 2. 4. 6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2–9 T G1. 3. 6 M1. 5–7 मोक्षधर्म. — *Adhy. name:* Ś1 K1. 2. 4 शुकप्रश्नः; K6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2–6. 8. 9 M5 शुकानुप्रश्नः; M1. 6 शुकानुप्रश्ने ब्रह्मप्रतिपादनं; M7 ब्रह्मप्रतिपादनं. — *Adhy. no.* (figures, words or both): K6 D8 M1. 6. 7 65; Dn1 D8 D7 T1 G1. 3. 6 M5 67; T2 81. — *Śloka no.:* Dn1. n4 35; D8 36.

233

☞ This adhy. is missing in G2 (cf. v. l. 12. 222. 19). — With this adhy., cf. Brahmapurāṇa (Ānandāshram) 236. 1–20.

1 ^{a}) T1 इतीदं; G1 य इदं (for यदिदं). Da4 द्वेव· (for वेद·). — After 1^{ab}, D7 T G1. 3. 6 M5 read 2^{cd}. — ^{c}) D4. 9 गतिं (for दिशं). D7 T G1. 3. 6 याति (for यान्ति). — ^{d}) Da4 कां वा; D7 T1 G1. 3. 6 यां च (for कां च). T2 गच्छति.

2 D7 reads 2–4 on marg. — ^{a}) Da3 वेदितुम् (for वै श्रोतुम्). — ^{b}) K7 D4. 6. 9 भगवा(D6 °व)न् (for तद्भवान्). — D7 T G1. 3. 6 M5 read 2^{cd} after 1^{ab}. — ^{c}) K4. 6 B0. 7. 8 Dn1. n4 D8 D3. 5. 7. 8 चान्योन्य·; K7 V1 D4. 6. 9 T2 G1. 3. 6 M1 अन्योन्य·; B6 T2 M5–7 ह्यन्योन्य·; B9 वान्योन्य· (for त्वन्योन्य·). D5. 7 T G1. 3. 6 ·वैरूप्यं (for °प्ये). — ^{d}) K4 B0. 6–8 Dn1. n4 Da2 D2. 3. 8 वर्तेते (for वर्तते).

3 B9 om. 3–5. D7 reads 3 on marg. Ś1 K1. 2 T1 G1 om. the ref. — ^{a}) G1 इत्युक्तं. — ^{c}) D7 चैतौ (for एतौ).

4 B9 om. 4 (cf. v. l. 3). D7 reads 4 on marg. — ^{a}) T G1. 3. 6 याति (for यान्ति). — ^{b}) K7 Da4 D4. 6. 9 गच्छंति च (by transp.); T2 G1 च गच्छति. — Before 4^{cd}, D7 T1 G1. 3. 6 ins. व्यासः. — ^{c}) D7 T G1. 3. 6 शृणु च (for शृणुष्व). K6 विप्र; B0. 8 (marg.) Dn1. n4 D8 D2. 3. 6. 8 वत्स; B8 (orig.) भूत्वा (for पुत्र). K7 D4. 5. 9 शृणु त्वमेकाग्रमना (D4 °ता). — ^{d}) Ś1 K1. 2. 4 गुह्यमेतदनंतरं; K7 T1 G1. 3. 6 गह्वरं ते तदंतरं; D7 गह्वरं तदनंतरं.

5 B9 om. 5 (cf. v. l. 3). — ^{a}) B8 (marg.) स्वस्ति (for अस्ति). B8 कर्म (for धर्म). K6 B6–8 Da3. a4 D5. 6 ह्युक्तं; K7 D4. 7. 9 T G1. 3. 6 M1. 5–7 ह्युक्त्वा (for प्रोक्तं). — ^{b}) V1 B8 (marg. as in text) तत्रैव; D7 T2 G3. 6 [इ]त्यत्र च (for °त्रैव). Da4 नास्तितश्चैव यो वदेत्; T1 नास्तीत्यत्र वचो वदेत्. — ^{d}) D6 इमं (for इदं). K4 T1 यथा; T2 अपि (for अथ).

6 ^{a}) K7 D4. 6. 9 तात; D5 अत्र; M5 अपि (for अथ). — ^{d}) B8 (marg.) सु·; B9 स्व· (for च). K6. 7 B6–9 D4. 5. 9 Cp (gloss: विस्पष्टतया भाषितः) विभाषितः; D6 सुभावतः; D7 T G1. 3. 6 M1. 5–7 व्यवस्थितः (for सुभाषितः). ❀ Ca (reading स्वभावितः): स्वभावितः, स्वयं मयोक्त इत्येके पाठमर्थं च मन्वते, तच्चिन्त्यम् । ❀

7 D7 G1. 3. 6 om. 7^{a}–8^{b}. — ^{a}) Da4 बाध्यते (for ब°). — ^{b}) K6 V1 B7. 9 Da3 D4. 6 तु वि·; K7 B6

कर्मणा जायते प्रेत्य मूर्तिमान्षोडशात्मकः ।
विद्यया जायते नित्यमव्ययो ह्यव्ययात्मकः ॥ ८
कर्म त्वेके प्रशंसन्ति स्वल्पबुद्धितरा नराः ।
तेन ते देहजालानि रमयन्त उपासते ॥ ९
ये तु बुद्धिं परां प्राप्ता धर्मनैपुण्यदर्शिनः ।
न ते कर्म प्रशंसन्ति कूपं नद्यां पिबन्निव ॥ १०
कर्मणः फलमाप्नोति सुखदुःखे भवाभवौ ।
विद्यया तदवाप्नोति यत्र गत्वा न शोचति ॥ ११

यत्र गत्वा न म्रियते यत्र गत्वा न जायते ।
न जीर्यते यत्र गत्वा यत्र गत्वा न वर्धते ॥ १२
यत्र तद्ब्रह्म परममव्यक्तमजरं ध्रुवम् ।
अव्याहतमनायासममृतं चावियोगि च ॥ १३
द्वंद्वैर्यत्र न बाध्यन्ते मानसेन च कर्मणा ।
समाः सर्वत्र मैत्राश्च सर्वभूतहिते रताः ॥ १४
विद्यामयोऽन्यः पुरुषस्तात कर्ममयोऽपरः ।
विद्धि चन्द्रमसं दर्शे सूक्ष्मया कलया स्थितम् ॥ १५

C. 12. 8818
B. 12. 241. 15
K. 12. 247. 15

$D_{5.9}$ T M_5 च वि-; Da_4 भुवि; D_8 $M_{1.6.7}$ च प्र- (for तु प्र-). — ^{d}) Dn_4 D_5 पर- (for पार-). $K_{2.4}$ -दर्शनः; K_7 D_9 -दृश्वनः (for -दर्शिनः).

8 D_7 $G_{1.3.6}$ om. 8^{ab} (cf. v. l. 7). — ^{c}) Da_4 विद्याया (for विद्यया). D_3 व्यक्तम् (for नित्यम्). — ^{d}) K_6 $Bo_{.6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ D_8 $D_{2.3.5.8}$ अव्यक्तं (for अव्ययो). K_6 $B_{0.7.8}$ (marg.).$_9$ $Da_{3.a4}$ D_5 ह्यक्षरात्मकः (B_9 °जं); K_7 V_1 $D_{4.6.7.9}$ T $G_{1.3.6}$ $M_{1.5-7}$ ह्य(M_7 [ऽ]व्य)क्षरात्मकः; $Bo_{.8}$ (orig.) $Dn_{1.n4}$ D_8 $D_{2.3.8}$ ह्यव्ययात्मकं (for °त्मकः).

9 ^{a}) K_4 त्वेकं; D_7 T_1 $G_{1.3.6}$ त्वेते (for त्वेके). — ^{b}) $Ś_1$ $K_{1.2}$ चाल्प-; $Da_{3.a4}$ अल्प- (for स्वल्प-). K_6 $Bo_{.6.7.8}$ (marg.).$_9$ $Da_{3.a4}$ $Dn_{1.n4}$ D_8 $D_{2.3.5.6.8}$ -बुद्धिरता; B_8 (orig.) -बुद्धितमा; D_7 T $G_{1.3.6}$ M_5 °तया (for °तरा).

10 ^{a}) $K_{4.6}$ Bo $Dn_{1.n4}$ D_8 $D_{2.3.8.9}$ स्म (for तु). Da_4 D_4 बुद्धि- (for बुद्धिं). — ^{b}) K_7 $D_{4.6.9}$ धर्मे; Da_4 कर्म- (for धर्म-). K_7 $D_{4.6.9}$ निपुण-; V_1 $Bo_{.6}$ (marg. as in text).$_{7.9}$ Dn_4 D_8 G_1 M_7 -नैपुण- (for °ण्य-). V_1 -दर्शनाः (for -दर्शिनः). ॐ Cs: धर्मनैपुण्यदर्शिनः, धर्मयोः प्रवृत्तिनिवृत्तिरूपयोर्नैपुण्यं संसारप्रदानमोक्षप्रदानशक्तित्वं, तत् पश्यन्तः। ॐ — ^{c}) V_1 M_1 transp. न and ते. D_7 T $G_{1.3.6}$ M_{5-7} ते कर्म न प्रशंसंति. — ^{d}) $Ś_1$ $K_{1.2.4}$ नद्यां कू(K_1 रू)पं (by transp.); K_6 कूपे नद्यां; $D_{4.9}$ T_1 $G_{1.3.6}$ रूपं नद्यां; T_2 $M_{1.5-7}$ कूपं नद्याः. Bo पिबन्नपि; $D_{2.8}$ पिबंति च; $D_{5.7}$ °ति ये (for पिबन्निव).

11 D_5 om. 11^{a}–12^{b}. — ^{a}) Da_4 Ds_1 D_7 T_2 कर्मणा (T_2 °णां) (for °णः). — ^{b}) D_4 सुखदुःख- (for °दुःखे). — ^{c}) T_2 विद्यायास. — ^{d}) Da_4 om. (hapl.) from न up to गत्वा (in 12^{b}).

12 Da_4 om. up to गत्वा; D_5 om. 12^{ab} (for both, cf. v. l. 11). — ^{a}) $Ś_1$ $K_{1.2.4}$ म्रियेत (for म्रियते). — ^{b}) Da_4 वर्धते (for जायते). — ^{c}) K_4 जीर्यते. K_6 $Bo_{.6.7.9}$ $Da_{3.a4}$ $Dn_{1.n4}$ D_8 $D_{2.3.8}$ न पुनर्जाय(K_6 $Bo_{.9}$ °र्जीर्य)ते यत्र. — ^{d}) M_7 तत्र (for यत्र). K_6 Da_4 $Dn_{1.n4}$ D_8 $D_{2.8}$ वर्तते; Bo वर्तयेत् (for वर्धते).

13 ^{a}) D_5 तत्र (for यत्र). $M_{1.5.6}$ तद्याति (M_6 °द्यांति) (for यत्र तद्). D_7 T $G_{1.3.6}$ M_7 तद्याति (G_1 °द्यामि; M_7 °द्यांति) परमं ब्रह्म. — ^{b}) D_7 T $G_{1.3.6}$ पुराणम् (for अव्यक्तम्). $K_{6.7}$ $Bo_{.6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ D_8 $D_{2-6.8.9}$ अचलं (for अजरं). — ^{c}) $Ś_1$ $K_{1.2.4}$ अनाहतम्; K_6 V_1 $Bo_{.6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ D_8 $D_{2.3.5.8}$ अव्याकृतम्; K_7 D_6 °हृतम् (for °हतम्). — ^{d}) $Da_{3.a4}$ अनृतं; Dn_1 D_8 $D_{2.6.8}$ Cn (Cnp as in text) अव्यक्तं (for अमृतं). Bo च वियोगि; Da_4 $M_{1.5.6}$ चापि योगि; D_8 D_6 अवियोगि; D_4 वावि° (for चावि°). D_7 T_1 $G_{1.3.6}$ अमृतत्वं च विंदति.

14 ^{a}) D_7 $G_{1.3.6}$ द्वंद्वे (for द्वंद्वैर्). $K_{4.6.7}$ V_1 $Bo_{.6-9}$ $Da_{3.a4}$ $Dn_{1.n4}$ $D_{2-6.8.9}$ न यत्र (by transp.); B_6 (marg.) न नित्यं; D_7 G_1 यत्र नि-. B_7 वध्यंते; $D_{4.7}$ T_2 $G_{1.3.6}$ M_5 बध्यंते (for बा°).

15 ^{a}) K_2 यः (for ऽन्यः). — ^{b}) D_8 [ऽ]क्षरः (for ऽपरः). — ^{c}) K_1 चंद्रसमं (for °मसं). K_7 $D_{4.9}$ स्पर्शे; Da_4 दृशे (for दर्शे). — ^{d}) $Ś_1$ $K_{1.2.4}$ वृतं (for स्थितम्). — After 15, D_7 T $G_{1.3.6}$ Kumbh. ed. ins.:

682* विद्यामयं तं पुरुषं नित्यं ज्ञानगुणात्मकम् ।

16 ^{a}) K_6 V_1 $Bo_{.8}$ यदेतद्; Da_4 तदेव; M_7 तदैतद् (for तदे°). ॐ Ca: ऋषिणा वेदेन ॥ Cn: बृह-

C. 12. 8819
B. 12. 242[1]. 16
K. 12. 247. 16

तदेतदृषिणा प्रोक्तं विस्तरेणानुमीयते ।
नवजं शशिनं दृष्ट्वा वक्रं तन्तुमिवाम्बरे ॥ १६
एकादशविकारात्मा कलासंभारसंभृतः ।
मूर्तिमानिति तं विद्धि तात कर्मगुणात्मकम् ॥ १७
देवो यः संश्रितस्तस्मिन्नब्बिन्दुरिव पुष्करे ।
क्षेत्रज्ञं तं विजानीयान्नित्यं त्यागजितात्मकम् ॥ १८
तमो रजश्च सत्त्वं च विद्धि जीवगुणानिमान् ।
जीवमात्मगुणं विद्यादात्मानं परमात्मनः ॥ १९
सचेतनं जीवगुणं वदन्ति
स चेष्टते चेष्टयते च सर्वम् ।
ततः परं क्षेत्रविदो वदन्ति
प्रावर्तयद्यो भुवनानि सप्त ॥ २०

इति श्रीमहाभारते शान्तिपर्वणि त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३३ ॥

दारण्यक(1. 5. 14)दर्शिना याज्ञवल्क्येन.। ❀ — b) D7 T1 G1 -नीयते (for -मीयते). — c) K6 न च तं; B7. 8 D7 T G1. 3. 6 M5 नवं च (B7. 8 तु); Da4 नरजं (for नवजं). K2 नवजशिशिनं दृष्ट्वा (sic). — d) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 T2 M1. 5–7 वक्रतंतुम्; D7 T1 G1. 3. 6 शतक्रतुम् (for वक्रं तन्तुम्).

17 a) ❀ Ca : भूतानि पञ्च षडिन्द्रियाणि इत्येकादश विकाराः । ❀ — b) Da4 कथा-; D7 G1. 3. 6 M7 काल- (for कला-). K7 -संभाव- (for -संभार-). K1 -संभृताः; K2 -संव्रतः; K7 D5 -संवृतः; Da4 -संस्मृतः; Ds1 -संधृतः (for -संभृतः). — c) K6 V1 इव (for इति). — After 17, D7 T G1. 3. 6 M1. 5–7 Kumbh. ed. Cv ins. :

683* तस्मिन्यः संस्थितो ह्यग्निर्नित्यं स्थाल्यामिवाहितः ।
आत्मानं तं विजानीहि नित्यं त्यागजितात्मकम् ।

[(L. 1) D7 T1 G3. 6 तन्व्यां हि; G1 तस्यां हि (for तस्मिन्यः). G1. 3. 6 ह्यग्निं. G3. 6 [आ]हितं; M1. 6 [अ]र्पितं. — (L. 2) T2 तु (for तं). T2 ज्ञान- (for त्याग-).]

18 a) K2 वः (for यः). Ś1 K1. 4 संशितस्; V1 B8 (marg. as in text) D4. 5. 9 M7 संस्थितस्; D6 संसृतस् (for संश्रितस्). D7 T1 G1. 3. 6 ह्यस्मिन् (for त°). Cp देवोपमः श्रितो ह्यस्मिन्. — b) K6 -बिंदुस् (for -बिन्दुर्). — c) B8 (marg.) क्षेत्रज्ञस्; Da4 क्षेत्रे ज्ञं. Dn4 सं- (for तं). K7 D4. 5. 7. 9 T G1. 3. 6 विजानीहि (for °यान्). — d) G1 M1. 6 नित्य- (for नित्यं). K4. 6 V1 Bo. 6–9 Da3. a4 Dn1. n4 D2. 3. 6. 8 योग-; T2 G3 M1. 5–7 ज्ञान- (for त्याग-). K7 D9 -गुणात्मकं (for -जिता°). D5 नित्यं त्यागायतात्मकं.

19 K7 om. (? hapl.) 19^{ab}. D4 transp. 19^{ab} and 19^{cd}. — b) D7 T1 G1 चैव (for जीव-). K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–9 T G1. 3. 6 M5 -गुणात्मकं (G1 °कः) (for -गुणानिमान्). — c) Da4 आत्मगुणे (for °गुणं). K7 D6 विंद्याद् (for वि°).

20 a) D7 T G1. 3. 6 M1. 5–7 अचेतनं (for स°). B6. 8 (both marg.) Ca (Cap as in text) -गणं (for -गुणं). ❀ Cn : जीवगुणं जीवगुणेन चैतन्येन युक्तम् ॥ Cv : जीवगुणमचेतनम् स्वनिष्ठचैतन्यस्यापि पराधीनत्वादचेतनमिव जीवगुणं वदन्ति । ❀ — B9 om. (hapl.) 20^{bc}. — b) Ś1 K1. 2. 4 यश्; T2 न (for स). K6 Bo. 8 (marg.) Da3. a4 Dn1. n4 Ds D2. 3. 8 जीवयते (for चेष्ट°). — c) D7 T G1. 3. 6 अतः (for ततः). Ś1 K1. 2. 4 क्षेत्रविदं; D4 °विदा (for °विदो). — d) K6 प्रावर्तयन्; V1 Bo. 6 (marg.). 7. 8 (marg.). 9 Dn1. n4 D2. 3. 7. 8 T G1. 3. 6 M1. 7 प्राकल्पयद् (for प्रावर्तयद्).

Colophon : G2 missing; K3. 5 B1–5 Da1. a2 Dn2. n3 D1 G4. 5 M2–4 absent. — *Sub-parvan* : Ś1 K1. 2. 4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–5. 7–9 T G1. 3. 6 M1. 5–7 मोक्षधर्म. — *Adhy. name* : Ś1 K1. 2. 4 शुकप्रश्नः; K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 शुकानुप्रश्नः; M1. 6. 7 शुकानुप्रश्ने विद्याकर्मफलभेदः; M5 शुकानुप्रश्ने क्षराक्षरविवेकः. — *Adhy. no.* (figures, words or both) : K6 D8 M1. 6. 7 66; Dn1 D7 T1 G1. 3. 6 M5 68; Dn4 Ds2 67; Ds1 6 (sic); T2 82. — *Śloka no.* : Dn1. n4 D8 20.

२३४

शुक उवाच ।

क्षरात्प्रभृति यः सर्गः सगुणानीन्द्रियाणि च ।
बुद्ध्यैश्वर्याभिसर्गार्थं यद्ध्यानं चात्मनः शुभम् ॥ १
भूय एव तु लोकेऽस्मिन्सद्वृत्तिं वृत्तिहैतुकीम् ।
यया सन्तः प्रवर्तन्ते तदिच्छाम्यनुवर्णितम् ॥ २
वेदे वचनमुक्तं तु कुरु कर्म त्यजेति च ।
कथमेतद्विजानीयां तच्च व्याख्यातुमर्हसि ॥ ३
लोकवृत्तान्ततत्त्वज्ञः पूतोऽहं गुरुशासनात् ।
कृत्वा बुद्धिं वियुक्तात्मा त्यक्ष्याम्यात्मानमव्यथः ॥ ४

व्यास उवाच ।

यैषा वै विहिता वृत्तिः पुरस्ताद्ब्रह्मणा स्वयम् ।
एषा पूर्वतरैः सद्भिराचीर्णा परमर्षिभिः ॥ ५
ब्रह्मचर्येण वै लोकाञ्जयन्ति परमर्षयः ।
आत्मनश्च हृदि श्रेयस्त्वन्विच्छ मनसात्मनि ॥ ६

C. 12. 8829
B. 12. 243(2). 6
K. 12. 248. 6

234

1 ^{a}) G_2 पुरा (for क्षरात्). V_1 प्रभृतयः (for °ति यः). $Ś_1$ $K_{1.2}$ यत्सर्वं (for यः सर्गः). ❀ Cn : क्षरात् प्रधानात् । ❀ — ^{b}) K_1 Dn_4 सगुणान् (for °णानि). — ^{c}) K_6 $Bo_{.6.7}$ Dn_1 $D_{7.8}$ G_2 $M_{1.5.7}$ बुद्ध्यैश्वर्याति- (D_7 G_2 $M_{5.7}$ °दि-) (for °र्याभि-). K_6 $Bo_{.6-8}$ Dn_1. n_4 Ds $D_{2.3.5.6.8}$ -सर्गोयं; V_1 B_9 -सर्गोथ; D_7 T $G_{1-3.6}$ $M_{1.5-7}$ -संसर्गः (for -सर्गार्थं). $Da_{3.}$ a_4 बुद्ध्यैश्वर्येवि(Da_4 °नि)सर्गार्थं. ❀ Ca : बुद्ध्यैश्वर्यमणिमादि । ❀ — ^{d}) K_6 V_1 $Bo_{.6-9}$ Dn_1. n_4 Ds $D_{2-5.7.8}$ T $G_{1-3.6}$ $M_{1.5-7}$ प्रधानश् (D_4 T $G_{1.3.6}$ $M_{6.7}$ °नं) (for यद्ध्यानं). D_7 T_1 $G_{1-3.6}$ चात्मना (for °नः). K_6 V_1 $Bo_{.6-9}$ Dn_1. n_4 Ds D_{2-8} T $G_{1-3.6}$ $M_{1.5-7}$ श्रुतं (for शुभम्).

2 ^{a}) K_7 भूत (for भूय). — ^{b}) Da_4 सद्वृत्तं (for °त्तिं). K_6 V_1 $Bo_{.6-9}$ $Da_{3.}$ a_4 Dn_1. n_4 Ds $D_{2.3.5.8}$ Cp काल-; D_6 मोक्ष- (for वृत्ति-). $Ś_1$ $K_{1.2.4.7}$ D_9 M_5 -हेतुकीं (M_5 °कां); B_7 Dn_4 -हैतुकं (Dn_4 °कां) (for -हैतुकीम्). D_7 T $G_{1-3.6}$ सद्वृत्तिं है(D_7 G_1 °त्तिं हे-; G_2 °त्तिहैं)तुकीं (G_2 °की) क्रियां (G_2 °या). ❀ Cn : कालहैतुकीं युगानुसारिणीम् । ❀ — ^{c}) K_3 सर्वातः (hypermetric) (for सन्तः). — ^{d}) K_3 तच्च-च्छामि; D_7 T $G_{1.3.6}$ $M_{5.7}$ तामि° (for तदि°). $K_{4.7}$ $B_{6.8}$ (marg.) Dn_1. n_4 Ds $D_{2-6.8.9}$ G_1 -वर्तितुं; K_6 $B_{7.8}$ (orig.). $_9$ $Da_{3.}$ a_4 D_7 T $G_{3.6}$ $M_{1.5.7}$ -वर्णितुं; V_1 Bo -वर्तितं (for -वर्णितम्). G_2 तामिहाद्यानुवर्णय.

3 ^{a}) K_2 वेदैर् (for वेदे). $Da_{3.}$ a_4 तत् (for तु). — ^{b}) K_6 धर्म (for कर्म). — ^{c}) D_7 विजानीयाद् (for °यां). — ^{d}) Ds तत्त्वं; $D_{4-6.9}$ तन्मे (for तच्च). K_6 अर्हति. D_7 T $G_{1-3.6}$ $M_{1.5-7}$ तद्भवान्वक्तुमर्हति (G_2 °सि).

4 ^{a}) K_4 -कर्ताश्च (for -वृत्तान्त-). K_6 $B_{6.8}$ $Da_{3.}$ a_4 -तत्त्वज्ञ-; Dn_4 -तत्त्वज्ञात्; D_7 T $G_{1-3.6}$ $M_{1.5-7}$ -वृत्तज्ञः (for -तत्त्वज्ञः). — ^{b}) $Ś_1$ $K_{1.2.4}$ तव (for गुरु-). — ^{c}) $K_{4.6}$ V_1 B_{6-9} Dn_1. n_4 Ds $D_{2.3.5.8}$ T_2 G_2 $M_{1.5-7}$ विमुक्तात्मा; K_7 $D_{4.6.7.9}$ T_1 $G_{1.3.6}$ विशु- (D_6 °बु)द्धात्मा; Bo स युक्तात्मा (for वियु°). — ^{d}) V_1 $Bo_{.6-9}$ $Da_{3.}$ a_4 Dn_1. n_4 Ds_2 (before corr. as in text) $D_{2.3.5.8}$ द्रक्ष्यामि; D_4 त्यक्षामि (for त्यक्ष्यामि). K_7 $D_{4.9}$ अप्यथ; V_1 B_8 (orig.) D_7 T $G_{1-3.6}$ $M_{1.6.7}$ आत्मना; $Bo_{.6.7.8}$ (marg.). $_9$ $Da_{3.}$ a_4 Dn_1. n_4 Ds $D_{2.3.5.8}$ अव्ययं; B_6 (marg.) आत्मनि; D_6 अव्यथं (for °थः). K_6 विमुक्तात्मानमव्ययं.

5 ^{a}) $K_{4.6}$ $Bo_{.6.7.9}$ Da_4 Dn_1. n_4 Ds $D_{2-6.8}$ यथा; V_1 M_1 येषां; Da_3 D_7 T $G_{1.3.6}$ M_7 एषा; G_2 एका; Ca यैषा (as in text). $Ś_1$ $K_{1.2}$ बुद्धिः (for वृत्तिः). — ^{b}) $Ś_1$ K_2 परस्ताद्; G_2 प्रय° (for पुर°). $Ś_1$ $K_{1.2}$ D_7 $G_{1.2}$ ब्रह्मणः (K_2 °णाः); K_4 ब्राह्मणः (for ब्रह्मणा). — ^{c}) $M_{1.5.6}$ सैषा (for एषा). $M_{1.6}$ पूर्वतरा; M_7 °परैः (for °तरैः). K_6 G_2 सिद्धिर् (for सद्भिर्).

6. ^{a}) Ds_2 ब्रह्मचर्यं च (for °चर्येण). — ^{c}) $K_{6.7}$ V_1 $Bo_{.6}$ (marg.). $_{7-9}$ Dn_1. n_4 Ds $D_{2-6.8.9}$ ततः; B_6 $Da_{3.}$ a_4 तथा (for हृदि). K_6 $Bo_{.6-9}$ Da_3 Dn_1. n_4 $D_{2.3.8}$ श्रेयांसि; Da_4 श्रेयाणि; D_5 श्रेयान् (for श्रेयस्). — ^{d}) K_4 त्वन्विच्छन्; K_6 V_1 $Bo_{.6-9}$ $Da_{3.}$ a_4 Dn_1. n_4 $D_{2.3.5.7.8}$ T $G_{1.3.6}$ $M_{5.7}$ अन्विच्छ(Bo °च्य)न्; K_7 $D_{4.6.9}$ ह्यन्विच्छन्; Ds चान्विच्छन्; $M_{1.6}$ तन्विच्छन् (for त्वन्विच्छ). G_2 आसिञ्जन्मनि स्वात्मनः.

C. 12. 8830
B. 12. 243(2). 7
K. 12. 248. 7

वने मूलफलाशी च तप्यन्सुविपुलं तपः ।
पुण्यायतनचारी च भूतानामविहिंसकः ॥ ७
विधूमे सन्नमुसले वानप्रस्थप्रतिश्रये ।
काले प्राप्ते चरन्भैक्षं कल्पते ब्रह्मभूयसे ॥ ८
निःस्तुतिर्निर्नमस्कारः परित्यज्य शुभाशुभे ।
अरण्ये विचरैकाकी येन केनचिदाशितः ॥ ९

शुक उवाच ।

यदिदं वेदवचनं लोकवादे विरुध्यते ।
प्रमाणे चाप्रमाणे च विरुद्धे शास्त्रता कुतः ॥ १०
इत्येतच्छ्रोतुमिच्छामि भगवान्प्रब्रवीतु मे ।
कर्मणामविरोधेन कथमेतत्प्रवर्तते ॥ ११

भीष्म उवाच ।

इत्युक्तः प्रत्युवाचेदं गन्धवत्याः सुतः सुतम् ।
ऋषिस्तत्पूजयन्वाक्यं पुत्रस्यामिततेजसः ॥ १२
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।
यथोक्तकारिणः सर्वे गच्छन्ति परमां गतिम् ॥ १३
एको य आश्रमानेताननुतिष्ठेद्यथाविधि ।
अकामद्वेषसंयुक्तः स परत्र महीयते ॥ १४

---

7 a) G2 तेन (for वने). — b) Ś1 K1 तप्यस्य; K2 तस्य सु-; K4 तप्ये स्व-; K7 D4–6. 9 तहत्रा सु-; B8 D7 T G1–3. 6 M7 तप्यस्व (for तप्यन्सु-). B7 M7 -विमलं; D7 T G1–3. 6 परमं (for -विपुलं). — d) D6 अवहिंसकः (for अवि°).

8 With 8, cf. 12. 9. 22; Manu. 6. 56. — a) Ś1 सत्रमुसले; K1. 2. 4 सन्नमुसुले; K6 V1 B6–9 Da3 °मुषले; K7 °मूशले; Da4 °मुखले; D4–6. 9 °मुशले (D6 °लं) (for °मुसले). — b) Ds1 G1 वानप्रस्थः; G3 °प्रस्थैः (for °प्रस्थ-). Ds1 प्रतिश्रयेत्. — c) K7 D4. 5. 7. 9 T G1–3. 6 M1. 6 चरेद् (for चरन्). K4. 7 V1 B6–8 Da4 Ds D2–6. 8. 9 G2 भैक्ष्यं (for भैक्षं). — d) Ś1 K4 G3 M7 (*inf. lin.*) कल्पसे; K1. 2 कल्प मे; Da4 लक्ष्यसे; M7 (orig.) कल्पने (for °ते). Ś1 K1. 2. 4 -भूतये (for -भूयसे).

9 With 9, cf. Māṇḍūkya-Kārikā 2. 37. — a) K2. 4 निःस्तुतिं (for निःस्तुतिर्). G2 निस्वयं निर्नमस्कारं. — b) K2. 4 परित्यक्त-; M1 °त्यज (for °त्यज्य). Ś1 शुभाशुभः. K1 परित्यक्तशुभाशुभः. — c) K7 D4. 9 अ- (K7 आ)रण्यचरणे(D4. 9 °र ए)काकी. — d) K6 अंशितः; D5 आश्रितः; D6 आसितः (for आशितः).

10 a) Da4 देव- (for वेद-). — b) T2 लोके वादो; G2 लोकवाचा (for °वादे). K1 निरुध्यते. — c) K4 B6 Da3. a4 Dn1 Ds1 D2. 8. 9 वा (for the first च). B6 Da3. a4 वा (for the second च). Dn4 प्रमाणे वा विरुध्येत; D5 अप्रमाणे प्रमाणे वा. — d) K4 विरुते; Dn4 lacuna (for विरुद्धे). K2 विरुद्धे शाश्वतोर्थतः; B6–8 °द्धे शाश्वतां गतः (B8 °ते); D7 T G2. 3. 6 °द्धे शाश्वतः कुतं (T2 कथं).

11 a) B7 Da3 एतत्ते (Da3 °त्तु) (for इत्येतत्). — b) D7 T G1–3. 6 M6 भगवन्; M7 तद्भवान् (for भगवान्). K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 प्रमाणं तू(K6 V1 B6. 8. 9 Da3. a4 °णमु-; D6 °णे तू)भयं कथं (Da3. a4 कुतः). — d) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 मोक्षः (for एतत्). D7 G1 प्रवर्धते (for °र्तते).

12 G3 om. the ref. — b) Da4 D6 गंधवत्या. — c) Da4 हृदि (for ऋषिस्). K7 Ds1. s2 (marg. as in text) पूजयद्; M1. 6. 7 पूज्य सद्- (for पूजयन्). — d) Ds1 पुत्राय (for पुत्रस्य). D8 -तेजसा.

13 Before 13, Ś1 K1. 2. 4. 6. 7 V1 Bo. 6–9 Da3 Dn1. n4 Ds D2–9 T G3. 6 M1. 5–7 ins. व्यास उवाच. — a) K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 M5 ब्रह्मचारी गृहस्थश्च (Da4 °स्थ). — c) K6 V1 Bo. 6. 7. 9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 -चारिणः (for -कारिणः). Dn4 सर्वं (for सर्वे). — d) ❀ Ca : परमां, तत्त्वसाक्षात्कारलभ्याम् । एतेन कर्मणो ज्ञानेनाविरोधो दर्शितः । या तु कर्मनिन्दैव सा उक्तविधया काम्यनिषिद्धपरतया द्रष्टव्या । ❀

14 a) D4. 9 [ऽ]यम्; D6 तथा (for य). K4. 6 Bo. 6. 7. 8 (marg. as in text). 9 Da3. a4 Dn1. n4 Ds D2. 3. 8 वाप्याश्रमान् (for य आश्र°). G1 एकान् (for एतान्). — b) K4. 6 Bo. 6–9 Da3. a4 Dn1. n4 D2. 3. 8 योनुतिष्ठेद्; K7 D4. 9 अनुतिष्ठन्; Ds उपातिष्ठेद्; D7 T G1–3. 6 अधि° (for अनु°). D6 यथा विधिः. — d) K6 Bo Dn1. n4 Ds D2. 3. 8 विधीयते; D7 T1 G1–3. 6 न हीयते (for महीं°).

* 15 15ab = (var.) 12. 20. 4ab. D5 om. (hapl.) 15. — a) K7 Dn1 Ds2 चतुष्पदा; Ds1 D4. 9 M1. 5–7 °ष्पादी; D7 T1 G1 °ष्पदे (for °ष्पदी). M1. 7 इ

चतुष्पदी हि निःश्रेणी ब्रह्मण्येषा प्रतिष्ठिता ।
एतामाश्रित्य निःश्रेणीं ब्रह्मलोके महीयते ॥ १५
आयुषस्तु चतुर्भागं ब्रह्मचार्यनसूयकः ।
गुरौ वा गुरुपुत्रे वा वसेद्धर्मार्थकोविदः ॥ १६
कर्मातिरेकेण गुरोरध्येतव्यं बुभूषता ।
दक्षिणो नापवादी स्यादाहूतो गुरुमाश्रयेत् ॥ १७
जघन्यशायी पूर्वं स्यादुत्थायी गुरुवेश्मनि ।
यच्च शिष्येण कर्तव्यं कार्यं दासेन वा पुनः ॥ १८
कृतमित्येव तत्सर्वं कृत्वा तिष्ठेत पार्श्वतः ।
किंकरः सर्वकारी च सर्वकर्मसु कोविदः ॥ १९
शुचिर्दक्षो गुणोपेतो ब्रूयादिषुरिवात्वरः ।
चक्षुषा गुरुमव्यग्रो निरीक्षेत जितेन्द्रियः ॥ २०
नाभुक्तवति चाश्नीयादपीतवति नो पिबेत् ।
न तिष्ठति तथासीत नासुप्ते प्रस्वपेत च ॥ २१

C. 12. 8844
B. 12. 242(2). 21
K. 12. 246. 21

(for हि). Ś1 Da3 D4. 6 T2 G2 M7 निश्रेणी; D7 निःश्रेणिर्. Dn4 चतुष्पदादिनिःश्रेणी. — [b]) Da4 D8 प्रतिष्ठिताः. — [c]) K4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2–4. 6. 8. 9 M1. 5. 6 आरुह्य (for आश्रित्य). K1 Da4 निःश्रेणी; D4. 6 T2 G2 निश्रेणीं; D7 निःश्रेणिं.

16 [a]) Da3. a4 आयुषं (for °षस्). K2 D5 च (for तु). — [b]) K6 Ds1. s2 (before corr.) D5. 6 अनुसूयकः (for अन°). Ś1 K1 Da4 T1 G1. 3 M1. 6 ब्रह्मचर्य (Da4 T1 M6 °र्या)नसूयकः. — [d]) B8 (marg.) चरेद् (for वसेद्).

17 K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2–9 T G1–3. 6 M1. 5–7 read 17 after 19. — [a]) Ś1 K1. 2. 4 धर्मातिरिकेण (K2 °केन; K4 °के च) गुरोर्; K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 6. 8 कर्मातिशेषेण (B8 °देशेन) गुराव् (V1 B9 °रोर्); D5 कर्माविरोधेन गुरोर्; D7 T G1–3. 6 M1. 5–7 कर्मशेषेण तु गुरोर्. — [c]) Ds2 D8 T2 G1 M1. 5–7 दक्षिणे (for °णो). K4 V1 Bo. 7–9 Da3. a4 Dn1. n4 D2. 3. 5. 6. 8 [ऽ]नप(B8 D8 °य)-वादी; Ds1 [ऽ]नपसादी; Ds2 T G1 नोपसादी (T °दि-); D7 M1. 5–7 नोपवासी; G3. 6 नोपवादी (for नाप°). G2 दक्षिणेनोपतादिस्वाद्. — [d]) Da3. a4 आहुतो; M6 आभूतो. T G1–3. 6 M1. 5–7 आव्रजेत् (for आश्रयेत्). — After 17, M5 reads 22[a]–23[b].

18 [a]) Da4 G1 जघन्यशायि. — [b]) K4. 6 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 6. 8 T2 G2 M1. 5. 6 उत्थाय (for °यी). Da4 -वेश्मनी. D5 आहूतो गुरुमाश्रयेत् (= 17[d]). — [c]) K1 यश्च; D5 पूर्वं (for यच्च). — [d]) Da4 दानेन (for दासेन).

19 [a]) Ś1 K1. 4 कृत्यम् (for कृतम्). T1 तं (for तत्). D8 पूर्वं (for सर्वं). D5 कृतकृत्यं च तत्सर्वं. — [b]) K7 D4. 9 तिष्ठेच्च (for °त). — [c]) Da4 Dn4 सर्वकारि. K4. 6 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 8 स्यात्; D8 lacuna (for च). — After 19, K6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2–9 T G1–3. 6 M1. 5–7 read 17.

20 G3 om. 20[a]–21[b]. Ds1 reads 20[a]–21[b] twice. — [a]) K7 D4 -दीक्षा- (for दक्षो). — [b]) Ś1 K1. 2 भूयाद् (for ब्रू°). K6. 7 V1 Bo. 6–9 Dn1. n4 D8 D2. 3. 5. 8 G2 M1. 5. 6 Cp इष्टम्; Da3. a4 D4. 7. 9 T G1. 6 M7 इषुम् (for इषुर्). K6. 7 V1 Bo. 6. 7. 9 Da3. a4 Dn1. n4 D8 D2. 3. 5–8 T G1. 2. 6 M1. 6. 7 Cp इवांतरा (V1 Da4 D6 °राः); B8 इवांतरः; D4. 9 इवातुरः; M5 इवांतरं (for इवात्वरः). ❀ Ca: इषुरिवान्तर इति यथा ईश्वरोऽन्तर्गतं एवमन्तर्गतं भूत्वा ब्रूयात्, न तु बाह्यवचनं वक्तव्यमित्यर्थः ॥ Cp (reading इष्टमिवांतरा; Cpp as in text): अन्तरा निकटे इष्टं प्रियं शनैर्ब्रूयात् । ❀ — Bo om. 20[c]–21[b].

21 For the repetition of 21[ab] in Ds1, cf. v. l. 20. Bo G3 om. 21[ab] (cf. v. l. 20). — [a]) D4–6. 9 अभुक्तवति (for नाभु°). B8 Ds2 D5. 6. 9 नाश्नीयाद् (for चाश्नी°). K1 नानुकुर्वंति चाश्नीयाद्; Da4 नाभुक्तवंती यवाश्नीयाद् (sic). — [b]) D5 अपीतमपि; D7 T G1–3. 6 M1. 6 न (G1. 2 M1. 6 ना-) पीतवति (for अपीत°). D7 चापिबेत्; G2 वा पि° (for नो पि°). — [c]) Ś1 K1. 2 अतिष्ठति; K4. 6. 7 V1 Bo. 6–9 Da3. a4 Dn1. n4 D8 D2–6. 8. 9 M7 Cv नातिष्ठति (for न तिष्ठति). Ś1 K1. 2. 4 च नासीत; K7 D4. 5. 9 तथा तिष्ठेन्; B7 D8 तथाशीत; Da4 यथासीत; M1. 6 तथासीनो (M6 °ने) (for °सीत). ❀ Cv: अतिष्ठति, निद्रातः उत्थानमकुर्वति सति, तथा, यथा निद्राभङ्गो न भवति तथा, आसीत । ❀ — [d]) Ds2 नास्वपे (for नासुप्ते). K7 D4. 9 M1. 6 प्रस्वपेच्च च; D5. 6 °पीति च; T2 °पेदपि; G2 °पेद्गुरौ (for °पेत च).

22 With 22, cf. Manu. 2. 72. For the sequence in M5, cf. v. l. 17. — [b]) D8 मृदुः (for मृदु). T2 स्पृशन् (for स्पृशेत्). — [c]) D7 दक्षिणां (for °णं). Da4 दक्षिणं दक्षिणे चैव. — [d]) K6 वामं (for सव्यं). K1

C. 12. 8845
B. 12. 243(?). 22
K. 12. 248. 22

उत्तानाभ्यां च पाणिभ्यां पादावस्य मृदु स्पृशेत् ।
दक्षिणं दक्षिणेनैव सव्यं सव्येन पीडयेत् ॥ २२
अभिवाद्य गुरुं ब्रूयादधीष्व भगवन्निति ।
इदं करिष्ये भगवन्निदं चापि कृतं मया ॥ २३
इति सर्वमनुज्ञाप्य निवेद्य गुरवे धनम् ।
कुर्यात्कृत्वा च तत्सर्वमाख्येयं गुरवे पुनः ॥ २४
यांस्तु गन्धात्रसान्वापि ब्रह्मचारी न सेवते ।
सेवेत तान्समावृत्त इति धर्मेषु निश्चयः ॥ २५
ये केचिद्विस्तरेणोक्ता नियमा ब्रह्मचारिणः ।
तान्सर्वाननुगृह्णीयाद्भवेच्चानपगो गुरोः ॥ २६
स एवं गुरवे प्रीतिमुपहृत्य यथाबलम् ।
आश्रमेष्वाश्रमेष्वेवं शिष्यो वर्तेत कर्मणा ॥ २७
वेदव्रतोपवासेन चतुर्थे चायुषो गते ।
गुरवे दक्षिणां दत्त्वा समावर्तेद्यथाविधि ॥ २८
धर्मलब्धैर्युतो दारैरग्नीनुत्पाद्य धर्मतः ।
द्वितीयमायुषो भागं गृहमेधिव्रती भवेत् ॥ २९

इति श्रीमहाभारते शान्तिपर्वणि चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३४ ॥

सव्येप- (for °न). M1. 5–7 पाणिना (for पीडयेत्).

23 For the sequence in M5, cf. v. l. 17. D8 om. 23^{b}–24^{a}. — ^{b}) K7 V1 Bo. 7. 8 D4. 9 अधीये; Da4 अधिष्व; Ds1 अधीस्व; D5 M1 °स्व (for °ष्व). Da4 G2 भगवान्. K6 अपि (for इति). — ^{d}) K7 D4 वा (for च). D5 transp. कृतं and मया. — After 23, K4. 6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 8 Kumbh. ed. ins.:

684* ब्रह्मंस्तदपि कर्तास्मि यद्भवान्वक्ष्यते पुनः ।

[B8 (marg.) यदपि (for त°). K6 वक्षते; D5 वांछते. K4 यद्भवान्कर्तुमर्हसि (for the post. half).]

24 D8 om. 24^{a} (cf. v. l. 23). K7 D4. 9 transp. 24^{ab} and 24^{cd}. — ^{a}) D8 repeats from सर्वं up to ख्येयं (in 24^{d}), after इति (in 25^{d}). D5 इदं कर्मम् (for इति सर्वम्). K7 D4. 9 अनुप्राप्य (for °ज्ञाप्य). — ^{b}) V1 Bo. 8 (marg.) Dn1. n4 Ds D2–4. 8 (both times) निवेद्य च यथाविधि. — ^{c}) V1 ततः (for च तत्). — ^{d}) D5 M5. 7 ततः (for पुनः).

25 For the repetition in D8, cf. v. l. 24. — ^{a}) K7 D4. 9 यस्तु (for यांस्तु). D5 ध्रियं गंधात्रसं चापि. — ^{c}) K6 Da4 D7 G3 सेवते (for सेवेत). V1 समावृत्य (for °वृत्त). — ^{d}) D8 om. from धर्मेषु up to चारिणः (in 26^{a}). Ś1 K1. 2 सर्वेषु; D7 T1 G1. 3. 6 धर्मस्तु (for धर्मेषु). T2 निश्चयं.

26 D8 om. 26^{ab} (cf. v. l. 25). — ^{c}) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 तान्सर्वानाचरेन्नित्यं. — ^{d}) K1. 2. 4 भवेश्च (for भवेच्च). K1 चानापगो; Dn4 च नियमो; D8. 9 वानपगो; G1 चानु° (for चान°). D5. 7 T1 G3. 6 भवेद्वानुपमो गुरोः (D5 °रौ; G3. 6 °रुः); G2 निवेद्य चांतिके गुरुः; M1. 5–7 भवेच्चानुवशो (M5 °शे) गुरौ (M5. 7 °रोः). ❀ Ca: अनपगः समीपस्थः ॥ Cp: नित्यानुवर्ती । ❀

27 ^{a}) D5 एवं च (for स एवं). — ^{b}) K6. 7 B6 D4–6 उप(K6 °पा)कृत्य; Bo. 7–9 Da3. a4 Dn4 Ds D2. 3. 7. 8 T G1–3. 6 M7 उपाहृ(D7 °वृ)त्य (for उप°). — ^{c}) K6 V1 B6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 आश्रमाद्; K7 D4. 5. 9 अगत्वा च; Bo अग्रास्येषु; D7 T G1–3. 6 M1. 5–7 अग्राम्येण (for the first आश्रमेषु). K6. 7 V1 Bo. 6. 7. 9 Dn1. n4 Ds D2–4. 6. 8. 9 एव (for एवं).

28 ^{a}) K2 T1 देव- (for वेद-). Ś1 K1. 2. 4. 7 D4. 9 -योगे(Ś1 °जे)न; D5 -वासी च (for -वासेन). — ^{b}) M1 चतुर्थश्च (for °र्थे). Da4 Ds1 D7 चायुषे; D2 स्त्वायुषो (for चा°). — ^{c}) T1 G1. 3. 6 दद्यात् (for दत्त्वा). — ^{d}) Bo Da4 समवर्तेद् (for समा°).

29 = (var.) 12. 235. 1. D5. 7 om. 29. — ^{a}) B9 कर्म- (for धर्म-). Ś1 K1 -लुब्धो (for -लब्धैर्). K1 दाने (for दारैर्). — K4 om. (hapl.) from 29^{b} up to 12. 235. 1^{c}. — ^{b}) T1 G3. 6 अग्निम् (for अग्नीन्). Ds D6 आहृत्य (for उत्पाद्य). K6 Bo. 6–9 Da3. a4 Dn1. n4 D2. 3. 8 T G1–3. 6 M1. 5–7 यत्नतः; Ds सुव्रतः (for धर्मतः). — V1 reads from 29^{c} up to 12. 235. 1^{d} on marg. — ^{c}) B8 चायुषो (for आ°). K2 Da4 द्वितीयमानुषो भागं. — ^{d}) K2 -मेधिव्रतो; V1 B6. 7. 9 T G1–3. 6 M1. 5–7 -मेधी व्रती (G1 M1 °तो); B8 -मेधे व्रती; Da4 -मेधी वृतो (for -मेधिव्रती). K7 Bo Dn1. n4 Ds D2–4. 8. 9 गृहमेधी भवेद्व्रती (K7 D4. 9 °दिति); D6 °मेधी गृहे वसेत्.

२३५

व्यास उवाच ।

द्वितीयमायुषो भागं गृहमेधी गृहे वसेत् ।
धर्मलब्धैर्युतो दारैरग्नीनुत्पाद्य सुव्रतः ॥ १
गृहस्थवृत्तयश्चैव चतस्रः कविभिः स्मृताः ।
कुसूलधान्यः प्रथमः कुम्भीधान्यस्त्वनन्तरम् ॥ २
अश्वस्तनोऽथ कापोतीमाश्रितो वृत्तिमाहरेत् ।
तेषां परः परो ज्यायान्धर्मतो लोकजित्तमः ॥ ३
षट्कर्मा वर्तयत्येकस्त्रिभिरन्यः प्रवर्तते ।
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रे व्यवस्थितः ।
गृहमेधिव्रतान्यत्र महान्तीह प्रचक्षते ॥ ४

C. 12. 8858
B. 12. 244(5). 5
K. 12. 249. 5

Colophon om. in K4; K3. 5 B1–5 Da1. a2 Dn2. n3 D1 G4. 5 M2–4 absent. V1 reads the colophon on marg. — *Sub-parvan :* Ś1 K1. 2. 6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2–9 T G1–3. 6 M1. 5–7 मोक्षधर्म. — *Adhy. name :* Ś1 K1. 2 शुकप्रश्नः; K6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds D2–6. 8. 9 शुकानुप्रश्नः; M1. 6. 7 ब्रह्मचारिवृत्तं; M5 शुकानुप्रश्ने ब्रह्मचर्याश्रमधर्मोपदेशः. — *Adhy. no.* (figures, words or both): K6 Dn4 Ds2 G2 68; Dn1 Ds1 D7 T1 G1. 3. 6 M5 69; D3 M1. 6. 7 67; T2 83. — *Śloka no.:* Dn1 D8 30; Da3 29.

235

1 = (var.) 12. 234. 29. With 1^{ab}, cf. Manu. 4. 1^{cd}. K4 om. 1^{abc} (cf. v. l. 12. 234. 29). K7 D4. 9 om. 1. V1 reads 1 on marg. G2 वेदव्यासः (for व्यास). D7 G1 transp. 1^{ab} and 1^{cd}. — ^{a}) D8 om. भागं. K1. 2 द्वितीयामायु(K1 °नु)षो भो(K2 भा)गं; M6. 7 °ये त्वा(M7 °येप्या)युषे भागं (M7 °गे). — ^{b}) D5 गृही (for गृहे). D6 भवेत्; T1 G1–3. 6 वसन् (for वसेत्). Ś1 K1. 2 गृहमेधिव्रतं चरेत्; D7 °मेधिव्रती भवेत्. — K1 reads 1^{cd} twice. — ^{c}) Ś1 K1 (both times) G3 -लुब्धैर्यं(G3 °र्यु)तो (for -लब्धैर्युतो). — ^{d}) D5. 7 अग्निम्. K6 B0. 6. 7. 8 (marg. as in text). 9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 आहृत्य (for उत्पाद्य). Ś1 K1 (both times). 2. 4 चार्चयेत्; Ds1 सुहृतः; D7 T G1–3. 6 M1. 5–7 यत्नतः (for सुव्रतः).

2 ^{a}) K7 D4. 5. 9 स्वेताश्च; T2 चैताश्च; M5 शस्ता (for चैव). — ^{b}) Ś1 K1 स्मृतः (for स्मृताः). G2 प्रशस्ताश्च विधित्सतां. — With 2^{cd}, cf. Manu. 4. 7^{ab}. — ^{c}) K7 V1 B0. 6. 7. 9 Da3. a4 Dn1. n4 Ds1. s2 (by corr. as in text) D4–6. 8. 9 Cp कुशूल- (for कुसूल-). Ś1 K1. 2. 4 -धान्याः; G2 -धान्यं (for -धान्यः). Ś1 K1. 2. 4 D6 प्रथमाः; G1–3. 6 M7 प्रथमं (for °मः). ❀ Cp : कुशूलः कुठलेति प्रसिद्धः । ❀ — ^{d}) K4 कुंभीर्; K6 V1 B7 Dn1. n4 D2. 3. 8 कुंभ-; D6 कुंभां (for कुम्भी-). D8 त्वतः परं; D5 T2 M1 त्वनंतरः (for °रम्). Ś1 K1. 2 कुंभीधान्यास्त्वनंतराः; G2 °न्यमनंतरं. ❀ Cp : कुम्भी क्षुद्रः कलशः । ❀

3 With 3^{ab}, cf. Manu. 4. 7^{cd}. — ^{a}) D6 अश्वतनो; G2 °स्थनो (for °स्तनो). ❀ Cn : कापोतीम् उञ्छवृत्तिम् । ❀ — ^{b}) D7 T G1. 3. 6 M1. 5–7 आस्थितो (for आश्रितो). K6 V1 B6. 7. 9 Da4 Ds D7 T G1–3. 6 Cp आहरन्; K7 D4–6. 9 M1 आचरेत् (for आह°). ❀ Cp : वृत्तिमाहरन्, कालमतिवाहयन् । ❀ — With 3^{cd}, cf. Manu. 4. 8^{cd}. — ^{c}) D7 T G1–3. 6 एषां (for तेषां). K6 परापरो; M6 परं परो (for परः परो). — ^{d}) D7 धर्मको; T1 G1 धार्मिको (for धर्मतो). Dn1. n4 D2. 3. 8 धर्म- (for लोक-). K6 Dn1 D2. 8 -वित्तमः (for -जित्तमः).

2 D6 om. up to सेवा (cf. v. l. 1). — ^a) K1 सेव्याश्रितेन; Da4 सेवासितेन; D5. 7 °मृतेन; G1 °श्रतेन (for °श्रितेन). ❀ Cn: सेवा, भक्तिध्यानरूपेश्वरप्रणिधानम् । [अ]श्रितेन, यत्किंचिदालम्बनमनाश्रितेन मनसा । ❀ — ^b) K1. 2 G1 वृत्त-; B9 D5. 7 M7 Cp वृत्तिर् (for वृत्ति-). K1. 2. 4 V1 T2 G3 -हीनेन; T1 G1 -हीनः स (for -हीनस्य). K1 शंस्यते; K2 शाम्यति; K4 शास्यते (for शस्यते). ❀ Cp: हीनस्य शूद्रस्य । ❀ — ^c) K2 corrupt; K6 द्विजाते; G2 सजाति- (for द्विजाति-). K1. 2. 4 Dn4 T G1. 3 -हीनान् (for -हस्तान्). K1 न वृत्ता; K2 निवृत्ता; K6 निवृत्तान्; Da4 निर्वृता; Dn4 D5. 7 T2 G2 M1. 5–7 निर्वृत्तान्; D8 त्रैवृत्ताद् (for निर्वृत्ता). ❀ Cn: हे द्विज । अतिहस्तः, अतिक्रान्तकर्मा ब्रह्मवित् । तं प्राप्य निर्वृत्ता निष्पन्ना । ❀ — ^d) D4 om. from न तु up to पुण्ये in (3^d). K1 न वै; K2 न च; Da4 G1. 3 न तु; Dn4 न*; D8 तं तु (for न तु). K1 तुल्य-; K2. 4 V1 तुल्याः; K6 तुल्यान्; G2 Cp (Cpp as in text) तुल्या (for तुल्यात्). K6 V1 Bo. 6. 8. 9 Dn1 Ds1 D2. 3. 6. 8 M1. 7 Cpp परस्परात्; B7 Da3. a4 परंपरात्; G2 परस्परान् (for °रम्). ❀ Cn: परोक्षज्ञानिनां न परस्परोपदेशेऽधिकारः, किं स्वपरोक्षज्ञान्येव उपदेष्टा युक्त इत्यर्थः ॥ Cp: ते द्विजातयः परस्परं तुल्या न भवन्ति । अतः ब्राह्मणसेवायां संभवत्यां नान्यौ सेवनीयौ । ❀

3 D4 om. up to पुण्ये (cf. v. l. 2). — ^a) K1 -सुसुलं (sic) (for -सुलभं). K1. 2. 4 त्यक्त्वा (for लब्ध्वा). — ^b) K1 यो वः कर्षेद्; K2. 4 योवकर्षेद्; K6 नाव*र्षेद्; B8 T G2. 3 M1. 5–7 नापकर्षेद्; Da3 नावकार्षीद्; Da4 corrupt; D5. 7 नोपकर्षेद्; D9 योप°; G1 नापकर्षे (for नावकर्षेद्). ❀ Cn: न अवकर्षेत्, विषयसेवनैनं नाशयेत् ॥ Cp: पापाचरणेन क्षीणं न कुर्यात् । ❀ — ^c) B8 (marg.) Da3. a4 उत्कर्षार्थे; D5. 7 °र्षाय (for °र्षार्थं). Ds1 Bom. Cal. ed. प्रयतेत (for °तते). — ^d) K1 पुनः (for नरः). Da3 (also as in text) कर्मं च (for कर्मणा). — After 3, D7 reads 5^{cd}.

4 D6 om. (hapl.) 4^a–5^b. V1 reads 4^a–5^b on marg. — ^a) Bo. 6. 7. 8 (marg.) D2. 3. 8 Da3. a4 Dn1. n4 D8 हि; T2 G2 वि- (for ऽपि). ❀ Cn: वर्णेभ्योऽपि परिभ्रष्टः, वर्णसंकरजो वेत्यर्थः ॥ Cn: वर्णेभ्यो, वृत्रगीतासूक्तेभ्यः षड्भ्यः, कृष्णधूम्रनीलरक्तहारिद्रशुक्लेभ्यः, सत्वरजस्तमसां ह्रासवृद्धितारतम्यात्कल्पितेभ्यः (cf. 12. 271. 33ff.) । ❀ — ^b) K4. 6. 7 Bo. 6–9 Dn1. n4 D8 D2. 3. 5. 7. 8 न (for स). D5. 7 हि (for वै). K6 सन्मानम्; K7 समानम् (for संमानम्). Da3 न वै स मानमर्हति; Da4 नावसंमानमर्हति. — ^c) Da3 D4 G1 न तु; T1 नित्यं (for न तु). G2 यत् (for यः). K1 सत्क्रिया; Da3. a4 स क्रियां (for सत्क्रियां). ❀ Cp: सत्क्रियां, ब्राह्मणसंस्कारम् ॥ Cs: उपनयनादिसंस्कारः सत्क्रिया, ताम् । ❀ — ^d) T1 राजस्वं (for राजसं). B6. 7. 8 (marg. as in text). 9 Da3. a4 लोके सत्कर्म सेवते.

5 D6 om. 5^{ab} (cf. v. l. 4). V1 reads 5^{ab} on marg. K1. 2. 4. 7 D4. 9 T1 om. (hapl.) 5^{cd}. D7

दुर्लभं तमलब्धा हि हन्यात्पापेन कर्मणा ॥ ५
अज्ञानाद्धि कृतं पापं तपसैवाभिनिर्णुदेत् ।
पापं हि कर्म फलति पापमेव स्वयं कृतम् ।
तस्मात्पापं न सेवेत कर्म दुःखफलोदयम् ॥ ६
पापानुबन्धं यत्कर्म यद्यपि स्यान्महाफलम् ।
न तत्सेवेत मेधावी शुचिः कुसलिलं यथा ॥ ७
किंकष्टमनुपश्यामि फलं पापस्य कर्मणः ।
प्रत्यापन्नस्य हि सतो नात्मा तावद्विरोचते ॥ ८
प्रत्यापत्तिश्च यस्येह बालिशस्य न जायते ।
तस्यापि सुमहांस्तापः प्रस्थितस्योपजायते ॥ ९
विरक्तं शोध्यते वस्त्रं न तु कृष्णोपसंहितम् ।
प्रयत्नेन मनुष्येन्द्र पापमेवं निबोध मे ॥ १०
स्वयं कृत्वा तु यः पापं शुभमेवानुतिष्ठति ।
प्रायश्चित्तं नरः कर्तुमुभयं सोऽश्नुते पृथक् ॥ ११

C. 12. 10734
B. 12. 292[1]. 11
K. 12. 297. 11

---

reads 5^{cd} after 3. Da4 G2 read 5^{cd} twice. —^{c}) V1 Bo. 6–9 Dn1 D8 G2 (both times) तमलब्ध्वा (Dn1 °ब्धो); T2 G1. 3 M1. 5–7 जन्म लब्ध्वा (M1. 5. 6 °ब्धा) (for तमलब्धा). D5. 7 दुर्लभं तु पुनर्लब्ध्वा; D6 दुर्लभं तमलं लब्ध्वा. —^{d}) B7 पुण्यात् (for हन्यात्). K6 V1 Bo. 6. 7. 8 (marg.). 9 G2 (both times) पुण्येन (for पापेन). D5. 7 हंत्यपुण्येन कर्मणा; T2 G1. 3 M1. 5. 6 न हन्यात्पापकर्मणा. ❀ Ca: हन्यात्, गच्छेत् प्राप्नुयात् । ❀

6 ^{a}) D5. 7 अज्ञानाधि-; G1. 3 अथ बुद्धि- (for अज्ञानाद्धि). —^{b}) M1. 5–7 आहिंसा (for तपसा). Da3. a4 D4 [इ]व (for [ए]व). K6. 7 [अ]पि निर्नुदेत्; B8 (marg. as in text) D5. 7 T1 G1. 3 [अ]भि(T1 G1 [अ]पि)निर्दहेत्; Da3. a4 Dn4 Ds1 D4. 9 T2 G2 M7 [अ]भि(Da3. a4 °ति-; G2 °हि)निर्नुदे(D4 °द)त्; D8 °निर्नुदेत् (for °निर्णुदेत्). ❀ Cs: तपसा, प्रायश्चित्तरूपेण । ❀ —^{f}) T पाप- (for दुःख-). K7 -फलोदयः; B8 (marg.) -फलप्रदं (for -फलोदयम्).

7 ^{a}) K7 D4. 9 पापानुबंधि; D5. 7 G3 °बद्धं (for °बन्धं). D6 सर्वं च (for यत्कर्म). G2 M1. 5–7 पापानुबंधनं कर्म. —^{b}) K2 फलोदयं (for महाफलम्). —^{c}) K4 Bo. 7–9 Da3 Dn1. n4 Ds D2. 3. 5–8 तन्न (by transp.). —^{d}) K7 D4 (also as in text). 9 हंसः (for शुचिः). K4 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3 Cn (gloss: कारुकं चण्डालविशेषम्) कुशालिनं (for कुसलिलं). K1 तथा (for यथा).

8 ^{a}) K7 D4. 9 धिक् (for किं-). ❀ Cn: कुत्सितं च तत् कष्टं च किंकष्टम् ॥ Cs (reading: किं कष्टमनु पश्यामि): कष्टमनु किं पश्यामि, कृच्छ्रमनुकृत्य वर्तमानपापस्य कर्मणः फलं किं पश्यामि, न किमपीत्यर्थः । ❀ —^{c}) K1. 2. 4. 7 Bo. 9 Dn4 Ds D4. 5. 7. 9 G2 प्रत्यासन्नस्य; G3 °नन्नस्य (sic) (for °पन्नस्य). K7 मतो; Bo. 6–8 Da3. a4 Dn1. n4 Ds D2. 3. 5–8 G3 ततो; G1 यतश्चो (hypermetric); G3 M1. 5–7 यतो (for सतो). ❀ Ca: प्रत्यापन्नस्य, तत्त्वज्ञानात्संयोगहेतुतो निवृत्तस्य ॥ Cp: प्रत्यापन्नस्य, सर्वतो विरक्तस्य ॥ Cs: प्रत्यापन्नस्य, अनुतापेन पापान्निवृत्तस्य ॥ Cv: प्रत्यापन्नस्य, प्रत्यापत्तिमतः, ज्ञानिन इत्यर्थः । ❀ —^{d}) T2 नाम्ना (for नात्मा). K2 तानुद्विरोचते (sic); K6 Ds2 D3 T G1–3 तावद्वि रो°; V1 तावद्विमुच्यते; Da4 जाचद्विरोचते (sic); D4 तावद्विरावते.

9 ^{a}) K6 D6 Cp प्रत्याश(D6 Cp [gloss: संसारात्प्रातिकूल्येन निवृत्तिः, वैराग्यम्] °स)त्तिश्च (for °पत्तिश्च). D8 प्रत्यापन्नस्य चात्मापि. ❀ Cn: प्रत्यापत्तिः, वैराग्यम् । ❀ —^{b}) D4 बालिशश्च (for °शस्य). D5. 7 तु (for न). D5 रोचते (for जायते). —^{d}) ❀ Ca: प्रस्थितस्य, मरणदशापन्नस्य ॥ Cn: प्रस्थितस्य, योगे प्रवृत्तस्य, उत्तरभूम्यलाभात्तापो जायते । प्रस्थितस्य, मृतस्य वा तापो नरकजः ॥ Cs: प्रस्थितस्य, परलोकं गतस्य । ❀

10 ^{a}) K1 D4. 9 विरागं (for विरक्तं). Bo सोध्यते (sic); D7 साध्यते (for शो°). ❀ Cn: विरक्तं, स्वतःशुद्धं तद्विपरीतेन रागेणाक्रान्तम् ॥ Cp: विरक्तं किंचिन्मलिनम् । कृष्णेन अत्यन्तमालिन्येनोपसंहितम् ॥ Cv: विरक्तं, विशेषेण रजसा युक्तम् । ❀ —^{b}) D4 न नु (for न तु). K6 कष्टोप-; G3 Cn कृष्णेन (for कृष्णोप-). K2. 4 -बृंहितं; K6 G3 -सेवितं (for -संहितम्). ❀ Cn: कृष्णेन, भल्लातकेन उपसंहितं रक्तं न शोध्यते । ❀ —^{c}) Ds1 प्रयत्नेन (for प्रयत्नेन). K1. 2. 7 D4. 9 G2 मनुष्येण (for मनुष्येन्द्र). —^{d}) K6 B9 Da3. a4 T2 G1. 2 M1. 5. 6 एव (for एवं). T1 निबोधत (for °ध मे).

11 ^{a}) G2 यं (for यः). —^{b}) G3 शुभमेव निबोध मे. —^{c}) G2 कृत्सुम् (for कर्तुम्). —^{d}) K1. 7 V1 D4. 5. 7. 9 M6 अभयं (for उभयं). K1. 2. 4 V1 B8 फलं (for पृथक्).

12 ^{a}) Da3. a4 अज्ञानत्वे; D5. 7 °नात्तु-; G1 अहिंसात्तु (for अज्ञानात्तु). K2. 6 Da3. a4 Dn4 Ds1 कृता (for कृतां). —^{b}) Ds1 अहिंसां. K1. 2. 4. 7 D4. 8

C. 12. 10724
B. 12. 292(1). 12
K. 12. 297. 12

अज्ञानात्तु कृतां हिंसामहिंसा व्यपकर्षति ।
ब्राह्मणाः शास्त्रनिर्देशादित्याहुर्ब्रह्मवादिनः ॥ १२
तथा कामकृतं चास्य विहिंसैवापकर्षति ।
इत्याहुर्धर्मशास्त्रज्ञा ब्राह्मणा वेदपारगाः ॥ १३
अहं तु तावत्पश्यामि कर्म यद्वर्तते कृतम् ।
गुणयुक्तं प्रकाशं च पापेनानुपसंहितम् ॥ १४
यथा सूक्ष्माणि कर्माणि फलन्तीह यथातथम् ।
बुद्धियुक्तानि तानीह कृतानि मनसा सह ॥ १५
भवत्यल्पफलं कर्म सेवितं नित्यमुल्बणम् ।
अबुद्धिपूर्वं धर्मज्ञ कृतमुग्रेण कर्मणा ॥ १६
कृतानि यानि कर्माणि दैवतैर्मुनिभिस्तथा ।
नाचरेत्तानि धर्मात्मा श्रुत्वा चापि न कुत्सयेत् ॥ १७
संचिन्त्य मनसा राजन्विदित्वा शक्तिमात्मनः ।
करोति यः शुभं कर्म स वै भद्राणि पश्यति ॥ १८
नवे कपाले सलिलं संन्यस्तं हीयते यथा ।
नवेतरे तथाभावं प्राप्नोति सुखभावितम् ॥ १९

[अ]व्यपकर्षति (for व्यप°). D_6 व्यपकर्षति ब्राह्मणः; G_2 तपः कृत्वापकर्षति. ❀ Cn: अहिंसा, अहिंसया । तृतीयालोप आर्षः । ❀ — K_7 om. (hapl.) 12^c–13^b. —^{c}) K_6 ब्रह्मणा; V_1 $B_{0.6}$ D_{s1} $D_{5.7}$ G_2 ब्राह्मणः; B_{7-9} $D_{a3.a4}$ $D_{n1.n4}$ D_{s2} D_3 $M_{1.5-7}$ Cn (gloss: वेदसंबन्धिनः) ब्रह्मणः. D_6 शास्त्र- (for शास्त्र-). D_{a4} -निदेशो (for -निर्देशाद्).

13 K_7 om. 13^{ab} (cf. v. l. 12). —^{a}) K_6 $B_{7.8}$ (marg.) D_{a4} Cp यथा-; D_{s2} तया; $M_{1.5-7}$ कथा- (for तथा). D_{a4} अपकृतं; D_2 Cn कर्म कृतं; $D_{5.7}$ $G_{1.3}$ कामकृतां; T_1 कर्मकृतां; Cv कामकृता (for कामकृतं). K_4 B_0 $D_{n1.n4}$ $D_{2.3.6.8}$ Cn नास्य; D_4 वास्य; T_1 चापि; $G_{1.3}$ चैव; Cnp चास्य (as in text). —^{b}) $G_{1.3}$ ह्यहिंसा (for विहिंसा). D_{a4} D_4 [ह्]त्र (for [ए]व). $B_{0.8}$ (marg.)$._9$ $D_{n1.n4}$ D_8 $D_{2.3.6.8}$ [अ]नुकर्षति; D_5 [उ]प°; D_7 [उ]पपद्यति (for [अ]पकर्षति). ❀ Cp: अपकर्षति, फलतो भ्रंशयति । ❀ —^{c}) B_0 $D_{n1.n4}$ D_8 $D_{2.3.5.6.8}$ ब्रह्मशास्त्रज्ञा (for धर्म°).

14 ^{a}) B_8 तात (for तावत्). —^{b}) D_{a1} कथं (for कर्म). K_1 यन्निवदते; K_2 यद्विंदते; $K_{6.7}$ D_5 यद्वर्धते; D_{a3} $D_{4.9}$ यद्वर्तें($D_{4.9}$ °र्तं)ते; T_1 -द्वय-कृतं (for यद्वर्तते). K_7 $D_{5.7.9}$ शुभं; $D_{a3.a4}$ पृथक् (for कृतम्). —^{c}) G_1 गुणयुक्त-; Cs (gloss: गुणो यथाविध्यनुष्ठानं, तेन युक्तम्) °युक्तं (as in text). K_6 V_1 $B_{0.6.7.9}$ $D_{a3.a4}$ $D_{n1.n4}$ D_3 (marg. as in text)$._6$ G_2 वा (for च). ❀ Cn: प्रकाशं, बुद्धिपूर्वकं प्रकाश्य, ज्ञात्वा । णमुलन्तमिदम् । ❀ —^{d}) T_2 पाशेन (for पापेन). D_8 पापमेवानुसंहितं.

15 ^{a}) D_8 T $G_{1.3}$ Cs तथा (for यथा). K_7 D_9 शूक्ष्माणि. —^{b}) G_2 फलवंति (for फलन्तीह). $K_{1.2.4}$ D_{a4} D_4 यथातथा; B_8 (marg.) यथासुखं; D_{s1} Cs तथातथं; T_1 तथा सुखं (for यथातथम्). —^{c}) K_7 $D_{4.5.7.9}$ बुद्धिपूर्वाणि; T तानि बुद्धानि (T_1 °द्ध्वाति) (for बुद्धियुक्तानि). D_8 D_2 T_2 $G_{1.3}$ यानि (for तानि).

16 ^{a}) K_4 D_{a3} न भवत्यफलं कर्म; B_8 (marg. as in text) भवत्यति°; D_{a4} D_{s2} न भवत्यल्पफलं कर्म (hypermetric); D_6 भवत्यस्य फ°; G_2 फलत्यल्पफ°. —^{b}) K_1 सेवतो; K_2 सेवते; G_{1-3} सेवितुं (for सेवितं). K_1 अज्वलं; T_1 $G_{1.3}$ उद्बणं (for उल्बणम्). ❀ Cn: नित्यम्, अव्यभिचारिफलम् । उल्बणं, नरकावहम् । ❀

17 ^{a}) G_2 तानि (for यानि). —^{b}) K_2 देवतैर् (for दैवतैर्). —^{c}) D_{a4} D_{n1} न चरेत्; D_{n4} नाचरत् (for नाचरेत्). —^{d}) K_2 कृत्वा (for श्रुत्वा). D_7 वा (for च). D_{n4} कुत्सहेत्; G_1 कुत्सये (sic) (for कुत्सयेत्).

18 ^{a}) D_4 संवित्यं (sic); T_1 पूर्वं तु (for संचिन्त्य). D_6 तं च संचिंत्य मनसा. —^{b}) $D_{n1.n4}$ भाव्यम्; $G_{1.3}$ शांतिम् (for शक्तिम्). —^{c}) $G_{1.3}$ यत् (for यः). —^{d}) D_{a4} सर्वं; D_9 सदा (for स वै). $K_{1.2}$ कर्माणि (for भद्राणि). D_{a4} पश्यत.

19 ^{ab}) K_4 न वै; $D_{a3.a4}$ D_8 नरे; D_4 नव- (for नवे). T_2 कपाते (for कपाले). $K_{1.2.4}$ संन्यस्तं सलिलं (by transp.). K_6 सदा; T_1 $G_{1.3}$ तथा (for यथा). —^{c}) D_{n4} D_{s1} $D_{3.5.7}$ G_{1-3} Cs न चेतरे (for नवेतरे). K_6 B_8 (marg. as in text) D_{s2} $D_{5.7}$ Cs यथाभावं; G_2 $M_{1.5-7}$ तथाभावान् (for °भावं). ❀ Cn: तथाभावम्, यथा पूर्वरूपं स्थितं तथारूपत्वमेव ॥ Cs: इतरे पुराणे संन्यस्तं सलिलं यथा अभावं, हीनत्वं नाप्नोति । ❀ —^{d}) $K_{1.2.4}$ करोति; V_1 $D_{4.9}$ T $G_{1.3}$ नाप्नोति; $B_{6.9}$ $D_{a3.a4}$

सतोयेऽन्यत्तु यत्तोयं तस्मिन्नेव प्रसिच्यते ।
वृद्धे वृद्धिमवाप्नोति सलिले सलिलं यथा ॥ २०
एवं कर्माणि यानीह बुद्धियुक्तानि भूपते ।
नसमानीह हीनानि तानि पुण्यतमान्यपि ॥ २१
राज्ञा जेतव्याः सायुधाश्चोन्नताश्च
सम्यक्कर्तव्यं पालनं च प्रजानाम् ।
अग्निश्चेयो बहुभिश्चापि यज्ञै-
रन्ते मध्ये वा वनमाश्रित्य स्थेयम् ॥ २२
दमान्वितः पुरुषो धर्मशीलो
भूतानि चात्मानमिवानुपश्येत् ।
गरीयसः पूजयेदात्मशक्त्या
सत्येन शीलेन सुखं नरेन्द्र ॥ २३

C. 12. 10746
B. 12. 292(1). 23
K. 12. 297. 23

इति श्रीमहाभारते शान्तिपर्वणि अशीत्यधिकद्विशततमोऽध्यायः ॥ २८० ॥

G2 (marg.) M1. 5–7 आप्नोति (for प्राप्नोति). K7 सुखभाविनं; D5. 7 °भाविते; G2 °भागिंति; M1. 5–7 °भाविनः (for °भावितम्).

20 K1. 2. 4 V1 B0. 6–9 D2. 3. 6. 8 Da3. a4 om. (? hapl.) 20[a]–21[b]. K6 om. 20. — [a]) K7 D4. 9 सत्तोये (for सतोये). G1 तोयेन (for यत्तोयं). — [b]) K7 D4. 9 T G1. 3 प्रसिध्यति (T2 °ते) (for प्रसिच्यते). — [c]) Dn4 वृद्ध-; D5 वृद्धिं; D7 T2 G1. 2 M1. 5–7 तद्वि-; T1 G3 तद्वद् (for वृद्धे). D8 वृद्धम् (for वृद्धिम्). — [d]) K7 शलिले शलिलं यथा; D4. 5. 7 सलिलं सलिले यथा; T G1–3 M1. 5–7 सलिलं पुरुषर्षभ.

21 K1. 2. 4 V1 B0. 6–9 D2. 3. 6. 8 Da3. a4 om. 21[ab] (cf. v. l. 20). — [a]) G1. 3 जानीहि (for यानीह). — [b]) T2 G1. 2 M1. 5. 6 वृद्धि(M1 °द्ध)युक्तानि (for बुद्धि°). K6. 7 Dn1. n4 D8 D4. 5. 7. 9 पार्थिव (Ds1 °वः) (for भूपते). — [c]) K4 न समानो ह हीनाति (sic); K6 न समानि महीपाल; K7 V1 B0. 6. 8. 9 Da3. a4 Dn1. n4 D8 D2. 3. 6. 8 स(D6 सा)मानि (Da4 °नी) चैव यानीह; B7 समा हि चैव जानीह; D4. 5. 7. 9 न समानि न हीनानि; T1 G1. 3 समानानीह (G1 °नि वि-) हीनानि. — [d]) K1. 2. 4 नाति-; G2 बहु- (for तानि). K2 V1 च (for [अ]पि).

22 [a]) K2. 7 राजा (for राज्ञा). K6 B0. 6–9 Da3. a4 Dn1. n4 D2. 3. 5–8 शत्रवश् (for सायुधाश्). ❀ C3: सायुधाः, हिंसापराः । उन्नताः, उत्पथगामिनः । ❀ — [b]) B8 हि (for च). G2 द्विजानां (for प्रजानाम्). — [c]) K6 Da4 अग्निं (for अग्निश्). K7 चेज्यो; Da3 चेड्यो; D7 T G1. 3 M1. 5–7 चेतव्यो (for चेयो). D4 यज्ञे. — [d]) Da3 Dn1. n4 D2. 6. 8 अंत्ये (for अन्ते). K7 Da4 D4. 9 वाचम् (for वा वनम्). K7 D4. 5. 7. 9 आस्थाय (for आश्रित्य). K1. 2. 4 आसेवितव्यं; Da4 आश्रितस्थे (for आश्रित्य स्थेयम्). B7 स्तेयं; D5. 7 तिष्ठेत्; T1 सेव्यं (for स्थेयम्).

23 [a]) Da4 यदन्वितः; Dn4 D5. 7 G1 दया°; G3 यदा° (for दमा°). D7 दानशीलो (for धर्म°). — [b]) K1. 2 V1 D5. 7 M1 [अ]नुपश्येन्; Ds1 [अ]नुपश्येत; T2 [अ]भिपश्येत् (for [अ]नु°). — [c]) K6 गरीयशः; Da3 °यस्यः (sic); D6 गरीयः (for गरीयसः). K1. 2 पूजयन् (for °येद्). K7 V1 B6. 7 Da3. a4 D4. 5. 7. 9 T G1. 3 M1. 5–7 चात्मशक्त्या; B8 (marg.) चापि शक्त्या (for आत्मशक्त्या). — [d]) B9 सुखान्; M6 सखे (for सुखं). Da3. a4 D4. 5. 7. 9 G1 नरेंद्रः; Ds2 नरेंद्रं.

Colophon. Ś1 G6 missing: K3. 5 B1–5 Da1. a2 Dn2. n3 D1 G4. 5 M2–4 absent. — *Sub-parvan:* K1. 2. 4 B0. 6–9 Da3. a4 Dn1. n4 D8 D2–9 T G1–3 M1. 5–7 मोक्षधर्म. — *Adhy. name:* K1. 2. 4. 6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2–9 पराशरगीता; T1 पापक्षयलक्षणं; M5. 6 पराशरगीतासु शुभकर्मप्रशंसनं. — *Adhy. no.* (figures, words or both): B7 T1 G1. 3 115; Dn1 117; Dn4 Ds2 M5. 6 116; D8 1011 (sic); T2 128; G2 131; M1. 7 114. — *Śloka no.:* Dn4 23

२८१

C. 12. 10747
B. 12. 293(2). 1
K. 12. 298. 1

पराशर उवाच ।

कः कस्य चोपकुरुते कश्च कस्मै प्रयच्छति ।
प्राणी करोत्ययं कर्म सर्वमात्मार्थमात्मना ॥ १
गौरवेण परित्यक्तं निःस्नेहं परिवर्जयेत् ।
सोदर्यं भ्रातरमपि किमुतान्यं पृथग्जनम् ॥ २
विशिष्टस्य विशिष्टाच्च तुल्यौ दानप्रतिग्रहौ ।
तयोः पुण्यतरं दानं तद्द्विजस्य प्रयच्छतः ॥ ३
न्यायागतं धनं वर्णैर्न्यायेनैव विवर्धितम् ।
संरक्ष्यं यत्नमास्थाय धर्मार्थमिति निश्चयः ॥ ४
न धर्मार्थी नृशंसेन कर्मणा धनमर्जयेत् ।
शक्तितः सर्वकार्याणि कुर्यान्नर्द्धिमनुस्मरेत् ॥ ५
अपो हि प्रयतः शीतास्तापिता ज्वलनेन वा ।
शक्तितोऽतिथये दत्त्वा क्षुधार्तायाश्नुते फलम् ॥ ६
रन्तिदेवेन लोकेष्टा सिद्धिः प्राप्ता महात्मना ।
फलपत्रैरथो मूलैर्मुनीनर्चितवानसौ ॥ ७
तैरेव फलपत्रैश्च स माठरमतोषयत् ।

281

☞ This adhy. is missing in Ś1 G6 (cf. v. l. 12. 274. 13; 259. 1).

1 Ds1 om. the ref. — a) D5. 7 कस्मै (for कस्य). Dn1 वा (for च). — b) G2 किल (for कश्च). G1 तस्मै (for कस्मै). — d) K1. 2. 4 B6. 9 Ds2 D2 Cs (Csp as in text) आत्मानम् (for °र्थम्). D5. 7 T G1. 8 आत्मनः (for °ना).

2 a) K2 गौरवेन. — b) K7 B6-9 D3-5. 7. 9 T1 G3 निस्नेहं. — c) K6 D8. 9 सौदर्यं (for सो°). T G1. 8 वा सुतम् (for भ्रातरम्).

3 a) Ds1 विसिष्टस्य; Cp विशिष्टाय. K1. 2. 4 M7 विशिष्टाद्; Da4 D7 °ष्टस्; Ds1 विसिष्टाच् (for विशिष्टाच्). — b) G1. 8 तुल्य-; G2 तुल्ये (for तुल्यौ). B9 -परिग्रहौ; Da3. a4 -प्रतिश्रयौ; G3 प्रतिग्रहे. — c) D5. 7 ततः; G3 तस्य (for तयोः). K7 पुण्येतरं. Da4 गृहौ तयोः पुण्यतरं. — d) K1. 2 त(K2 य)द्विषस्य; M1. 6. 7 सद्विजस्य (for तद्वि°). K6 प्रयच्छत; B7 °च्छति; D8 T G1. 8 M1. 6-7 प्रतीच्छतः (for प्रय°).

4 a) K1. 2. 4 न्यायगतं; K6 न्यायायुतं (for °गतं). Da3 धने (for धनं). K6 B6. 7. 8 (marg.) Da3. a4 D2. 8 G1 वर्णे; Dn1. n4 चैव; Ds1 lacuna; D6 वर्ण्यैर् (for वर्णैर्). — b) G2 विवर्धनं (for °र्धितम्). — c) K7 संरक्ष्य; Da4 Dn4 D2. 4. 7 °क्षन् (for °क्ष्यं). K7 D4. 5. 7. 9 धर्मम्; G1 यज्ञम् (for यत्नम्). — d) D7 निश्चितः; T1 निश्चयं; G2 निश्चितं (for निश्चयः).

5 a) Da4 corrupt. K7 D9 G2 धर्मार्थं; T धर्माय; Cp °र्थौ (for °र्थी). K6 नृशंस्येन. — b) D7 धर्मणा (for क°). D6 अर्जेति; T2 G1. 2 M7 आर्जयेत्. — d) D5. 7 कुर्वन् (for कुर्यान्). V1 D7 वृद्धिम्; D6 बुद्धिम्; T1 G1. 8 सिद्धिम् (for नर्द्धिम्). K1. 2. 4 अनुस्मरन्.

6 a) K1 अहो; K7 Da3 Dn4 Ds1 D6 आपो (for अपो). K1. 7 B8 (marg.) D4. 9 T G3 M7 [s]पि; G1. 2 M6 वि- (for हि). K1. 2. 4 पूयतः; V1 B6 D8 D5. 7 T2 G1. 8 प्रयताः; D6 प्रथितः (for प्रयतः). — b) K4 तापित्वा; D4 तोषिता (for तापिता). V1 D5. 7 च (for वा). — c) G1 शक्तितोतिथियो दद्यात् (sic). — d) K7 श्रुते (for [अ]श्नुते).

7 For the incident, cf. 12. 226. 17: B. 13. 137. 6: B. 14. 90. 97-98. — a) K7 B9 Da3. a4 D4. 5. 9 लोकेषु (for °ष्टा). D7 चरंति देवलोकेषु. — b) Dn1 गतिः (for सिद्धिः). — c) K1. 2. 7 B8 Da4 फलैः (for फल-). G1 -पुत्रैर् (for -पत्रैर्). — d) K6 B6. 7. 9 Da3. a4 G2 तु सः; V1 B0 Dn1. n4 D8 D2. 3. 6. 8 M1. 6-7 च सः (for असौ). D7 मुनिमर्चितमानसौ (sic).

8 b) K1. 2. 4 D3. 6 G2 स मातरम्; V1 B0 D7 स माचरम्; B9 समां परम्; Da4 समावरम्; T G3 सम्यग्देवान् (for स माठरम्). K1 B7 अथोषयत्; Ds1 अतोषयेत्. K7 D4. 9 स साधून्स(K7 °धु स)मतोषयत्; G1 मनुष्यत्वमनुस्मरेत्. ❀ Cn (reading समाठरम्): समाठरं, माठरेण पारिपार्श्विकेण सहितं समाठरं सूर्यम् । माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः इत्यमरः (1. 31) ॥ Cs: माठरो नाम कश्चिदृषिः । ❀ — c) K7 लाभे; Da3 लोभे; D9 लोक- (for लेभे). K2 D4 पर-; Da4 परि- (for

तस्माल्लेमे परं स्थानं शैब्योऽपि पृथिवीपतिः ॥ ८
देवतातिथिभृत्येभ्यः पितृभ्योऽथात्मनस्तथा ।
ऋणवाञ्जायते मर्त्यस्तस्मादनृणतां व्रजेत् ॥ ९
स्वाध्यायेन महर्षिभ्यो देवेभ्यो यज्ञकर्मणा ।
पितृभ्यः श्राद्धदानेन नृणामभ्यर्चनेन च ॥ १०
वाचः शेषावहार्येण पालनेनात्मनोऽपि च ।
यथावद्भृत्यवर्गस्य चिकीर्षेद्धर्ममादितः ॥ ११
प्रयत्नेन च संसिद्धा धनैरपि विवर्जिताः ।
सम्यग्घुत्वा हुतवहं मुनयः सिद्धिमागताः ॥ १२
विश्वामित्रस्य पुत्रत्वमृचीकतनयोऽगमत् ।
ऋग्भिः स्तुत्वा महाभागो देवान्वै यज्ञभागिनः ॥ १३
गतः शुक्रत्वमुशना देवदेवप्रसादनात् ।
देवीं स्तुत्वा तु गगने मोदते तेजसा वृतः ॥ १४
असितो देवलश्चैव तथा नारदपर्वतौ ।
कक्षीवाञ्जामदग्न्यश्च रामस्ताण्ड्यस्तथांशुमान् ॥ १५
वसिष्ठो जमदग्निश्च विश्वामित्रोऽत्रिरेव च ।

C. 12. 10778
B. 12. 293(2). 16
K. 12. 298. 16

परं). —^{d}) K7 शैब्या; V1 सैब्यो; Da4 शैब्या; D7 सेब्यो (for शैब्यो). Da4 G1 पृथिवीपते.

9 ^{a}) T G1. 3 देवर्ष्यतिथि- (for देवता°). K3 -पित्रे-भ्यः; B8. 9 D8 -भूतेभ्यः; T1 -मर्त्येभ्यः (for -भृत्येभ्यः). —^{b}) B0. 7. 8 (marg. as in text) Dn1. n4 D3. 8. 6. 8 च (for ऽथ). D8 पितृभ्यश्च तथात्मनः. — K1 om. 9^{c}–10^{b}. —^{c}) Da4 मर्त्यैस् (for मर्त्यस्). —^{d}) G3 corrupt.

10 K1 om. 10^{ab} (cf. v. l. 9). —^{a}) D5. 7 मनुष्येभ्यो; G1. 8 मनीषिभ्यो (for महर्षिभ्यो). —^{c}) K3 श्राद्धधानेन; Dn4 श्रद्धधानेन. —^{d}) K1 अभ्यर्च्यनेन; K6 B8. 9 Da3. a4 °र्चितेन; G2 अध्ययनेन (for अभ्यर्च°).

11 ^{a}) B6 (marg.). 7. 9 Dn1. n4 M1. 5–7 Cs वाचा; T1 पाक- (for वाचः). K1 corrupt; K2. 4 वाचः श्रेष्ठावहार्येण; K7 D4. 9 वाचा शय्यासनाद्येन; Da4 वाचः शेषसहार्येण; D5. 7 Ca (gloss: शेषापहारेण, प्रतिज्ञातार्थनिर्वाहकत्वेन) वाचा (D7 Ca °चो-) शेषापहारेण; D6 वाचः शेषोपहार्येण; T2 पाकशेषाप(*sup. lin.* °न्वा)हार्येण; G1 पाकशेषावभार्येण; G2 वाचः शिषोपहर्येण (sic); G8 पाकशेषान्वहार्येण. ❀ Cn: वाचा, वेदशास्त्रमय्या, श्रवणमननादिना । शेषावहार्येण, पञ्चयज्ञशेषेणान्नेन ॥ Cp: वाचा, प्रियवचनेन । शेषावहार्येण, देवतादिशेषभोजनेन । ❀ —^{b}) K6 पाणिनेन; M1. 5–7 पात्र° (for पाल°). Ds1 आत्मने. K7 D3. 4 वा (for च). ❀ Ca: पालनेन, शरीरधारणेन ॥ Cp: शरीररक्षया । ❀ —^{c}) V1 तथावद् (for यथा°). —^{d}) K4 D9 धर्मं; K6 B0. 6 (orig.). 7. 8 (orig). 9 Da3. a4 Dn1. n4 D8 D2. 3. 6. 8 कर्म; D5 कर्मम् (for धर्मम्). B0 कर्मतः; B6. 7. 9 Da3. a1 D9 चो(D9 नो)दितः; D7 आदतः; T G1. 3 M1. 5–7 आत्मनः; G2 आश्रितः (for आदितः).

12 ^{a}) K7 D1. 9 तु; D5. 7 सु-; M1. 5–7 [ए]व (for च). Dn1 मे सिद्धा; T1 संसिद्धा. —^{b}) K1. 4 G2 च (for वि-). D7 विवर्जितः. —^{c}) G1 ध्यात्वा (for हुत्वा). D8 सम्यग्घुतवहं हुत्वा.

13 For the incident, cf. B. 13. 3. 6. —^{a}) G3 विश्वमित्रस्य. —^{b}) V1 reads from गमत् up to भागो (in 13^{c}) on marg. ❀ Ca: ऋचीकतनयो गालवः ॥ Cn: ऋचीकतनयोऽगमदित्यत्र अजीगर्तसुतोऽगमदिति पठनीयम् । ❀ —^{c}) K1. 2. 7 V1 D4. 9 T G1. 8 वाग्भिः; Dn1 D8 अग्निं (for ऋग्भिः). D8 तत्र (for स्तुत्वा). G1 om. महा-. K6 B0. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 D8 D2. 3. 6. 8 महाबाहो; B8 (orig.) °भागान् (for °भागो). —^{d}) D4 om. from वान्वै up to मोद (in 14^{d}). B0 देवार्थे (for °न्वै).

14 For the incident, cf. 12. 278. 37. D4 om. up to मोद (cf. v. l. 13). —^{a}) K6 G3 ततः (for गतः). Dn4 चक्रत्वम् (for शुक्रत्वम्). —^{b}) B8 (marg.) महादेव- (for देव°). B7 -प्रसाधनात्; T G1. 3 M1. 5–7 °दृतः (for °दनात्). — B7 reads 14^{c}–18^{d} on marg. —^{c}) K6. 7 V1 B3 (marg.) D5. 7. 9 T G2. 3 M1. 5–7 च (for तु). K7 गमने (for गगने). —^{d}) B0 Dn1. n4 D8 D2. 3. 6. 8. 9 यशसा (for तेजसा). K4 स्मृतः (for वृतः). G1. 3 मोदते स्वेन तेजसा.

15 B7 reads 15 on marg. —^{a}) Dn4 आसितो दैव***. —^{c}) K1. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 Ds1 D2–5. 8. 9 काक्षीवान्; G1 कुक्षी° (for कक्षी°). —^{d}) K1. 2 तंडिस्; K4 तुंडिस्; Ds1 तांश्च; D4. 5. 7 तंड्यस्; G1 ताण्वस् (for ताण्ड्यस्). K4. 6 B0 Dn1. n4 D8 D2. 3. 6. 8 [आ]त्मवान् (for [अं]शुमान्).

16 B7 reads 16 on marg. —^{a}) K6. 7 V1 B6–8 वशिष्ठो. K3 जामदग्निर्; K7 B9 य(K7 *sup. lin.* as in text)म°; T G1. 3 वामदेवश्. —^{b}) Dn4 D5. 6 T2 भार-

C. 12. 10778
B. 12. 293(2). 16
K. 12. 298. 16

भरद्वाजो हरिश्मश्रुः कुण्डधारः श्रुतश्रवाः ॥ १६
एते महर्षयः स्तुत्वा विष्णुमृग्भिः समाहिताः ।
लेभिरे तपसा सिद्धिं प्रसादात्तस्य धीमतः ॥ १७
अनर्हाश्चार्हतां प्राप्ताः सन्तः स्तुत्वा तमेव ह ।
न तु वृद्धिमिहान्विच्छेत्कर्म कृत्वा जुगुप्सितम् ॥ १८
येऽर्था धर्मेण ते सत्या येऽधर्मेण धिगस्तु तान् ।
धर्मं वै शाश्वतं लोके न जह्याद्धनकाङ्क्षया ॥ १९
आहिताग्निर्हि धर्मात्मा यः स पुण्यकृदुत्तमः ।
वेदा हि सर्वे राजेन्द्र स्थितास्त्रिष्वग्निषु प्रभो ॥ २०

स चाप्यभ्याहितो विप्रः क्रिया यस्य न हीयते ।
श्रेयो ह्यनाहिताग्नित्वमग्निहोत्रं न निष्क्रियम् ॥ २१
अग्निरात्मा च माता च पिता जनयिता तथा ।
गुरुश्च नरशार्दूल परिचर्या यथातथम् ॥ २२
मानं त्यक्त्वा यो नरो वृद्धसेवी
विद्वान्क्लीबः पश्यति प्रीतियोगात् ।
दाक्ष्येणाहीनो धर्मयुक्तो नदान्तो
लोकेऽस्मिन्वै पूज्यते सद्भिरार्यः ॥ २३

इति श्रीमहाभारते शान्तिपर्वणि एकाशीत्यधिकद्विशततमोऽध्यायः ॥ २८१ ॥

द्वाजो. K1 हरिश्मरक्ष: (sic); K7 °स्मश्रुः. —d) K4 Da4 Dn4 D4 कुंडधारा (Da4 Dn4 °र-); D8 दंडधीरः. K2 श्रुतश्रवा; K4 श्रुतश्रुता; K7 शुचिश्रवा; D4. 9 शुचिश्रवाः; M1. 5–7 श्रुतव्रतः (for °श्रवाः).

17 B7 reads 17 on marg. —a) D8 सहर्षयः (for मह°). —b) Da4 Ds2 अग्निः; D5. 7 अग्निं; T1 वाग्भिः; G1 ह्यद्भिः (for ऋग्भिः). Ds1 समाहितः. —c) D4. 5. 7. 9 तपसो; T2 °सां (for °सा). K7 D4. 5. 7. 9 वृद्धिं (K7 °द्धिः) (for सिद्धिं). —d) Da4 G1 प्रमादात् (for प्रसा°). G1 तव धीमता.

18 B7 reads 18 on marg. —a) M1. 7 अनाहार्श्च. —b) K1. 2. 4. 7 D4. 5. 7. 9 T1 G1–3 हि; B8 (marg.) च (for ह). —c) G1 ननु (for न तु). B0 बुद्धिम्; T1 G1 Ca (gloss: स्ववर्गपोषणम्) वृत्तिम् (for वृद्धिम्). D5. 7 [अ]न्विच्छन्; D8 [आ]गच्छेत् (for [अ]न्वि°). —d) D9 सुगर्हितं (for जुगुप्सितम्).

19 a) Da4 Ds2 (by corr.) M7 यथा (for येऽर्था). G1 ये (for ते). K6. 7 D4. 9 सेव्या; T1 सार्थौ (for सत्या). —b) K6 lacuna; Ds1 वि- (for ये). D8 धिगस्ति (for धिगस्तु). — K2 reads 19c–20b twice. —c) D8 शाश्वते. —d) D4. 9 वन-; T G1. 3 M1. 5–7 वित्त- (for धन-).

20 For the repetition in K2, cf. v. l. 19. —a) Da4 अहिताग्निर्. K1. 2 (both times). 4 च; G2 तु (for हि). —b) K1 याः स; K2 (both times) वः स; B7 Dn4 यः सु°; D8 सदा; D5. 7 यथा; T G3 यश्च; G1 यच्च (for यः स). D5. 7 उत्तमं. —c) K7 D4. 5. 7. 9 T1 G1. 3 देवा (for वेदा).

21 a) K3 न (for स). K6 Da3. a4 अभ्यधिको; K7 B6 (marg. as in text) D9 अस्याधिको (for अभ्याहितो). —b) Da3. a4 क्रियतेस्य; D8 क्रियाप्यत्सा (sic) (for क्रिया यस्य). B8 (marg.) तस्य (for यस्य). —cd) K2 यो यो (for श्रेयो). Da4 om. (hapl.) त्वमाग्नि. G2 अनाहिताग्नित्वम् (for ह्यना°). T G1. 3 अग्निहोत्री (for °होत्रं). K2 नष्क्रियं; Dn4 निष्प्रियं; Ds2 विष्क्रियं; T G3 निष्क्रियः (for °यम्).

22 D5. 7 om. 22. —a) Da4 om. the first च —d) K1. 2 परिचर्यौ; Da3. a4 °चार्या (for °चर्या). K1. 2. 4 D4 G2 यथातथा (for °थम्).

23 a) K6 वृद्धसेवि-. —b) D7 विद्यात् (for विद्वान्). K1 Dn4 T1 G3 M7 अक्लीबः; K7 D4. 9 प्रतीतः; T2 क्लीबं (for क्लीबः). K1 पतितः; Da3. a4 G2 पश्यते (for °ति). D4 om. प्रीति. K6 V1 B6. 7. 9 Da3. a4 T G1–3 M1. 5–7 -योगं (for -योगात्). ❀ Cn: क्लीबः, कामहीनः ॥ C8: मृदुः । ❀ —c) K1 दाक्ष्येन; K6 दोषेण; V1 B7. 8 Dn4 दाक्षेण (for दाक्ष्येण). K6 B0. 7 Dn1. n4 D8 D2. 3. 5–8 Cn. p हीनो; B8 (orig.) युक्तो (for [अ]हीनो). K1 धर्मे युक्ते; K4. 6 V1 B0. 6–9 Da3. a4 D5–7 T G2 M7 धर्मयुक्ते (for °युक्तो). D8 तु; G3 [ऽ]थ (for न-). G2 -दांते. K7 D4. 9 दोषैर्विहीनो धर्मयुक्तश्च दांतो; Cp Cpp दाक्ष्येण हीनोऽधर्म(Cpp: दाक्षेण हीनो धर्म)युक्तेन दांतः.

२८२

पराशर उवाच ।
वृत्तिः सकाशाद्वर्णेभ्यस्त्रिभ्यो हीनस्य शोभना ।
प्रीत्योपनीता निर्दिष्टा धर्मिष्ठान्कुरुते सदा ॥ १
वृत्तिश्चेन्नास्ति शूद्रस्य पितृपैतामही ध्रुवा ।
न वृत्तिं परतो मार्गेच्छुश्रूषां तु प्रयोजयेत् ॥ २
सद्भिस्तु सह संसर्गः शोभते धर्मदर्शिभिः ।
नित्यं सर्वास्ववस्थासु नासद्भिरिति मे मतिः ॥ ३
यथोदयगिरौ द्रव्यं संनिकर्षेण दीप्यते ।
तथा सत्संनिकर्षेण हीनवर्णोऽपि दीप्यते ॥ ४
यादृशेन हि वर्णेन भाव्यते शुक्लमम्बरम् ।
तादृशं कुरुते रूपमेतदेवमवैहि मे ॥ ५
तस्माद्गुणेषु रज्येथा मा दोषेषु कदाचन ।

C. 12. 10775
B. 12. 294(3). 6
K. 12. 299 6

❀ Cn: दाक्ष्येण स्पन्देन हीनः, आयासशून्यः सन् । नदान्त इत्येकं पदम् । दान आर्जवच्छेदनयोरित्यस्मात् कर्तरि क्तः । तदन्यो नदान्तः, हिंसाशून्य इत्यर्थः ॥ Cv: दाक्ष्येण हीन इत्यत्र दाक्ष्यं कलासु कौशल्यम् । ❀ —^{d}) D8 लोके ह्यस्मिन्; D5. 7 स वै (D5 om. वै) लोकेस्मिन् (for लोकेऽस्मिन्वै). K7 आर्यते; Da3. a4 G1 आर्याः; T1 आर्यैः (for आर्यैः).

Colophon. Ś1 G6 missing: K2. 5 B1–5 Da1. a2 Dn2. n3 D1 G4. 5 M2–4 absent. — *Sub-parvan:* K1. 2. 4. 6. 7 B0. 6. 8. 9 Da3. a4 Dn1. n4 D8 D2–9 T G1–3 M1. 5–7 मोक्षधर्म. — *Adhy. name:* K1. 2. 4. 6. 7 V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2–9 पराश(B6 D4 °स-; B9 °सु)रगीता; T1 क्रियाकांस्येनदोहनं; M5. 6 पराशरगीतासु दानप्रशंसा. — *Adhy. no.* (figures, words or both): K6 17; B7 G1. 3 116; Dn1 118; Dn4 D8 M6 117; D3 101; T1 16; T2 129; G2 132; M1. 6. 7 115. — *Śloka no.:* Da4 Dn1. n4 23; Ds1 14.

282

☞ This adhy. is missing in Ś1 G6 (cf. v. l. 12. 274. 13; 259. 1).

1 ^{a}) G2 वृत्तिं (for वृत्तिः). K1. 2. 4. 6 V1 B0. 6–9 Da3. a4 Ds1. s2 (also as in text) D3 (marg. *sec. m.*). 6 G3 वर्णे (G3 °र्णों) वै (for वर्णेभ्यस्). T1 परवृत्तिः स्वकाद्वर्णान्. ❀ Ca: अत्र वृत्तिर्वर्तनयोग्यं धनम् ॥ Cn: वृत्तिः जीविका । ❀ —^{b}) T1 नित्या; G1. 3 M1. 5–7 Cv नित्यं (for त्रिभ्यो). K1. 2. 4. 6 V1 B0. 6–9 Da3. a4 Ds1. s2 (also as in text) D3 (marg. *sec. m.*). 6 G2 हीने वा शोभनेपि(K1 °तेथ; K2. 4 °नेथ) वा (G3 च). —^{c}) K2 प्रीत्येपनेता; Dn1 T1 प्रीतोपनीता (for प्रीत्योप°). ❀ Cp: निर्दिष्टा, शास्त्रादेशिता । ❀ —^{d}) K7 D1. 5. 7. 9 G2 धर्मिष्ठं; B3 (marg. as in text) Ds1 D2. 3 धर्मिष्ठा; Ds2 धर्मिष्ठात् (for धर्मिष्ठान्). B8 (marg. as in text) श्रयते (for कुरुते). Da3. a4 यथा (for सदा). T G1. 3 M1. 5–7 भूयिष्ठं कर्म कुर्वतः.

2 ^{a}) K7 D6 नैवास्ति (for चेन्नास्ति). —^{b}) T M1. 5–7 शुभा (for ध्रुवा). —^{c}) D5. 7 G1 न वृत्ति-; G2 अवृत्तिं (for न वृत्तिं). K4 D5. 7. 8 T2 G1 मार्गे; Ds2 (by corr. as in text) मार्गः (for मार्गेत्). ❀ Cn: परतः, त्रैवर्णिकसेवाव्यतिरेकेण । ❀ —^{d}) K7 D2 शुश्रुषां; Dn1 शुश्रूषा. K7 D4 नु; G2 तत् (for तु). D2 प्रयोजयत्.

3 ^{a}) G1. 3 सह तु (by transp.). K1 संमार्गः; G1 संसर्गं (for संसर्गः). —^{b}) Dn4 ब्रह्म- (for धर्म-). —^{c}) T1 नित्यः; G3 वृत्तिं (for नित्यं).

4 = (var.) Hitopadeśa, Prastāvanā, st. 31. —^{a}) K6 यथौदय-; D2 यथोदयो (for यथोदय-). K6 द्रव्य-; G1. 3 दृश्यं (for द्रव्यं). ❀ Cv: द्रव्यं, स्फटिकादि । ❀ — D5. 7 om. (hapl.) 4^{cd}. —^{c}) K2 [आ]त्म-; V1 सत्- (for सत्-). K1. 2. 4 -संनिधानेन (for °कर्षेण). T2 यथा सन्निर्निकर्षेण. ❀ Cv: संनिकर्षेण, सूर्यादिसंनिकर्षेण । ❀ —^{d}) G2 -वर्णेन (for -वर्णोऽपि). K6 दीव्यते.

5 ^{a}) B8 (marg. as in text) [इ]ह (for हि). —^{d}) K7 D4. 9 एवमेतद् (by transp.); T G1. 3 एतमेवम्; M7 एतद्देहम्. B9 D4 6. 9 G2 अवेहि मे; G1 अमैवहि (sic) (for अवैहि मे).

6 V1 reads 6^{a}–7^{b} on marg. —^{a}) T1 रज्येषु; G1. 3 रमथा (G3 °थ); M7 राज्येथा (for रज्येथा). —^{d}) K6 वलावलं; D5. 7 बलाबलं; G2 च लोचनं (for चलाचलम्). ❀ Cv: चलाचलम्, शरीरं चलम्,

C. 12. 10775
B. 12. 294(s). 6
K. 12. 299. 6

अनित्यमिह मर्त्यानां जीवितं हि चलाचलम् ॥ ६

सुखे वा यदि वा दुःखे वर्तमानो विचक्षणः ।
यश्चिनोति शुभान्येव स भद्राणीह पश्यति ॥ ७

धर्मादपेतं यत्कर्म यद्यपि स्यान्महाफलम् ।
न तत्सेवेत मेधावी न तद्धितमिहोच्यते ॥ ८

यो हृत्वा गोसहस्राणि नृपो दद्यादरक्षिता ।
स शब्दमात्रफलभाग्राजा भवति तस्करः ॥ ९

स्वयंभूरसृजच्चाग्रे धातारं लोकपूजितम् ।
धातासृजत्पुत्रमेकं प्रजानां धारणे रतम् ॥ १०

तमर्चयित्वा वैश्यस्तु कुर्यादत्यर्थमृद्धिमत् ।
रक्षितव्यं तु राजन्यैरुपयोज्यं द्विजातिभिः ॥ ११

अजिह्मैरशठक्रोधैर्हव्यकव्यप्रयोक्तृभिः ।
शूद्रैर्निर्मार्जनं कार्यमेवं धर्मो न नश्यति ॥ १२

अप्रनष्टे ततो धर्मे भवन्ति सुखिताः प्रजाः ।
सुखेन तासां राजेन्द्र मोदन्ते दिवि देवताः ॥ १३

तस्माद्यो रक्षति नृपः स धर्मेणाभिपूज्यते ।
अधीते चापि यो विप्रो वैश्यो यश्चार्जने रतः ॥ १४

यश्च शुश्रूषते शूद्रः सततं नियतेन्द्रियः ।

चैतन्यमचलम् । ❀

7 V1 reads 7ab on marg. — c) G1. 3 आचिनोति (for यश्चि°). — d) Da3. a4 न; G2 सु- (for स). Dn1 Ds1 तंत्राणीह; T3 G3 हि भद्राणि (for भद्राणीह). G1 सहस्राणीह पश्यति. ❀ Cn (reading तन्त्राणि): तन्त्राणि, शास्त्राणि । ❀

8 a) D8 यः (for यत्). — b) K3 -बलं (for -फलम्). — c) D4 तं (for तत्). — d) T न हि तद्धितमुच्यते; G1. 3 न तद्धि तप उच्यते. — After 8, T G1. 2 M1. 5–7 ins.:

742* धर्मेण सहितं यत्तु भवेदल्पफलोदयम् ।
तत्कार्यमविशङ्केन कर्मात्यन्तसुखावहम् ।
[(L. 2) G1 कर्माण्यन्यं (for °त्यन्त-).]

9 G3 om. 9. — a) K1 हित्वा; K6 कृत्वा; D5. 7 G2 Cv हृत्वा; T G1 नित्यं; M1. 5–7 दद्याद् (for हृत्वा). ❀ Cv: हृत्वा, प्रजापीडनं कृत्वा । ❀ — b) M1 हृत्वा; M5. 6 हित्वा; M7 हत्वा (for दद्याद्). Da4 अरक्षिताः; D6 च दक्षिणा; M1. 5–7 ह्यरक्षितः (for अरक्षिता). — d) K2 भास्करः (for तस्करः).

10 a) T G1. 3 स्वयंभुर् (for °भूर्). K1 B9 Da3. a4 व्यग्रे; K2. 4 अग्रे; K7 D3. 9 G1. 3 त्वग्रे; B6 (marg.). 8 (marg. as in text) D1 T G2 M1. 5–7 ह्यग्रे (for चाग्रे). — b) K6 V1 B0. 6. 7. 9 Da3. a4 Dn1. n4 D8 D2. 3. 6. 8 G2 -सत्कृतं (for -पूजितम्). — c) K4 धात्रा (for धाता). Ds2 सृजन्; D6 सृजति (hypermetric) (for [अ]सृजत्). G2 योसृजत्पुत्रमेकं वै. ❀ Cn: पुत्रं, पर्जन्यदेवताम् ॥ Cv: पुत्रं, पर्जन्यं धर्मं वा । ❀ — d) K6 V1 B0. 6. 7. 8 (marg. as in text). 9 Da3. a4 Dn1. n4 Ds1 D2. 3. 5–8 G2 M1. 5–7 लोकानां (for प्रजानां). D6 नुतं (for रतम्). Ds2 लोकानां धारणोत्तरं.

11 a) G2 वैश्यास्तु. — b) K1 अभ्यंतम्; K2 अत्यंतम् (for अत्यर्थम्). D5. 7 ऋद्धिमान् (for °मत्). K7 कुर्यादत्यर्थमूर्तिमत्; D8 °त्यर्थवृद्धिमत्. — c) K6 B8 (marg.) T2 च; Ds2 सु- (for तु). K7 राजन्यो; D4 राजन्ये. — d) K7 D4. 9 उपयो(D4 °या)ग्यं; Ds1 °योक्ष्य; T1 M1. 7 °योज्य; T2 °योज्या (for °ज्यं).

12 K7 om. (? hapl.) 12ab. — a) K6 अजिह्वैर् (for अजिह्मैर्). K6 असठैः क्रोधैर्; Da4 अशतक्रोधैर्; D8 T G1. 3 C8 अजितप्रख्यै(Ds1 °क्षै-; T2 C8 °ज्ञै)र्; D5. 7 विगतक्रोधैर् (for अशठ°). ❀ Cn: अशठक्रोधैः, वित्तशाठ्यक्रोधहीनैः । ❀ — c) G1 शूरैर्; M7 शूद्रे (for शूद्रैर्). K7 निर्मजनं; T1 धर्मार्जनं (for निर्मा°). ❀ Ca: निर्मार्जनं, भाण्डादीनां प्रक्षालनं तदर्थजलाद्याहरणं वा ॥ C8: निर्मार्जनमिति शुश्रूषोपलक्षणम् । ❀ — d) T1 दुष्यति (for नश्यति).

13 a) K2 G2 अप्रणष्टे. K1 धर्मो; G2 धर्मं (for धर्मे). — b) K4 सुखितः; K6 B0. 8 (marg. as in text) Ca सुखिनः; D7 सुखतः (for सुखिताः). — d) K2 D1 मोदते. K1 (int. lin.; sec. m.) दिव्य- (for दिवि).

14 a) K1 रक्षिति. K4. 6 G1. 2 M1 नृप (for नृपः). — b) D5. 7 तद्-; T G1–3 स्व- (for स). K6 [अ]ति-; B6 Dn1. n4 D8 D2. 3. 6. 8 [इ]ति; B8 (marg. as in text) T2 G1. 3 ह (for [अ]भि-). K1. 3. 4 V1 B0. 8 (orig.). 9 Da3. a4 -युज्यते; B7 -युध्यते; B8 (marg.) -रज्यते (for -पूज्यते). K7 D4. 9 प्रजाधर्मेण संयुतः. — c) K2 अधीये (for अधीते).

15 a) K7 D4. 9 तु (for च). K1. 7 शुश्रुषते. Da4 शूरः (for शूद्रः). — c) K7 B6. 8 (marg. as

अतोऽन्यथा मनुष्येन्द्र स्वधर्मात्परिहीयते ॥ १५
प्राणसंतापनिर्दिष्टाः काकिण्योऽपि महाफलाः ।
न्यायेनोपार्जिता दत्ताः किमुतान्याः सहस्रशः ॥ १६
सत्कृत्य तु द्विजातिभ्यो यो ददाति नराधिप ।
यादृशं तादृशं नित्यमश्नाति फलमूर्जितम् ॥ १७
अभिगम्य दत्तं तुष्ट्या यद्धन्यमाहुरभिष्टुतम् ।
याचितेन तु यद्दत्तं तदाहुर्मध्यमं बुधाः ॥ १८
अवज्ञया दीयते यत्तथैवाश्रद्धयापि च ।
तदाहुरधमं दानं मुनयः सत्यवादिनः ॥ १९
अतिक्रमे मज्जमानो विविधेन नरः सदा ।
तथा प्रयत्नं कुर्वीत यथा मुच्येत संशयात् ॥ २०
दमेन शोभते विप्रः क्षत्रियो विजयेन तु ।
धनेन वैश्यः शूद्रस्तु नित्यं दाक्ष्येण शोभते ॥ २१

C. 12. 10791
B. 17. 294(3). 21
K. 12. 299. 22

इति श्रीमहाभारते शान्तिपर्वणि द्व्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८२ ॥

---

in text). 9 Da3. a4 G1. 3 ततो (for अतो). Da4 मनुष्येंद्रः. — [d]) Ds1 परिभूयते.

16 [a]) Dn1 प्राणासंताप- (for प्राण°). K6 Da4 G3 -निर्दिष्टा; G1 -निर्दिष्टः; M1. 5. 6 -निष्कृष्टाः; M7 -निविष्टाः (for -निर्दिष्टाः). ❀ Cs: प्राणसंतापनिर्दिष्टाः, क्षुत्संभवे प्राणसंतापे देहीति याचिताः । यद्वा, प्राणसंतापं सोढ्वापि निर्दिष्टाः, दत्ताः ॥ Cv: कस्यचित्प्राणसंतापे सति निर्दिष्टाः, दत्ताः । ❀ — [b]) K1. 2. 4. 6 V1 Bo. 6–9 Da3. a4 Dn1 Ds D3. 5–8 Ca काकिन्योपि; T2 कारुण्योपि; G1 काकण्यापि; G2 कारण्योपि; G3 काक° (for काकि°). K2 T2 महाफलः; K4 G1 °बलः (for °फलाः). M1. 5–7 काकण्यपि महाफला. ❀ Ca: काकिनी माषकचतुर्थांशः, पणचतुर्थांशो वा ॥ Cn. s: विंशतिवराटिकाः । ❀ — [c]) K1 न्यायेन. K4 T2 [उ]पार्जितं (for °र्जिता). K4 दत्वा; Ds1 दांतां (for दत्ताः). D5. 7 अन्यायोपार्जिता दांता. — [d]) K1. 2. 4 D4. 5. 7. 9 न परार्थाः (K1 °र्थः; D5. 7 °र्थाः); G1. 2 किमुतान्ये (for °तान्याः). D4. 9 सहस्रधा.

17 [a]) D6 सत्कृत्वा. Bo. 7 Dn1. n4 Ds D2. 3. 6. 8 हि (for तु). — [b]) Bo. 6. 7 Dn1. n4 Ds D2–9 T G1. 3 नराधिपः. — [c]) K6 तादृशं यादृशं (by transp.). — [d]) K2 फलमर्जितं; D5. 7 °पूजितं; G2 °निर्जितं (for °मूर्जितम्).

18 [a]) Hypermetric. K1 तुष्ट्वा (for तुष्ट्या). T2 M1. 5–7 च (for यद्). K6 V1 B6–8 Da3. a4 Dn1 Ds D2. 3 (by corr.). 8 अभिगम्य च (B8 तु) तत्तुष्ट्या; K7 Dn4 D3 (before corr.). 4. 5. 7. 9 °म्य च तुष्ट्या यद् (Dn4 D7 तं; D3. 5 च); Bo T1 °म्य ददत्तुष्ट्या; B6. 8 (both marg.). 9 D6 °म्य च तं तुष्ट्या; G1. 3 °म्य तु यद्दत्तं; G2 °म्य दत्ता संतुष्ट्या. — [b]) K4 ध(ने)न्यम्; K6 V1 Bo. 8. 9 Da3. a4 Dn4 D6 T G1. 3 M1. 7 धर्मंम्; K7 B6. 7 Dn1 D2–5. 7. 8 दत्तम्; G2 यत्तद्; M5. 6 धर्म्यंम् (for धन्यम्). D4 om. (hapl.) from भिष्टुतम् up to तदाहुर (in 19[c]). — [c]) K7 Ds1 D9 याचितेन च; D5. 7 °तेषु च (for °तेन तु). — [d]) B6 Ds1 D6 तम् (for तद्). K1. 2. 4 पदं; T G1–3 M1. 5–7 फलं (for बुधाः).

19 D4 om. up to तदाहुर (cf. v. l. 18). — [a]) K2 Da3 (by corr. as in text) अवज्ञाया (for °ज्ञया). — [b]) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D3. 6. 8 वा (for च). — [c]) K4 Dn1. n4 Ds D2. 6. 8 तम् (for तद्). G1 आह (for आहुर्). K2 मध्यमं; Da3 अधमं- (for अधमं). K7 दत्तं (for दानं).

20 [a]) K1. 2 Bo. 8 (marg. as in text) Dn1. n4 D2. 3 (by corr. as in text). 8 अतिक्रामे (K1 Dn4 °म)न्; K4 अतिक्रा*; K7 B1 Ds D6 Cv °क्रमेन् (for °क्रमे). — [b]) K7 विविधैस्तु; V1 Bo. 6. 8 (marg.). 9 Da3. a4 D4. 5. 7. 9 T °धे तु; D3 °धे च (for °धेन). K1 रतः (for नरः). G1. 3 ह्य(G3 वि)विधौ मा(G3 °धैर्मा)-नरः सदा. ❀ Cv: विविधेन नानोपायेन व्यसनार्णवे मज्जमानः यथा अतिक्रमेत् । ❀ — [c]) V1 तदा. — [d]) K7 संशयः; Bo Da3. a4 Dn1. n4 Ds D2. 3 (marg. sec. m.). 6. 8 Cn (gloss: गृहपाशात्) संश्रयात्; T G1. 3 M1. 5–7 किल्बिषात् (for संशयात्).

21 [a]) K1. 2. 4 दानेन (for दमेन). K6 दमेनाशोभते विप्र. — [b]) K1. 2 B8 Ds G2 M1. 5. 7 च; Da4 नु (for तु). — [c]) B8 (marg. as in text) च (for तु). K7 धनेन शोभते वैश्यः. — [d]) K7 शूद्रो (for नित्यं). K7 D6 T2 दास्येन; B8 Dn1 दाक्षेण (for दाक्ष्येण). ❀ Cs: दाक्ष्येण, वर्णत्रयशुश्रूषायामनालस्येन । ❀

२८३

C. 12. 10791
B. 12. 293[4]. 1
K. 12. 300. 1

पराशर उवाच ।
प्रतिग्रहागता विप्रे क्षत्रिये शस्त्रनिर्जिताः ।
वैश्ये न्यायार्जिताश्चैव शूद्रे शुश्रूषयार्जिताः ।
स्वल्पाप्यर्थाः प्रशस्यन्ते धर्मस्यार्थे महाफलाः ॥ १
नित्यं त्रयाणां वर्णानां शूद्रः शुश्रूषुरुच्यते ।
क्षत्रधर्मा वैश्यधर्मा नावृत्तिः पतति द्विजः ।
शूद्रकर्मा यदा तु स्यात्तदा पतति वै द्विजः ॥ २
वाणिज्यं पाशुपाल्यं च तथा शिल्पोपजीवनम् ।
शूद्रस्यापि विधीयन्ते यदा वृत्तिर्न जायते ॥ ३
रङ्गावतरणं चैव तथा रूपोपजीवनम् ।
मद्यमांसोपजीव्यं च विक्रयो लोहचर्मणोः ॥ ४
अपूर्विणा न कर्तव्यं कर्म लोके विगर्हितम् ।

Colophon. Ś1 G6 missing: K3, 5 B1–5 Da1, a2 Dn2, n3 D1 G4, 5 M2–4 absent. — *Sub-parvan*: K1, 2, 4, 6, 7 V1 Bo. 6–9 Da3, a4 Dn1, n4 D2, 3, 5–9 T G1–3 M1, 5–7 मोक्षधर्म. — *Adhy. name*: K1, 2, 4, 6 V1 Bo. 6–8 Da3, a4 Dn1 Ds D3, 6–8 पराशरगीता; K7 D4, 9 पराश(K7 °स)रगीतायां स्वकर्मप्रशंसा; D5 पराशरगीताधर्मप्रशंसा; M5, 6 पराशरगीतासु चातुर्वर्ण्यवृत्तिकथनं. — *Adhy. no.* (figures, words or both): K6 Ds1 18; B7 T1 G1, 3 117; Dn1 119; Dn4 Ds2 M5 118; D8 G2 113; T2 130; M1, 6, 7 116. — *Śloka no.*: Da4 Dn1, n4 D8 21.

283

☞ This adhy. is missing in Ś1 G6 (cf. v. l. 12. 274. 13; 259. 1).

1 D4 om. the ref. — a) B6 D7 विप्राः; D2 विप्र (for विप्रे). K1, 2, 7 V1 B6 (marg. in as text) D4–6, 9 G2 प्रतिग्र(K7 °गा)हार्जिता (D6 °हरता; G2 °हार्जितो) विप्रे (D5 °प्राः; G2 °प्रः); Da4 Ds2 °ग्रहगता विप्रे; D2 M5 °ग्रहागतं (M5 °तो) विप्रे; M1 °ग्रहाग्रहा विप्रे. — b) D2 क्षात्रियं; D5, 7 °याः. V1 Bo. 6, 7, 8 (orig.), 9 Da3, a4 Dn1, n4 Ds D3, 6, 8 T1 G3 युधि; T2 G1 M1, 5–7 युद्ध- (for शस्त्र-). G2 क्षत्रियो युद्धनिर्जितः. — K1, 2, 4 om. (hapl.) 1^{cd}. D7 om. 1^{cdef}. — c) K7 Da4 G2 वैश्यो. B6 (marg. as in text) न्यायगताश्च; D6 न्यायागताच्च; G2 °र्जितश्च. ❀ Cs: न्यायार्जिताः, क्रयविक्रयादिषु कूटमानादिराहित्येनार्जिताः । ❀ — d) M1, 5–7 शुश्रूषणार्जिताः. G2 शूद्रः शुश्रूषयार्जितः. — e) K1, 2, 4 अल्पे ह्यर्थाः; B6 अल्पेप्यर्थाः; Da3, a4 अल्पा°; D2 G2 स्वल्पा अ(G2 ह्य)र्थाः; D4 T2 स्वल्पेप्यर्थाः; D9 स्वल्पे येर्थाः; G1 स्वल्पे ह्यर्थाः (for स्वल्पाप्यर्थाः). Ds1 D2 G2 प्रशंसंते; D6 प्रशस्यंति; T2 °श्यंते. — f) K7 महाफलः. D5 धर्मस्यास्ययसीफलाः (sic).

2 b) V1 Bo. 6–9 Da3, a4 Dn1, n4 Ds D2, 3, 6, 8 Cs शुश्रूषुः शूद्र उच्यते. ❀ Cs: त्रयाणां शुश्रूषुर्द्विजो यो नित्यं नियतं शूद्र उच्यते, शूद्रो भवतीत्यर्थः । ❀ — c) Ds1 (erroneously) reads वैश्यधर्मा twice. G2 क्षत्रधर्मो वैश्यधर्मो. — d) K7 D4, 9 ना(K7 नौ-; D9 नो)वृत्तात्; T G1, 3 आपत्तौ; G2 M1, 5–7 नाप(G2 °वृ)त्तौ (for नावृत्तिः). Bo. 7 Da3, a4 Dn1, n4 Ds D2, 3, 8 G2 M1, 5–7 पतते; T G1, 3 यतते (for पतति). — B9 om. (hapl.) 2^{ef}. — e) K4, 6 Bo. 8 (marg.) Da3, a4 Dn1, n4 Ds D2, 3, 6, 8 शूद्रधर्मा (for °कर्मा). T G1, 3 च (for तु). — f) K1, 2 हि पतति (for पतति वै).

3 a) M1 वाणिज्य-. G2 M5–7 पशुपाल्यं. — b) V1 M1, 7 -जीविनं; G1 -जीवितं. ❀ Cn: शिल्पं, चित्रलेखनादि । ❀ — G2 M1, 5–7 om. (hapl.) 3^{c}–4^{b}; V1 reads the same on marg. K7 repeats 3^{cd} after 4^{ab}. — d) K1, 2, 4 यथा; D7 तदा (for यदा). K1 G1 वृत्तिं; Cn (gloss: सेवारूपा) वृत्तिर् (as in text). D7 भवाप्यते (for न जायते).

4 G2 M1, 5–7 om. 4^{ab} (cf. v. l. 3). V1 reads 4^{ab} on marg. — a) K1, 2 रक्षावतरणं; K7 रंगावतारणं; Dn4 °वतरसां; Ds2 °नुतरणं. ❀ Ca: रङ्गावतरणं, नृत्यादिरूपोपजीवनम् ॥ Cn: रङ्गे स्त्र्यादिरूपेणावतरणम् ॥ Cv: नाट्यरङ्गावतरणम् । वस्त्रभित्त्यादिषु रङ्गकरणं वा । ❀ — b) D6 -जीविनं. G1 तथा जीवोपजीवितं. ❀ Cn: रूपोपजीवनम्, जलमण्डपिकेति दाक्षिणात्येषु प्रसिद्धं, यत्र सूक्ष्मवस्त्रं व्यवधाय चर्ममयैराकारैः राजामात्यादीनां चर्या प्रदर्श्यते ॥ Cs: रूपवतीं भार्यां परेभ्यो दत्त्वा जीवनं रूपोपजीवनम् । यद्वा, रामकृष्णादीनां रूपं गृहीत्वा जीवनं रूपोपजीवनम् । ❀ — After 4^{ab}, K7 repeats 3^{cd}. — c) K1, 2, 4 मध्य-; D6 G1, 3 मत्स्य- (for मद्य-). B7 -जीत्रं (for -जीव्यं).

कृतपूर्विणस्तु त्यजतो महान्धर्म इति श्रुतिः ॥ ५
संसिद्धः पुरुषो लोके यदाचरति पापकम् ।
मदेनाभिप्लुतमनास्तच्च नग्राह्यमुच्यते ॥ ६
श्रूयन्ते हि पुराणे वै प्रजा धिग्दण्डशासनाः ।
दान्ता धर्मप्रधानाश्च न्यायधर्मानुवर्तकाः ॥ ७
धर्म एव सदा नृणामिह राजन्प्रशस्यते ।
धर्मवृद्धा गुणानेव सेवन्ते हि नरा भुवि ॥ ८
तं धर्ममसुरास्तात नामृष्यन्त जनाधिप ।
विवर्धमानाः क्रमशस्तत्र तेऽन्वाविशन्प्रजाः ॥ ९
तेषां दर्पः समभवत्प्रजानां धर्मनाशनः ।
दर्पात्मनां ततः क्रोधः पुनस्तेषामजायत ॥ १०
ततः क्रोधाभिभूतानां वृत्तं लज्जासमन्वितम् ।
ह्रीश्चैवाप्यनशद्राजंस्ततो मोहो व्यजायत ॥ ११
ततो मोहपरीतास्ते नापश्यन्त यथा पुरा ।

C. 12. 10603
B. 12. 295(4). 13
K. 12. 300. 13

— d) K2 G1 विक्रियो; K4.6 V1 B0.6–9 Da3.a4 Dn1.n4 Ds D2.3.5–8 T2 विक्रयं; K7 विकपो (sic); Da4 विक्रमं (for °यो). Da3.a4 लौह-. K7 D4.9 -चर्मणां.

5 B7 damaged. — a) K2 अपूर्विता; K6 V1 B6.8 (marg.).9 Da3.a4 Dn4 Ds2 (by corr.) D8 T2 Ca (gloss: पूर्वपुरुषासेवितस्वधर्महीनेन) अपूर्वेण; D5.7 शूद्रेणापि; T1 अपूर्विकं; Cp (gloss: पूर्वपुरुषसेवाहीनेन) अपूर्विणा (as in text). ❀ Cs: यस्य वर्णस्य रक्षावतरणादिकं पूर्वं न विद्यते सोऽपूर्वः। ❀ — b) K6 सर्व- (for कर्म). K7 Ds1 D4.9 T G1–3 M1.5–7 लोक- (for लोके). — c) Hypermetric. K6.7 V1 B0.6–9 Da3.a4 Dn1.n4 Ds D2.3.5–8 Csp कृत(D5.7 °तं)पूर्वं; T कृतकर्मणस्; M1 °पूर्वणस्. V1 च; G1 lacuna; Csp हि (for तु). T1 द्विजतो (for त्य°). K1.4 कृतपूर्वेणस्तु त्यजतां (K1 °ज्यता) (sic). ❀ Ca: कृतपूर्विणः, पित्रादिभिरापदि सेवितपरधर्मस्य। ❀ — d) K7 D5.7.9 महा- (for महान्).

6 a) K7 T1 G3 स सिद्धः; Da4 Ds1 Cs (gloss: दुष्कर्मत्वेन प्रसिद्धं) संसिद्धं; Dn4 Ds2 समृद्धः; Ds2 (marg.) स शुद्धः. ❀ Cn: संसिद्धः, लब्धान्नवस्त्रादिः। ❀ — b) K1.2.4 यदा भवति; G1.3 यो वै चरति (for यदाचरति). K1.7 D4.5.7.9 पातकं; K2.4 पातकात् (K4 °कृत्) (for पापकम्). — c) B8 (marg.) च (for [अ]भि-). K2 G1 -प्लुतमना (for °मनास्). — d) B3 (marg.) तत्तु; Da3.a4 तस्य (for तच्च). D4 उद्यते (for उच्यते).

7 a) D8 D7 T G1–3 M7 श्रूयते. K7 D4.7 (marg. sec. m.) च; B8 (marg.) वै (for हि). K4 पुराणो वै; V1 B6.9 Da3.a4 G2 M1.5.6 °णेपि; B0.7.8 Dn1.n4 Ds D2.3.6.8 T2 °णेषु; B8 (marg.) °णे हि (for °णे वै). — b) K1.2.4 -शासिताः; D4.9 -साधनाः; T G1 -शासनात्; G2 M7 -शासनः. — c) K2.4 M1 शांता; G1 दांत- (for दान्ता). K7 धर्मप्रधानश्च; B6 °धानाच्. — d) D4 न्यायधर्मे. K1 -धर्मानुवर्तिकाः; K2 Da4 Dn1 D3 °नुवृत्तिकाः; K4 D7 °नुवर्तिकाः.

8 a) K4.7 Da3 D4.9 नृणाम्. — b) D8 इति (for इह). D7 एव (for राजन्). K7 प्रपश्यते; G2 प्रदस्यते (for प्रश°). — c) K7 D4.9 धर्मवृत्ता; B8 (orig.) °वृत्या; B8 (marg.).9 Da3.a4 D5.7 °बुद्ध्या; Dn4 °वृद्धान्; T G1.2 M1.5–7 °वृद्ध्या (for °वृद्धा). K6 एवम्. — d) K6 एवं ते हि नरा युधि.

9 a) K6 V1 B6.7 Da3.a4 G1 तद्धर्मं; K7 धर्मं तम् (by transp.). — b) K6 B6 (marg. as in text).9 Da3.a4 नाद्रियंत (K6 °ते); Ds1.s2 (marg. by corr.) नामृश्यंत; G3 मृष्यंते न. T G1–3 M1.5–7 नराधिप (for जना°). — c) D8 विवृद्धमानाः; G2 त्रिवर्धमानं. — d) K2 D8 T1 G1–3 ते त्वाविशन्; K6 ते ह्यवि°; B6 (marg. as in text) तेनान्वि°; Da3.a4 तेष्ववि°; D5.7 तत्राविं°; D6 तेश्चान्वि°; T2 ते न्यवि° (for तेऽन्वावि°).

10 a) K6 B0.6–9 Da3.a4 Dn1.n4 Ds D2.3.5–8 T1 G3 तासां (for तेषां). K2 धर्पः[र्मः]. — b) B9 Ds2 D3.6 T1 G1.2 M7 धर्मशासनः (G1 °नात्); G3 °नाशनात्. — c) K1 धर्मात्मानां; K6 दसात्मनां; B6.8.9 Da3.a4 दर्पान्मानस्; D7 G2 °त्मना; T G1.3 दर्पो मानस् (for दर्पात्मनां). T G1.3 यथा; G2 तदा (for ततः). B0.7 Da4 Dn1.n4 Ds D2.3.6.8 पश्चात्; Da3 lacuna (for क्रोधः). — d) K1.4 पुनरेषाम्; K6 B6.8.9 तत(B8 पुन)स्तासाम्; B0.7 Da3.a4 Dn1.n4 Ds D2.3.6.8 क्रोधस्तासाम्; G2 M1.5–7 तदा तेषाम् (for पुनस्ते°).

11 a) G1 -तप्तानां (for -भूतानां). — b) G2 वृत्तिं. T1 G1.3 च नश्यति; G2 -समन्वितां. — c) K1 [अ]श्यानशद्; K2 [अ]भि°; K4 [अ]भ्य° (for [अ]प्य°). D5.7 श्रीश्चैतान्श्य(D7 °श्च)नशद्राजंस्; D6 corrupt; T G1.3 M1.5–7 ह्री(T G3 श्री)श्चापि व्यनशद्रा°. — d)

C. 12. 10803
B. 12. 293(4).13
K. 12. 300. 13

परस्परावमर्देन वर्तयन्ति यथासुखम् ॥ १२
तान्प्राप्य तु स धिग्दण्डो नकारणमतोऽभवत् ।
ततोऽभ्यगच्छन्देवांश्च ब्राह्मणांश्चावमन्य ह ॥ १३
एतस्मिन्नेव काले तु देवा देववरं शिवम् ।
अगच्छञ्शरणं वीरं बहुरूपं गणाधिपम् ॥ १४
तेन स्म ते गगनगाः सपुराः पातिताः क्षितौ ।
तिस्रोऽप्येकेन बाणेन देवाप्यायिततेजसा ॥ १५
तेषामधिपतिस्त्वासीद्भीमो भीमपराक्रमः ।
देवतानां भयकरः स हतः शूलपाणिना ॥ १६
तस्मिन्हतेऽथ स्वं भावं प्रत्यपद्यन्त मानवाः ।
प्रावर्तन्त च वेदा वै शास्त्राणि च यथा पुरा ॥ १७
ततोऽभ्यषिञ्चन्राज्येन देवानां दिवि वासवम् ।
सप्तर्षयश्चान्वयुञ्जन्नराणां दण्डधारणे ॥ १८
सप्तर्षीणामथोर्ध्वं च विपृथुर्नाम पार्थिवः ।

K1. 2. 4 लोभो (for मोहो). K2. 4 विजायत (for व्य°).

12 ^{a}) K1. 4 D2 तमो- (for ततो). K2 -परेतास्ता; K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds1 D2. 3. 6. 8 -परी- (Dn4 °रि)तास्ता; Ds2 °तास्मा (for °तास्ते). — ^{b}) Ds2 (by corr.) नापश्यत; T1 °श्यंति. Ds1 -पुरां; T G1–3 M1. 5–7 -पुरं. — ^{c}) K2 परंपरावमर्देन; T1 G1. 3 परस्पर(T1 °रं)विम°. — ^{d}) K1. 3 वर्तयंतो; K4. 7 V1 Ds D4. 5. 7. 9 G2 वर्धयंतो; K6 Bo. 6–9 Da3. a4 Dn1. n4 D2. 3. 6. 8 वर्धयंत्यो. T G1. 3 M1. 5–7 विमोहिताः (for यथासुखम्).

13 B6 partly damaged. — ^{a}) K1 तां; K6 lacuna; V1 ते; Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 6. 8 ताः (for तान्). K7 तान्प्राप्य तु संधिग्धो (sic); D5. 7 ततः प्राप्य तु धिग्दंडो. — ^{b}) K7 D9 अथो (for अतो). K1. 7 B9 Da3. a4 Ds1 D4 भवेत्; K2 भयं (sic) (for ऽभवत्). — ^{c}) K1. 2. 6 V1 Dn4 Ds2 D5 G2. 3 [ऽ]भ्यगच्छद्; T1 [ऽ]ध्यगच्छद्. T1 G1. 3 वेदां- (G1 °दा)श्च (for देवांश्च). — ^{d}) D5. 7 [अ]वमन्यते; T °मत्य तान्; G1 व्यतिक्रमात्; G2. 3 M1. 5–7 [अ]वमत्य ह (G3 च) (for °मन्य ह). K2 ब्राह्मणानवमन्य च.

14 ^{a}) G1 कालेन (for काले तु). — ^{b}) B3 (marg. as in text) देवपरं (for °वरं). K7 D4. 9 G2 देव(G2 °वा)देवं परं शिवं. — ^{c}) K6 अगमत्; K7 °च्छत्. K4 B7 Da4 D2. 5–8 M1. 5 धीरं; B6 (marg.) T G1. 3 M6. 7 देवं; Dn1 D3 धीर; Ds1 वीर (for वीरं). — ^{d}) K6 V1 Bo. 6 (marg. as in text). 7. 9 Da3. a4 Dn1. n4 Ds D2. 3. 5–8 T G3 M1. 7 गुणाधिकं (T1 °पं); B3 (marg. as in text) गुणात्मकं; G2 (also as in text) पिनाकिनं (for गणाधिपम्).

15 ^{a}) K1. 2. 4 V1 तेन स ते च (V1 तेम) गगनाद्. — ^{b}) K1. 2. 4 असुराः; K6 D6 सपुरा; Dn1 T1 सपुरः. K1. 4. 7 D6. 7. 8 T G1–3 पतिताः. — ^{c}) K1. 2. 4 V1 B3 तदैव; K6. 7 B6. 7. 8 (marg.). 9 Da3. a4 D4. 5. 7. 9 त्रिधैव (for तिस्रोऽपि). In D6, the portion from केन बाणेन up to the end of the Mokṣadharmaparvan is lost on missing folios. T G2. 3 M1. 5–7 त्रिदे(T G3 °दै)वत्येन बाणेन; G1 त्रिदशेड्येन बा°. — ^{d}) Ds2 (by corr.) [अ]प्यमित-; G2 [अ]व्यथित- (for [आ]प्यायित-). T1 G1 देवस्यामिततेजसः. ❀ Cn: देवैरिन्द्रियैराप्यायितेन तेजसा संस्कारशेषेण । ❀

16 D6 missing (cf. v. l. 15). V1 reads 16^{a}–17^{b} on marg. — ^{a}) T2 G1. 3 अपि (for अधि-). Da3. a4 तेषामधिपतिस्स्वामी. — ^{b}) Ds1 भीतो; Cs (gloss: भीमनामा) Cv (gloss: महादेवः) भीमो (as in text). B3 (marg.) G2 M1. 5–7 भीमको भीमविक्रमः. — ^{d}) K7 D4. 9 (before corr.) सहितः (for स हतः).

17 D6 missing (cf. v. l. 15). V1 reads 17^{ab} on marg. — ^{a}) D4 हतो. K2 तु तं; K4 स्थितं; G1 कथं; G2 [ऽ]थ स्वद्-; G3 तु स्वं (for ऽथ स्वं). G1 पापं (for भावं). — ^{b}) K2 मानवः; Ds1 दानवाः; D3 मामकाः. — ^{c}) K2 प्रवर्तंत; K4. 6 प्रावर्त(K6 °र्तं)ते; Bo Da3 Dn1. n4 Ds D2. 3. 8 प्रापद्यंत (Ds1 °ते). D5. 7 [अ]थ (for च). K6 Bo. 7. 8 Da3. a4 Dn1. n4 Ds D2. 3. 8 वेदान्वै; D5. 7 वेदाश्च; T1 M7 वै देवाः; T2 G1 M1. 5. 6 वै वेदाः (by transp.). — ^{d}) D5. 7 यथासुखं; G2 M1. 5–7 यथापुरं.

18 D6 missing (cf. v. l. 15). — ^{a}) K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 8 [ऽ]भिषिच्य; K7 D5. 7 T2 G1 M5 [ऽ]भ्यषिंचद् (for °षिञ्चन्). K1. 4. 7 V1 D4. 9 राज्ये च; K2 राज्ये*; D5 राजेंद्र; D7 राजा तु; M1. 5–7 राज्ये तु (for राज्येन). — ^{b}) K2 देवानांधिच (sic); G2 देवा दिवि च (for देवानां दिवि). M1 वासवः. — ^{c}) K6 B6 Da3. a4 चायुज्यंत; K7 D4. 9 चान्वयुज्यन्; B3 [ऽ]न्वयुज्यंत; B9 [ऽ]नुयुज्यंते; M1. 5–7 चाभ्ययुंजन् (for चान्व°). — ^{d}) K2 B3 (marg.) दंडधारणं; G1 °धारणैः.

राजानः क्षत्रियाश्चैव मण्डलेषु पृथक्पृथक् ॥ १९

महाकुलेषु ये जाता वृत्ताः पूर्वतराश्च ये ।
तेषामथासुरो भावो हृदयान्नापसर्पति ॥ २०

तस्मात्तेनैव भावेन सानुषङ्गेन पार्थिवाः ।
आसुराण्येव कर्माणि न्यषेवन्भीमविक्रमाः ॥ २१

प्रत्यतिष्ठंश्च तेष्वेव तान्येव स्थापयन्ति च ।
भजन्ते तानि चाद्यापि ये बालिशतमा नराः ॥ २२

तस्मादहं ब्रवीमि त्वां राजन्संचिन्त्य शास्त्रतः ।
संसिद्धाधिगमं कुर्यात्कर्म हिंसात्मकं त्यजेत् ॥ २३

न संकरेण द्रविणं विचिन्वीत विचक्षणः ।
धर्मार्थं न्यायमुत्सृज्य न तत्कल्याणमुच्यते ॥ २४

स त्वमेवंविधो दान्तः क्षत्रियः प्रियबान्धवः ।
प्रजा भृत्यांश्च पुत्रांश्च स्वधर्मेणानुपालय ॥ २५

इष्टानिष्टसमायोगो वैरं सौहार्दमेव च ।
अथ जातिसहस्राणि बहूनि परिवर्तते ॥ २६

तस्माद्गुणेषु रज्येथा मा दोषेषु कदाचन ।

C. 12. 10818
B. 12. 295(4). 28
K. 12. 300. 28

---

19 D6 missing (cf. v. l. 15). — a) K6.7 D5 अथोर्द्ध्वं; G1 अधोर्ध्वं. — b) Bo.9 विप्रथुर्; T2 G1 M6.7 विपृथुं; G3 स पृथुर् (for विपृथुर्). T G1 पार्थिवं. K6.7 D4.5.7.9 पृथुर्नाम च पार्थिवः. ❀ Cn: विपृथुः, पृथुरेव विशिष्टो गुणैरित्यर्थः ॥ Cn: विपृथुः, विगतं पृथु प्रथनादवयवोपचयात्पृथु शरीरम्, तद्रहितोऽशरीरः परमात्मा । ❀ — c) K4 क्षत्रियश्; K1 D4.7 रक्षिणश्. G1 राजानमभ्यषिंचन्वै. ❀ Cn: राजन्त इति राजानः षट्चक्राधिपाः गणेशाद्याः क्षत्रिया योगविघ्नविनाशिनः । ❀

20 D6 missing (cf. v. l. 15). — a) Da3 संजाता; G2 ये ज्ञाता (for ये जाता). — b) K6 B8 (marg.) Dn1.n4 D8 D2.3.8 वृद्धाः; D5.7 वृत्तं (for वृत्ताः). K1 पूर्वतरश्; K7 B6.7.9 D4.9 °तरं; D5.7 पूर्वं चरंश् (for पूर्वतराश्). Da4 ते (for ये). — c) Da3.a4 Dn1.n4 D8 D3.4.9 अपि (for अथ). — d) Bo.7.8 (marg. as in text) [अ]वसर्पति; Dn4 Ds1 G1 [उ]प°; G2 M1.5–7 [अ]पसर्पत.

21 D6 missing (cf. v. l. 15). — a) K1 च (for [ए]व). — b) K1.2.7 D5.7 G2 पार्थिव; Da3.a4 पार्थिवः. — d) K2 न्यष्वेवन्; K6.7 Bo.6–8 Da3.a4 Dn1.n4 D8 D2.3.5–8 M6 °सेवन्; M1.5.7 °षेधन् (for °षेवन्).

22 D6 missing (cf. v. l. 15). — a) K7 V1 D4.5.7.9 T G3 प्रत्यतिष्ठंत; B8 (marg. as in text) प्रतितिष्ठंति; G1 प्रत्यतिष्ठन्न (for °तिष्ठंश्च). M1 तान्येव (for तेष्वेव). K6 प्रत्यतिष्ठन्त्र तेष्वेषु (sic). — b) K6 V1 Bo.6.7.8 (marg.).9 Da3.a4 Dn1.n4 D8 D2.3.8 [अ]पि (for च). — c) K7 D4.7 भजंति; T भवंति; G2 M5.6 भुंजंते. K1.2.4 तेन; B6 चापि; T [ए]तानि (for तानि). V1 चान्यानि (for चाद्यापि). — d) K6 V1 Bo.6.7.9 Da3.a4 Dn1.n4 D8 D2.3.8 G2 M1.5–7 बालिशतरा. Dn4 जनाः (for नराः).

23 D6 missing (cf. v. l. 15). — a) V1 इदं (for अहं). K2 T2 M1.5–7 त्वा (for त्वां). — b) T G1.3 राज्यं (for राजन्). — c) V1 Bo.6.7.9 Da3.a4 D5.7.9 T G1–3 M1.5–7 संसिद्धावा(D9 °द्धोधि-; M7 °विद्धात्वा)गमं कुर्यात्. ❀ Cn: संसिद्धो नित्यसिद्ध आत्मा, तदधिगमं आत्मज्ञानं, आसुरभावनिवृत्तये संपादनीयमित्यर्थः । ❀ — d) Ds1 D5 सिंहात्मकं (by metathesis).

24 D6 missing (cf. v. l. 15). — a) K1.2 नासत्कारेण; K6 V1 न शंकरेण; Dn4 निसं°; D8 तरसं° (for न सं°). — b) K6 V1 Bo.6.7.8 (marg.).9 Da3.a4 Dn1.n4 D8 D2.3.8 प्र(B8 [marg.] also प्रा)चिन्वी(Da3.a4 °न्वि)याद्; D5.7 विचिन्वंति; T G1–3 M1.5–7 °न्वीयाद् (for °न्वीत). — c) V1 B9 Dn4 D4.5.7.9 धर्मार्थं-; G2 धर्मज्ञं. — d) D5 कर्मार्थम्; D7 कामार्थम् (for कल्याणम्). D4 उद्यते (for उच्यते).

73 K4 om. 73 (cf. v. l. 72). K1 G2 om. (hapl.) 73. M5 om. (hapl.) 73^{ab}. — ^{a}) K6. 7 D4. 8. 9 ततो; Ds T G1. 3. 6 Cs मनो (for नभो). M6 वहंति. K7 D4. 9 लोकेषु (for °श). — ^{b}) K7 T G3. 6 तमसः; G1 तपसः (for रजसः). K2 परमा. — After 73^{ab}, T G1. 3. 6 Kumbh. ed. ins.:

749* तमो वहति राजेन्द्र रजसः परमां गतिम् ।

[G1 महति (for व°). G3 कौंतेय; Kumbh. ed. लोकेश (for राजेन्द्र).]

— K2 Dn4 D5. 7 om. (hapl.) 73^{cd}. — ^{c}) D4 om. (hapl.) from राजेन्द्र up to वहति (in 74^{c}).

74 K4 om. 74 (cf. v. l. 72). D4 om. up to the second वहति (cf. v. l. 73). — ^{a}) K1 T2 G1–3 M1. 5. 7 शुद्धात्मा; D5. 7 तान्शुद्धान् (for शुद्धात्मन्). — ^{b}) K2 परो; B8 (marg. as in text) T1 G1. 6 हरिं (for परं). Da1 G1 प्रभुः (for प्रभुम्).

75 K4 om. 75 (cf. v. l. 72). — ^{b}) B8 (marg.) यद्- (for तद्-). K2 अमला. K7 D4. 9 T G1–3. 6 M1. 5–7 Cv (gloss: तस्मिन्, परमात्माभिधे नारायणे) तद्भूता यतयो(G1. 2 °तो)मलाः. — ^{c}) K7 कल्पते; M7 कल्पांते (for कल्पन्ते). K2 अस्य तत्त्वाय कल्पांते. — ^{d}) K1. 2. 7 D4. 9 निवर्तंते न; Dn1 न विवर्तंति; T G1. 3. 6 न चावर्तंति (for न निवर्तन्ति). K1. 7 D9 चाभिभोः; K6 वा प्रभो; Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 7. 8 वा विभो; G2 चाहिभो (for चाभिभो). — ^{e}) T G1. 6 परमात्मा (for °मा सा). G3 om. सा. D9 मतिं; M7 गतिं (for गतिः). — After 75, K6 V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 7. 8 editions ins.:

युधिष्ठिर उवाच ।

स्थानमुत्तममासाद्य भगवन्तं स्थिरव्रताः ।
आजन्ममरणं वा ते स्मरन्त्युत न वानघ ॥ ७६
यदत्र तथ्यं तन्मे त्वं यथावद्वक्तुमर्हसि ।
त्वदृते मानवं नान्यं प्रष्टुमर्हामि कौरव ॥ ७७
मोक्षदोषो महानेष प्राप्य सिद्धिं गतानृषीन् ।
यदि तत्रैव विज्ञाने वर्तन्ते यतयः परे ॥ ७८
प्रवृत्तिलक्षणं धर्मं पश्यामि परमं नृप ।
मग्नस्य हि परे ज्ञाने किं नु दुःखतरं भवेत् ॥ ७९

भीष्म उवाच ।

यथान्यायं त्वया तात प्रश्नः पृष्टः सुसंकटः ।
बुद्धानामपि संमोहः प्रश्नेऽस्मिन्भरतर्षभ ।
अत्रापि तत्त्वं परमं शृणु सम्यङ्मयेरितम् ॥ ८०
बुद्धिश्च परमा यत्र कापिलानां महात्मनाम् ।
इन्द्रियाण्यपि बुध्यन्ते स्वदेहं देहिनो नृप ।
कारणान्यात्मनस्तानि सूक्ष्मः पश्यति तैस्तु सः ॥ ८१ C. 12. 11163 B. 12. 302(1). 66 K. 12. 107. 66

750* सत्यार्जवरतानां वै सर्वभूतदयावताम् ।

[Bo समार्जव- (for सत्या°). K6 Da4 च (for वै). V1 सत्य- (for सर्व-).]

— After the above, B6 ins. an addl. colophon [*Sub-parvan :* मोक्षधर्म].

76 K4 om. 76 (cf. v. l. 72). — a) Da3. a4 ज्ञानम् (for स्थानम्). — b) K1. 2. 7 V1 B6. 8 Da4 D8 D4. 9 भगवंतः (for °वन्तं). K2 स्थिरव्रतां (for °व्रताः). ❀ Cn : भगवन्तं, षड्गुणैश्वर्यसंपन्नं परमात्मानमेव परं मोक्षाख्यं स्थानम् । ❀ — c) K7 D4. 9 किं ते; V1 वा न; B8 (marg. as in text) चापि (for वा ते). ❀ Ca : आजन्ममरणम्, अनेकजन्ममरणान्ते । ❀ — d) G2 स्मरति. K7 B9 तव; Bo मम; T1 नरा (for न वा). V1 स्मरंत्युत न चानघ; D5. 7 संसरंत्यथ वानघ.

77 K4 om. 77 (cf. v. l. 72). — a) K1. 2 D4. 5. 7. 8 T G1. 3. 6 तत्त्वं; K7 वृत्तं; B8 (marg. as in text) पथ्यं (for तथ्यं). K7 तत्त्वं त्वं; T G1. 3. 6 तत्सर्वं (for तन्मे त्वं). — b) Bo अर्हति. K7 तन्मे वक्तुमिहार्हसि. — c) K1. 2. 6 V1 B6. 9 Da3. a4 T G1. 3. 6 त्वाम् (for त्वद्). B7 Dn1. n4 D8 D2. 3. 8 पुरुषं (for मानवं). — K2 om. (hapl.) 77d–80a. — d) G2 कौरवा.

78 K2. 4 om. 78 (cf. v. l. 77, 72). K7 om. 78ab. — a) K6 B7–9 Da3 Dn1 T G3. 6 मोक्षे; D5. 7 मोक्षो; G1 मोक्षं (for मोक्ष-). K1 -योगो; D4 -दोषा; G2 -दोषे (for -दोषो). — b) M1. 5–7 प्रति- (for प्राप्य). B9 Da3 Dn1. n4 Ds2 D2. 8 G1 M1. 5–7 सिद्धि- (for सिद्धिं). B8 -गताम् (for गतान्). V1 गता नृपाः. — cd) K6 विज्ञातुं (for °ने). Ds1 पुरे (for परे). ❀ Cs : विज्ञाने वर्तन्ते, दुःखात्मकजननमरणस्मरणे वर्तन्ते । ❀

79 K2. 4 om. 79 (cf. v. l. 77, 72). — c) K1 मात्रस्य; D8 मग्न्यस्य; Ca (gloss : तत्रैव व्यसनवत्प्रसक्तस्य) मग्नस्य (as in text). K1 वि-; G3 च (for हि). Dn1. n4 D8 D2. 3. 8 परं ज्ञानं (for परे ज्ञाने). — d) K6 तद्; K7 B7–9 D2. 3. 7 न; Bo Da4 Dn1 Ds2 T G6 तु (for नु). D5. 7 दुःखं परं (for दुःखतरं). K7 D4. 9 महत् (for भवेत्). ❀ Ca : किं नु दुःखतरं ततोऽन्यत्, अपि तु तदेव दुःखतरं रागातिशयेन सेव्यमानकर्मत्वादित्याशयः । ❀ — After 79, K1 ins. an addl. colophon [*Sub-parvan :* मोक्षधर्म. — *Adhy. name :* सांख्ययोगविधिः].

80 K2 om. 80a (cf. v. l. 77). K4 om. 80 (cf. v. l. 72). — ab) K1 यथा न्यायं. T G1. 3. 6 transp. तात प्रश्नः and पृष्टः. D8 तावत् (for तात). K1. 2 सुसंकटं. — c) Bo. 6–8 Da3. a4 Dn1. n4 D8 D2. 3. 5. 7. 8 T G1. 3. 6 बुधानाम् (for बुद्धा°). D5 om. from संमोहः up to कापि (in 81b). G3 M1. 5–7 संदेहः (for संमोहः). — e) K2. 7 D4. 9 तत्र; T G1. 3. 6 M1. 5–7 तथा (for अत्र). K7 सत्यं परमं; Da4 D7 T G1. 3. 6 परमं तत्त्वं (by transp.).

81 K4 om. 81 (cf. v. l. 72). D5 om. up to कापि (cf. v. l. 80). — a) K2 परस्मा; K7 °वा (for °मा). D7 तत्र (for यत्र). — b) Da3. a4 कपिलानां. — c) K6 Ds2 D3 एव; V1 Bo. 6–9 Da3. a4 Dn1. n4 Ds1 D2 अत्र-; D8 अत्र; T G1–3. 6 न (for अपि). K7 बुध्यते (for बुध्यन्ते). — d) K6 V1 B7 Da4 D5 स्वं देहं; K7 Bo. 3. 9 Da3 Dn1. n4 D8 D3–4. 8. 9 G2 M1. 5–7 स्वदेहे (for °हं). K6. 7 Bo. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 D8 D2–5. 7–9 देहिनां (for °नो). — K2 om. 81e. — e) K7 B6 (marg.) D4. 9 M1. 5. 6 Cs करणानि (for का°). T M1. 7 आत्मन(M1 °सं)स्थानि (for °स्तानि). K1 तात (for तानि). — f) K1. 2 सूक्ष्मं; K7 D4. 9 सूक्ष्मं (for सूक्ष्मः). Da4 पश्यति-

C. 12. 11164
B. 12. 302(1). 87
K. 12. 307. 87

आत्मना विप्रहीणानि काष्ठकुड्यसमानि तु ।
विनश्यन्ति न संदेहः फेना इव महार्णवे ॥ ८२
इन्द्रियैः सह सुप्तस्य देहिनः शत्रुतापन ।
सूक्ष्मश्चरति सर्वत्र नभसीव समीरणः ॥ ८३
स पश्यति यथान्यायं स्पर्शान्स्पृशति चाभिभो ।
बुध्यमानो यथापूर्वमखिलेनेह भारत ॥ ८४
इन्द्रियाणीह सर्वाणि स्वे स्वे स्थाने यथाविधि ।
अनीशत्वात्प्रलीयन्ते सर्पा हतविषा इव ॥ ८५

इन्द्रियाणां तु सर्वेषां स्वस्थानेष्वेव सर्वशः ।
आक्रम्य गतयः सूक्ष्माश्चरत्यात्मा न संशयः ॥ ८६
सत्त्वस्य च गुणान्कृत्स्नान्रजसश्च गुणान्पुनः ।
गुणांश्च तमसः सर्वान्गुणान्बुद्धेश्च भारत ॥ ८७
गुणांश्च मनसस्तद्वन्नभसश्च गुणांस्तथा ।
गुणान्वायोश्च धर्मात्मंस्तेजसश्च गुणान्पुनः ॥ ८८
अपां गुणांस्तथा पार्थ पार्थिवांश्च गुणानपि ।
सर्वात्मना गुणैर्व्याप्य क्षेत्रज्ञः स युधिष्ठिर ॥ ८९

---

82 K4 om. 82 (cf. v. l. 72). —a) K1. 2. 6. 7 D8 D4. 5. 7. 9 G2 विप्रहीनानि. —b) K7 D4. 9 ह (for तु). —d) K6 (before corr.). 7 (*sup. lin.* as in text) Ds1 G1 फेणा; B7. 9 वेला (for फेना). ❀ Cn: यथा फेनो जलेन विना स्वयं निरात्मैव, सात्मत्वेन दृष्टोऽपि तेन विना न तिष्ठतीति । ❀

83 K4 om. 83 (cf. v. l. 72). —b) K6. 7 V1 B7 Da3 Dn4 Ds2 D2 G2 M7 ॰तापनः (for ॰न). —c) G3 सूर्यश् (for सूक्ष्मश्). K7 D4. 9 शूक्ष्मश्चरति भूतात्मा. — D5. 7 om. 83d–84c. —d) G2 नभसी च समीरिणः.

84 K4 om. 84 (cf. v. l. 72). D5. 7 om. 84abc (cf. v. l. 83). —a) M1. 5–7 सं (for स). K1. 2 यथा न्याय्यं. —b) K2 स्पर्श्यान्; D9 स्पृशन्; G2. 3 स्पर्शं; Ca (gloss: विषयान्) स्पर्शान् (as in text). K1. 2 पश्यति (for स्पृशति). K1 D9 चाभिभोः; K6 V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 8 वा विभो; T G1. 3. 6 च प्रभो (for चाभिभो). — 84cd is partly damaged in B6. —c) K2 बुद्धिमानो (for बुध्य॰). K7 D4. 9 यथा शूक्ष्मम्; M5 यथान्यायम्; Cn (gloss: जाग्रद्वत्) ॰पूर्वम् (as in text). —d) D5. 7 निखिलेन (for अ॰). K2 अखिलेन महारत.

85 K4 om. 85 (cf. v. l. 72). —a) V1 B0. 6. 7. 8 (marg.). 9 Da4 Ds1 D8 G2 हि; G1 च (for [इ]-ह). —b) K7 यथा विधिः. —c) K2 corrupt; G1 अनिशत्वात्. D5. 7 प्रणा(D7 ॰णी)यंते; T1 G3 प्रळी॰. —d) M7 हुतविषा (for हत॰).

86 K4 om. 86 (cf. v. l. 72). —a) K7 D4. 9 हि; D7 च (for तु). —b) K2 स्वस्थानेस्वेव; K6 B6. 7. 9 D5. 7 ॰ने ह्येव (for ॰नेष्वेव). V1 reads from सर्वशः up to सर्वान् (in 87c) on marg. —c) K1 अक्रम्य; K6 अक्रम्ये (for आक्रम्य). K1. 2 V1 तु गतीः; K7 D4. 5. 7. 9 [इ]ह गतीः; Ds1 यतयः (for ग॰). K6 Ds2 T G1. 6 सूक्ष्मश्; K7 D4. 9 शूक्ष्माश्; Da3. a4 सर्वाश्; G3 सूक्ष्मं (for सूक्ष्माश्). —d) K7 चरंति. B9 आत्मनि (for आत्मा न). D5. 7 विचरन्मानःसंशयः.

87 K4 om. 87 (cf. v. l. 72). V1 reads up to सर्वान् on marg. —a) T2 सत्यस्य (for सत्त्वस्य). K7 कृच्छ्रान्; D8 सूक्ष्मान् (for कृत्स्नान्). — 87bcd is damaged in B6. —b) K7 तेजसश् (for र॰). — Ds2 reads 87c–88d on marg. —c) Ds2 चैव (for सर्वान्). —d) K2 बंधेश्च (sic); Da3 बुद्धिश्च; Da4 बद्धश्च; D4. 9 बुद्धाश्च; D5. 7 बुध्येत (for बुद्धेश्च). G1 नरर्षभ (for च भारत).

88 K4 om. 88 (cf. v. l. 72). Ds2 reads 88 on marg. —a) K6 D7 गुणाश्च; Da4 गुणाद्ध. B3 D5. 7 G1 नभसस् (for मनसस्). K6 V1 B0. 6. 7. 9 Da3. a4 Dn1. n4 Ds1 D2. 3. 8 चापि; Ds2 चैव; G1 सत्त्वं (for तद्वन्). —b) D5. 7 मनसश् (for नभसश्). K7 D4. 9 G3 पुनः; B0 Dn1. n4 D8 D2. 3. 8 च सः (for तथा). K1. 2 गुणांश्च नभसस्तथा. — G3 om. (hapl.) 88cd. —c) K2 बाहोश् (for वायोश्). B8 धर्मज्ञ; Da4 Ds2 धर्मात्मा; D5 lacuna (for धर्मात्मंस्). —d) K6 V1 B0. 6–9 Da3. a4 Dn1. n4 D8 D2. 3. 5. 8 स्नेह-जांश्च; T G1. 2. 6 M1. 5–7 ते(M1. 5–7 तै)जसां च (for तेजसश्च). K1. 2 V1 तथा (for पुनः). K7 D4. 9 गुणां-स्तेजोभवांस्तथा.

89 K4 om. 89 (cf. v. l. 72). —a) G2 अपान् (for अपां). K7 गुणस्; Da4 गुणास्. —c) K6 B6. 9 Da4 D5. 7 सर्वानेव; K7 D9 सर्वात्मनो; B0 धर्मानेव; B7. 8 Da3 Dn1. n4 D8 D2. 3. 8 सर्वाण्येव (for ॰त्मना). K2 वापि; T G1. 3. 6 व्यासः; G2 व्यापः; M1. 5–7 वाप्यः (for व्याप्य). —d) K6 B0. 6–9 Da3. a4 Dn1. n4 D8

आत्मा च याति क्षेत्रज्ञं कर्मणी च शुभाशुभे ।
शिष्या इव महात्मानमिन्द्रियाणि च तं विभो ॥ ९०
प्रकृतिं चाप्यतिक्रम्य गच्छत्यात्मानमव्ययम् ।
परं नारायणात्मानं निर्द्वंद्वं प्रकृतेः परम् ॥ ९१
विमुक्तः पुण्यपापेभ्यः प्रविष्टस्तमनामयम् ।
परमात्मानमगुणं न निवर्तति भारत ॥ ९२
शिष्टं त्वत्र मनस्तात इन्द्रियाणि च भारत ।
आगच्छन्ति यथाकालं गुरोः संदेशकारिणः ॥ ९३
शक्यं चाल्पेन कालेन शान्तिं प्राप्तुं गुणार्थिना ।
एवं युक्तेन कौन्तेय युक्तज्ञानेन मोक्षिणा ॥ ९४
सांख्या राजन्महाप्राज्ञा गच्छन्ति परमां गतिम् ।
ज्ञानेनानेन कौन्तेय तुल्यं ज्ञानं न विद्यते ॥ ९५
अत्र ते संशयो मा भूज्ज्ञानं सांख्यं परं मतम् ।
अक्षरं ध्रुवमव्यक्तं पूर्वं ब्रह्म सनातनम् ॥ ९६
अनादिमध्यनिधनं निर्द्वंद्वं कर्तृ शाश्वतम् ।
कूटस्थं चैव नित्यं च यद्वदन्ति शमात्मकाः ॥ ९७

C. 12. 11199
B. 12. 302(1). 102
K. 12. 307. 102

D2. 3. 8 क्षेत्रज्ञेषु (for °ज्ञः स). T2 च (for स). D6 युधिष्ठिरः.

90 K1 om. 90 (cf. v. l. 72). T G1. 3. 6 read 90 after 92. — a) T G1. 3. 6 मनोनु (G1 मनो न); M1. 5–7 आत्मानु- (for आत्मा च). Dn1. n4 D8 Bom. Cal. ed. Cn (gloss : व्याप्नोति) व्याति; Ca याति (as in text). — b) V1 Bo Ds2 कर्मणीव; D6 °णा च; T2 G1 कर्माणि च. D4 om. (hapl.) शुभा. — Da4 om. 90cd. — d) K1. 2 विभुं; K6 V1 Bo. 6–9 Da3 Dn1. n4 D8 D2. 3. 8 प्रभो (for विभो).

91 K4 om. 91 (cf. v. l. 72). — a) D4 वा; Cn (gloss : चात् इन्द्रियाणि, कार्योपाधिं प्रकृतिं कारणोपाधिं) च (as in text). G1 अनुक्रम्य (for अति°). D5. 7 प्रवृ(D7 °कृ)तिं च व्यतिक्रम्य. — b) K7 D4. 9 गच्छंति. — K7 om. (hapl.) 91c–92b. — c) D5. 7 यस्तं (for परं). K6 परं नराणामात्मानं; T G1. 3. 6 परं नारायणं देवं. — d) Da4 प्रकृतैः.

92 K4. 7 om. 92ab (cf. v. l. 72, 91). — a) B6. 7. 8 (marg.). 9 Da3. a4 सर्व- (for पुण्य-). — b) M1. 5–7 प्रवेष्टा (for प्रविष्टस्). K2 प्रविष्टस्य ममन्मयं (corrupt); K6 °ष्टस्तमसामयं. — d) K1. 2 निवर्तेत; D5. 7 T2 °र्तंति; G2 °र्तत; M1. 7 °र्तैति (for °र्तति). G1 अनिवर्तति भारत. — After 92, T G1. 3. 6 read 90.

93 Ds1 om. (hapl.) 93ab. — a) Ds2 शिष्टस्; D5. 7 सृष्टास्; G2 शिष्टास् (for शिष्टं). K6. 7 V1 Bo. 6–9 Dn1. n4 Ds2 D2–5. 7–9 M1 editions तत्र; T G3. 6 चात्र (for त्वत्र). M5 (*inf. lin.*) मनःकर्म (for मनस्तात). ❀ Cv : शिष्टं स्वस्वरूपचिन्मात्रदेहेनावशिष्टम् । अतः शिष्टं, विशिष्टमुत्तमम् । तत्र, मुक्तौ । ❀ — c) K3 Da4 D8 आगच्छति; M5 (*inf. lin.*) Cv अनुयांति. K2 यथाकाले; G1. 3 °काल्यं; M5 (*inf. lin.*) °कामं (for °कालं). ❀ Cv : अनुयान्ति, अनुकूलतयैव यान्ति, न तु कदापि दुःखं प्रापयन्ति । ❀ — d) K3 गुरु- (for गुरोः). Da3 संदेह- (for संदेश-). ❀ Cn : गुरोः संदेशकारिणः । प्रारब्धकर्मानुसारिणी ईश्वरप्रेरणा, तां कर्तुं शीलं येषां ते । ❀

94 a) K1 शक्तं; K6 शक्त्याश्; Bo. 6. 9 शक्या; D5. 7 शक्त्या (for शक्यं). G1 om. चाल्पेन. — b) K1 शांति; B3. 9 Da3. a4 D8 G2 M5 शांतिः; G1 शक्तिं (for शान्तिं). K7 D4. 9 आप्तुं; G2 प्राप्य; M1. 7 प्राप्तिं (for प्राप्तुं). G2 M1. 6. 7 गुणाधिकाः (G2 °का) (for °र्थिना). ❀ Cp : गुणार्थिना, आत्मविवेचनमेव गुणस्तदर्थिना । ❀ — c) K4 Dn1. n4 D8 D2. 3. 8 G1 उक्तेन (for युक्तेन). — D4. 5 om. (hapl.) 94d–95c. — d) K6 युक्तो; Da3. a4 मुक्त- (for युक्त-). K2 मोक्षणा.

95 D4. 5 om. 95abc (cf. v. l. 94). — a) D7 संख्या; G3 सांख्ये (for सांख्या). K1 T2 G1 महाप्राज्ञ; K6 °प्रज्ञा (for °प्राज्ञा). — V1 reads 95c–96b on marg. — c) G2 तेन (for [अ]नेन). T1 G1. 3. 6 सांख्यज्ञानेन कौंतेय. — d) K4 G3 तुल्य- (for तुल्यं). D5. 7 ज्ञाने (for ज्ञानं).

96 D4 om. 96. V1 reads 96ab on marg. — a) K1 तु (for भूज्). — b) B8 (marg. as in text) एतत् (for सांख्यं). — Da4 om. (hapl.) 96cd. — c) G3 परम् (for ध्रुवम्). K6 Bo. 6–9 Da3 Dn1. n4 Ds1 D2. 3. 5. 7. 8 एवोक्तं (for अव्यक्तं). K4 अक्षरांकवमव्यक्तं (sic). — d) K7 D9 सूक्ष्मं; B6–9 Da3 Dn1. n4 D8 D2. 3. 8 T1 G3. 6 पूर्णं; M1. 7 पूर्वे- (for पूर्वं).

97 a) Ds1 -रहितं (for -निधनं). — b) T2 ब्रह्म (for कर्तृ). K4 शास्वतं. K1 निर्द्वंद्वो कर्तुं शाश्वतं (sic); D7 °द्वं कीर्तिताश्च तं. — d) Da3 repeats from शमा up to विक्रियाः (in 98b) after तथा (in 99b).

C. 12. 11200
B. 12. 302. 103
K. 12. 307. 103

यतः सर्वाः प्रवर्तन्ते सर्गप्रलयविक्रियाः ।
यच्च शंसन्ति शास्त्रेषु वदन्ति परमर्षयः ॥ ९८
सर्वे विप्राश्च देवाश्च तथागमविदो जनाः ।
ब्रह्मण्यं परमं देवमनन्तं परतोऽच्युतम् ॥ ९९
प्रार्थयन्तश्च तं विप्रा वदन्ति गुणबुद्धयः ।
सम्यग्युक्तास्तथा योगाः सांख्याश्चामितदर्शनाः १००
अमूर्तेस्तस्य कौन्तेय सांख्यं मूर्तिरिति श्रुतिः ।
अभिज्ञानानि तस्याहुर्मतं हि भरतर्षभ ॥ १०१
द्विविधानीह भूतानि पृथिव्यां पृथिवीपते ।
जङ्गमागमसंज्ञानि जङ्गमं तु विशिष्यते ॥ १०२
ज्ञानं महद्यद्धि महत्सु राज-
न्वेदेषु सांख्येषु तथैव योगे ।
यच्चापि दृष्टं विविधं पुराणं
सांख्यागतं तन्निखिलं नरेन्द्र ॥ १०३
यच्चेतिहासेषु महत्सु दृष्टं
यच्चार्थशास्त्रे नृप शिष्टजुष्टे ।

K2 शमात्मकः; V1 Bo. 6. 7. 9 G3 समात्मकाः; Dn1. n4 D8 D2. 3. 8 मनीषिणः; D5. 7 शमात्मनः (for °त्मकाः).

98 For the repetition in Da3, cf. v. l. 97. V1 reads 98[b] on marg. — [b]) D8 सर्गाः (for सर्ग-). D7 T G1–3. 6 -प्रळय- (for -प्रलय-). K1 -विक्रयाः. — [c]) K1 ये च; K3. 6 V1 Bo. 8. 9 Da3 यं च; K4 D5. 7 पंच (for यच्च). K1. 6 संसंति; K3 D7 शंसति; K7 संशति; Bo D5 T2 संशंति (for शंसन्ति). G3 M1. 5. 7 शास्त्राणि; M6 मार्गाणि (for शास्त्रेषु). — [d]) K6 वर्तंत; B6. 8 (marg.) वर्तंते (for वदन्ति).

99 For the repetition in Da3, cf. v. l. 97. — [a]) K1. 2. 4. 7 B8 D4. 9 देवाश्च विप्राश्च (by transp.); K6 B6 D5. 7 G3 M5–7 विप्राश्च वेदाश्च. T G1. 3. 6 सर्वे वेदाश्च देवा(T1 वेदा)श्च. — [b]) Da3 om. from गम up to मन (in 99[d]). K4. 6. 7 B6–8 Da4 Dn1. n4 D8 D2–4. 8. 9 तथा शम-; Bo. 9 तथा सम-; T G1–3. 6 M1. 5–7 तथा शास्त्र- (for तथागम-). — [c]) K3 ब्राह्मं*; K4 ब्राह्मण्यं; M7 ब्रह्मण्य-; Cn (gloss: ब्रह्मजातिहितम्); Cp (gloss: ब्रह्मणि वेदे प्रतिपादितम्) ब्रह्मण्यं (as in text). — [d]) K1 D5. 7 अनंत- (for अनन्तं). K1 परमोच्युतं; K6 Bo. 6–8 Da3. a4 Dn1. n4 D2. 3. 5. 7. 8 M5 °मच्युतं; V1 B9 D8 °मव्ययं (for °तोऽच्युतम्).

100 [a]) G1 ये (for तं). D5. 7 प्रार्थयंतीश्वरं विप्रा. — [b]) T G1. 3. 6 M1. 5–7 शुभ- (for गुण-). — [c]) K7 B8 D4. 5. 7. 9 T2 उक्तास् (for युक्तास्). K3 यथा; T2 सदा (for तथा). — [d]) K3 सांख्यश्; G1 सांख्यांश्. K1 चासित- (for चामित-). K2. 4 -दर्शनः; V1 D5. 7 -विक्रमाः.

101 [a]) B7. 9 Da3 अमूर्तं (for अमूर्तेस्). — [b]) K3 Bo D8 D5. 7 G3 M1. 7 सांख्य-; B6. 7. 8 Da3. a4 T1 Cpp सांख्या; Cp ज्ञानं (for सांख्यं). K2. 4 श्रुतेः; K7 lacuna; G1 श्रुतिं. — [c]) K2 अवि-; D5. 7 अपि; T G1–3. 6 M6. 7 अति- (for अभि-). D8 -जानामि; D4. 5. 7. 9 -ज्ञानेन (for -ज्ञानानि). — [d]) K1. 3. 6 D5. 7 G3 मतिर्हि; K7 D4. 9 मतिभिर्; Ds1 मार्तिं हि; T2 मतं वा (for मतं हि). Da3. a4 पुरुषर्षभ (for भरत°). ❀ Ca (reading मतीर्): दूरश्रवणदर्शनाद्याहितमतयो, ब्रह्मणि ज्ञाते, ज्ञापकानि ॥ Cn: मतं, ज्ञानम् । मनज्ञाने अस्माद्भावे निष्ठा (Pāṇini 3. 2. 188 and 3. 3. 114) । निर्विषयघटादिज्ञानमेव परं ब्रह्मेत्यर्थः । ❀

102 [a]) G1. 2 विविधानि (for द्विवि°). K3 हि (for [इ]ह). — [b]) D4 om. पृथिव्यां. — [c]) B8 (marg. as in text) जंगमाजंगमानीह; T G1. 3. 6 °माख्यानि; G2 °जंगसंज्ञानि (sic). — [d]) B8 (marg. as in text) जंगमस्. K1. 2. 4 विशां पते; D7 (marg. as in text) विधीयते (for विशिष्यते).

103 [a]) T2 G3 विद्धि (for यद्धि). B8 (marg. as in text) जातं (for राजन्). — [b]) G3 देवेषु (for वेदेषु). K7 D4. 9 सांख्ये च; Da4 lacuna (for सांख्येषु). — [c]) K1 T2 यश्चापि. Bo विविधः; Dn1 विबुधं (for त्रिविधं). K4. 6 Bo. 6–9 Da3. a4 Dn4 D8 D2. 3. 8 T G1–3. 6 पुराणे (for °णं). — [d]) D7 om. (hapl.) from तन्निखिलं up to सांख्यागतं (in 104[d]). G3 तं च खिलं (for तन्निखिलं).

104 D7 om. up to सांख्यागतं (cf. v. l. 103). — [a]) G2 यच्चैषु भावेषु (for यच्चेतिहासेषु). B8 महच्च (for °त्सु). D5 यच्चेतिहासोपनिषत्सु दृष्टं. — [b]) K1 यच्चार्थं-; K2 यश्चार्थ-; D5 यत्त्वर्थ- (for यच्चार्थ-). K7 -शास्त्रं (for -शास्त्रे). Da4 जुष्ट- (for शिष्ट-). — [c]) K7 D4. 9 विज्ञानतो वै (for ज्ञानं च लोके). M1. 5–7 योगे (for लोके). K1. 2 तद् (for यद्). K7 असि (for अस्ति). D5 ज्ञानं च लोकेषु यदस्ति किंचित्. — [d]) K1. 3 G1 तच्च; D5. 7 तत्त्व-; G3 तं च (for तच्च).

ज्ञानं च लोके यदिहास्ति किंचि-
त्सांख्यागतं तच्च महन्महात्मन् ॥ १०४

शमश्च दृष्टः परमं बलं च
ज्ञानं च सूक्ष्मं च यथावदुक्तम् ।
तपांसि सूक्ष्माणि सुखानि चैव
सांख्ये यथावद्विहितानि राजन् ॥ १०५

विपर्यये तस्य हि पार्थ देवा-
न्गच्छन्ति सांख्याः सततं सुखेन ।
तांश्चानुसंचार्य ततः कृतार्थाः
पतन्ति विप्रेषु यतेषु भूयः ॥ १०६

हित्वा च देहं प्रविशन्ति मोक्षं
दिवौकसो द्यामिव पार्थ सांख्याः ।
ततोऽधिकं तेऽभिरता महार्हे
सांख्ये द्विजाः पार्थिव शिष्टजुष्टे ॥ १०७

तेषां न तिर्यग्गमनं हि दृष्टं
नावाग्गतिः पापकृतां निवासः ।
न चाबुधानामपि ते द्विजातयो
ये ज्ञानमेतन्नृपतेऽनुरक्ताः ॥ १०८

सांख्यं विशालं परमं पुराणं
महार्णवं विमलमुदारकान्तम् ।

C. 12. 11211
B. 12. 302(1). 114
K. 12. 307. 114

K7 D4.9 मतं; D5 महान् (for महन्). K2.4 महात्मना (K4 °नां); B8 (marg. as in text) महार्थं (for °त्मन्).

105 a) Bo.9 समश्च; T1 G1.6 शमं (for शमश्च). D6 lacuna; D7 स (for च). B8 (marg. as in text) जुष्टः (for दृष्टः). — b) M1.5-7 ज्ञानस्य (for ज्ञानं च). K1 T G1.6 सांख्यं; K2 सांख्यश्च; K6 V1 B8.9 सौख्यं; K7 D4.9 शूक्ष्मं; Bo.6.7 G3 M1.5-7 सौक्ष्म्यं; Da3.a4 सौक्ष्मं; Ds1 सूक्ष्मे; G3 संख्यं (for सूक्ष्मं). — c) G1 तमांसि (for तपांसि). K6 सूक्ष्मानि; K7 D4.9 शूक्ष्माणि; M7 सौक्ष्म्याणि (for सूक्ष्माणि). D5 चैवं (for चैव).

106 a) T1 G6 यस्य (for तस्य). Da4 हितार्थ- (for हि पार्थ). K1 देवा (for देवान्). ❁ Cn: विपर्यये, किंचित्साधनवैकल्यात् ज्ञानानुत्पत्तौ ॥ Cp: विपर्यये, विघ्नेनाभिभवे ॥ Cv: विपर्यये, मोक्षविपरीते प्रवृत्तिकर्मणि सति । ❁ — b) G1 तस्याः (for सांख्याः). D8 reads from सततं up to सांख्याः (in 107b) on marg. — 106cd is damaged in B6. — c) K6 -संवार्य; Da4 -सांचार्य; Ds1 -संधार्य; G2 -संचर्य (for -संचार्य). — d) K2 Da3.a4 गतेषु; K7 D4.9 च तेषु; Ds1 यतेत (for यतेषु). K6 जितेषु विप्रेषु पतंति भूयः.

107 D8 reads 107ab on marg. — a) K1 om. च. K1 प्रविश्यंति; K2 D4 °शति. Dn1.n4 D8 D2.3.8 देवं; D5.7 दैवीं (for मोक्षं). — b) K1 दिवौकसो; D4 °कसौ (for °कसो). K4 संख्या; Da4 संख्याः; D7 सारैः (for सांख्याः). — c) K6 V1 Bo.6.7.8 (marg.).9 Da3 Dn1.n4 D8 D2.3.5.7.8 T G3.6 अतो (for ततो). K7 D4.5.7.9 M1.5-7 ये (for ते). K6 रमता (sic); Da4 निरता; G2 हि रता (for ऽभिरता). K1.2 महर्षे; K6 B6.7.9 Da3.a4 महात्मन्; K7 D4.5.7.9 °र्हः; T G2.3.6 M1.5-7 °र्षे (for °र्हे). — d) Da3.a4 सांख्या; M7 सांख्य- (for सांख्ये). K1 द्विजः; Da4 द्विजा; M1.5-7 स्थिताः (for द्विजाः). K6 शिष्टपुष्टे (for °जुष्टे).

108 a) K1 च; D8 M1.5.6 हि (for न). K7 मननं; D7 दमनं; T1 जननं; G6 जजनं (for गमनं). K6 lacuna; D5.7 न (for हि). — b) K1 नावं; K3 D8 D9 G3 न वाग्-; K4 B6.9 Da3 Dn1.n4 D2.3.5.7.8 T2 नार्वाग्-; G2 नापां (for नावाग्-). K2 -कृतं निवासः; K4 G1 -कृता नि°; Bo Da3.a4 Dn1.n4 D8 D2.3.8 -कृताधिवासः; D5.7 -कृतां निवासं (for -कृतां निवासः). — c) K4.6 B9 Da3.a4 Dn1.n4 D8 D2.3.5.7.8 वाप्रधाना; V1 Bo.6-8 T1 चाप्रधाना (T1 °नाम्); D4 G3 चाबुधानाम्; G2 वायुधाराम्; G3 चाबुधानो (for चाबुधानाम्). K1 अहितो; K2 T G2.6 अहिते (G3 °ता); G1 अहते (for अपि ते). K2 द्विजातये; G2 न सिद्धा. — 108d–109a is damaged in B6. — d) K1.2 D4 यज् (for ये). Ds2 पूर्वं; D5.7 एवं; T2 एव (for एतन्). K1 [ऽ]नुरक्तः; B7 न रक्ताः; T1 G6 तु जाताः; T2 [ऽ]नुजाताः (for °रक्ताः).

109 109ab is damaged in B6. — a) V1 Bo.7.9 G1 सांख्या (for सांख्यं). — b) K1.2.4 B7.9 D4.9 T G1-3.6 M7 विपुलम्; D5.7 विष्णुम् (for विमलम्). T G1.3.6 M1.5-7 उदाहरंति (for उदारकान्तम्). — c) K6 नृपतेर् (for °ते). K2 महात्मना; D5.7 °त्मन् (for °त्मा). — d) K1 नारायणं. Dn1 T G3.6 M1.5-7

C. 12. 11231
B. 12. 302(1). 114
K. 12. 307. 114

कृत्स्नं च सांख्यं नृपते महात्मा
नारायणो धारयतेऽप्रमेयम् ॥ १०९
एतन्मयोक्तं नरदेव तत्त्वं
नारायणो विश्वमिदं पुराणम् ।
स सर्गकाले च करोति सर्गं
संहारकाले च तदत्ति भूयः ॥ ११०

इति श्रीमहाभारते शान्तिपर्वणि नवत्यधिकद्विशततमोऽध्यायः ॥ २९० ॥

२९१

युधिष्ठिर उवाच ।
किं तदक्षरमित्युक्तं यस्मान्नावर्तते पुनः ।
किं च तत्क्षरमित्युक्तं यस्मादावर्तते पुनः ॥ १
अक्षरक्षरयोर्व्यक्तिमिच्छाम्यरिनिषूदन ।
उपलब्धुं महाबाहो तत्त्वेन कुरुनन्दन ॥ २
त्वं हि ज्ञाननिधिर्विप्रैरुच्यसे वेदपारगैः ।
ऋषिभिश्च महाभागैर्यतिभिश्च महात्मभिः ॥ ३
शेषमल्पं दिनानां ते दक्षिणायनभास्करे ।
आवृत्ते भगवत्यर्के गन्तासि परमां गतिम् ॥ ४
त्वयि प्रतिगते श्रेयः कुतः श्रोष्यामहे वयम् ।

[ऽ]प्रमेयः (for °मेयम्).

110 K1.2.4 om. 110[ab]. — [b]) K6 B6.8.9 नारायणाद्; Dn2 Ds1 G6 °यणे (for °यणो). M1.6-7 इमं (for इदं). — [c]) K7 D4.9 G1 सं-; Ds1 lacuna (for स). G2 सर्जकाले (for सर्ग°). — [d]) K2 संसार- (for संहार-). K1.2.4 तमेति; K7 D4.9 तमेव; B0 तदेव; G1 वदंति (for तदत्ति). — After 110, Dn1.n4 Ds D2.3.5.7.8 editions ins.:

751* संहृत्य सर्वं निजदेहसंस्थं
कृत्वाप्सु शेते जगदन्तरात्मा ।

Colophon. Ś1 D6 missing: K3.5 B1-5 Da1.a2 Dn2.n3 D1 G4.5 M2-4 absent. — *Sub-parvan:* K1.2.4.6.7 V1 B0.6-9 Da3.a4 Dn1.n4 Ds D2-5.7-9 T G1-3.6 M1.5-7 मोक्षधर्म. — *Adhy. name:* K1.4.6 सांख्यप्रशंसा (K1.4 add समाप्ता); K2 सांख्यप्रश्नः; K7 D4.5.9 सांख्याध्यायः; V1 D7 सांख्ययोगः; B0.6.9 Da3.a4 Dn1 Ds D2.3.8 सांख्यं; B8 सांख्यवर्णनं; T1 G6 सांख्यज्ञानं; G2 सांख्यरीतिकथनं; M5.6 सांख्यज्ञानविधिः. — *Adhy. no.* (figures, words or both): K6 26; B7 T1 G1.6 125; B8 128; Dn1 127; Dn4 Ds2 G3 M5 126; D8 122; T1 138; G2 141; M1.6.7 124. — *Śloka no.:* Da4 Dn4 113; Dn1 Ds 116.

291

☞ This adhy. is missing in Ś1 D6 (cf. v. l. 12. 274. 13; 283. 15).

1 Ds2 reads 1-2 on marg. — [a]) G1 किंचिद् (for किं तद्). — [b]) G1 तस्मान् (for य°). — K1.2.4 Da3 Dn1 Ds1 D4 G1.2 M6 om. (hapl.) 1[cd]. — [c]) K6 किंचित् (for किं च).

2 Ds2 reads 2 on marg. — [a]) K4 व्यक्ति; B0.6 व्यक्तं (for व्यक्तिम्). — [b]) K4.6 B0.6-9 Da3.a4 Dn1.n4 Ds D2.3.5.7.8 पृच्छामि (for इ°). B8 रिपु- (for अरि-). K1.2.4.7 B0.8.9 D2 M5-7 -निसूदन (for -निषू°). — [c]) K6 Da4 D5.7 उपलब्धं; G1 °लुब्धं (for °लब्धुं). B7 repeats from बाहो up to नन्दन (in 2[d]) after भागैः (in 3[c]). — [d]) K1.2.4 तत्त्वेन भरतर्षभ.

3 For the repetition in B7, cf. v. l. 2. — [a]) G2 स (for त्वं). — [b]) K7 D4.9 प्रोच्यसे; G2 उच्यते (for °से). M1.7 देव- (for वेद-). B7 -पारणैः (for °गैः).

4 [a]) V1 Ds2 अल्प- (for अल्पं). B0 T G6 दिनांते तु (B0 च) (for दिनानां ते). — [b]) K8 दक्षणायन- (for दक्षिणा°). Da4 -भास्करैः (for °रे). — G1 om.

कुरुवंशप्रदीपस्त्वं ज्ञानद्रव्येण दीप्यसे ॥ ५
तदेतच्छ्रोतुमिच्छामि त्वत्तः कुरुकुलोद्वह ।
न तृप्यामीह राजेन्द्र शृण्वन्नमृतमीदृशम् ॥ ६
भीष्म उवाच ।
अत्र ते वर्तयिष्येऽहमितिहासं पुरातनम् ।
वसिष्ठस्य च संवादं करालजनकस्य च ॥ ७
वसिष्ठं श्रेष्ठमासीनमृषीणां भास्करद्युतिम् ।
पप्रच्छ जनको राजा ज्ञानं नैःश्रेयसं परम् ॥ ८
परमध्यात्मकुशलमध्यात्मगतिनिश्चयम् ।
मैत्रावरुणिमासीनमभिवाद्य कृताञ्जलिः ॥ ९
स्वक्षरं प्रश्रितं वाक्यं मधुरं चाप्यनुल्बणम् ।
पप्रच्छर्षिवरं राजा करालजनकः पुरा ॥ १०
भगवञ्छ्रोतुमिच्छामि परं ब्रह्म सनातनम् ।
यस्मान्न पुनरावृत्तिमाप्नुवन्ति मनीषिणः ॥ ११
यच्च तत्क्षरमित्युक्तं यत्रेदं क्षरते जगत् ।
यच्चाक्षरमिति प्रोक्तं शिवं क्षेम्यमनामयम् ॥ १२

C. 12. 11225
B. 12. 302(2). 12
K. 12. 308. 12

4c–6b. — c) K2.4.6 Da3 Dn1. n4 Ds1 D2.3 M5 आवृते; K7 आगते; B9 आवर्ते (for आवृत्ते). K4 अर्थे (for अर्के).

5 G1 om. 5 (cf. v. l. 4). — b) D7 om. (? hapl.) from श्रोष्यामहे up to त्वत्तः (in 6b). K3 श्रेष्ठामहे (for श्रोष्या°). — c) K3 Da1 T2 -प्रदीप त्वं (for °पस्त्वं). — d) K6 V1 B0.6–9 Da3 a4 Dn1. n4 Ds2 D2.3.5.8 -दीपेन; Ds1 -शीषेन (sic) (for -द्रव्येण). K4 T2 दीप्यते; Ds1 दिप्यसे.

6 G1 om. 6ab (cf. v. l. 4). D7 om. up to त्वत्तः (cf. v. l. 5). — a) D5 अतस्त्वत् (for तदेतत्). M1. 5–7 ज्ञातुम् (for श्रोतुम्). — b) K1.2.4 -पितामह; B9 -कुलोद्भव (for °द्वह). — c) K3 न तृप्यसि हि राजेंद्र; K7 B8 (marg.) D4.5.7.9 न हि तृप्यामि रा°; B8 (orig.) न तृप्यामि महाराज. — d) G6 पिबन् (for शृण्वन्). G3 ईश्वरं (for ईदृशम्). K6 शृण्वतोमृतमीदृशं. — After 6, K2.4 ins an addl. colophon [*sub-parvan* : K2 मोक्षधर्मं].

7 a) T G1.3.6 एतत् (for अत्र). K1 वर्णयिष्येहम्; K2.6 V1 B0.6.7.9 Da3. a4 Dn1. n4 Ds D2.3.8 G2 वर्त(K2 °र्ण)यिष्यामि (for °यिष्येऽहम्). — c) K6.7 B9 वशिष्ठस्य. — d) K3 कलाल-; D7 T G1–3.6 M1. 5–7 कराळ- (for कराल-). D9 ह (for च). ❀ Ca. n. p : करालनामा जनकः, करालजनकः । ❀

8 a) K6.7 B6.8.9 वशिष्ठं. — G2 om. (hapl.) 8b–9c. — b) K1.2.4.7 B8 (marg.) D4.9 मुनीनां (for ऋषीणां). Da3. a4 -द्युतिः (for -द्युतिम्). — c) K7 पपृच्छ. K7 D4.8 राजन् (for राजा). — G1 om. (hapl.) 8d–10c. — d) K4 ज्ञाने; D4 lacuna (for ज्ञानं). K2.7 Da4 Ds1 D4.9 T2 M7 नैश्रेयसं. K7 पदं (for परम्).

9 G1 om. 9; G2 om. 9abc (for both, cf. v. l. 8). — a) K1 आध्यात्म-; K2 आध्यात्म- (for अ°). — b) K1.2.4 -निश्रितं; D5.7 -चिंतकं; G6 (before corr.) -निश्चलं (for -निश्चयम्). — c) K1.7 Da4 D4.9 T2 मैत्रावरुण(Da4 °णी)म् (for °वरुणिम्). ❀ Cn : मैत्रावरुणि, मित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसं दृष्ट्वा वासतीवरे कुम्भे रेतोऽपतत्ततोऽगस्त्यवसिष्ठावजायेतामिति बह्वृचानामनुक्रमणिकायां तस्य मैत्रावरुणित्वमुक्तम् । ❀ — d) D5.7 कृतांजलि.

10 G1 om. 10abc (cf. v. l. 8). — a) K7 V1 B0.7.8 D4.5.7.9 प्रसृतं; Da4 प्रतिमं; D8 प्रथितं (for प्रश्रितं). K6 B9 Da4 G2 चैव (for वाक्यं). M1. 5–7 स्वक्षरं प्रश्रितवचो (M7 °चो). — b) Da4 D4 वा (for च). K1 D4.9 अनु(K1 °न)ल्बगं; B7 अनुंदगं; T1 G3.6 अनुद्धणं (for °ल्बणम्). ❀ Cn : अनुल्बणं, कुतर्कहीनम् । ❀ — c) K2.7 प्रपृच्छ (for पप्रच्छ). G2 पप्रच्छ ऋषिपं राजा. — d) T2 G1.2 M1. 5–7 कराळ- (for कराल-).

11 Before 11, B0 ins. भीष्म उवाच; B6.7 T G3.6 जनक उवाच; B8 करालजनक उवाच. — a) M1. 5.6 ज्ञातुम् (for श्रोतुम्). — d) K7 D4.5.7.9 प्राप्नुवंति (for आप्नु°). — After 11, K1 ins. an addl. colophon [*Sub-parvan* : मोक्षधर्म].

12 V1 reads 12a on marg. — a) K1.2.4 यश्च (for यच्च). — b) K1.2.4 तत्रेदं; B0 यच्चेदं; T1 G6 यथैतत्; T2 G3 यथे(G3 °थै)दं; G1 यथैतं (for यत्रेदं). K2.4 जरते (for क्ष°). D4 om. (hapl.) from ते जगत् up to क्षर (in 13b). — c) K1.2.4 यश्च; Da4 यत्र (for यच्च). — d) Da4 T G1.3.6 क्षेमम् (for क्षेम्यम्).

13 D4 om. up to क्षर (cf. v. l. 12). K6.7 V1

C. 12. 1'223
B. 12. 1C3[2].13
K. 12. 308. 13

वसिष्ठ उवाच ।

श्रूयतां पृथिवीपाल क्षरतीदं यथा जगत् ।
यत्र क्षरति पूर्वेण यावत्कालेन चाप्यथ ॥ १३
युगं द्वादशसाहस्रं कल्पं विद्धि चतुर्गुणम् ।
दशकल्पशतावृत्तं तदहर्ब्राह्ममुच्यते ।
रात्रिश्चैतावती राजन्यस्यान्ते प्रतिबुध्यते ॥ १४
सृजत्यनन्तकर्माणं महान्तं भूतमग्रजम् ।
मूर्तिमन्तममूर्तात्मा विश्वं शंभुः स्वयंभुवः ।
अणिमा लघिमा प्राप्तिरीशानं ज्योतिरव्ययम् ॥ १५
सर्वतःपाणिपादान्तं सर्वतोक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १६
हिरण्यगर्भो भगवानेष बुद्धिरिति स्मृतः ।
महानिति च योगेषु विरिञ्चि इति चाप्युत ॥ १७
सांख्ये च पठ्यते शास्त्रे नामभिर्बहुधात्मकः ।
विचित्ररूपो विश्वात्मा एकाक्षर इति स्मृतः ॥ १८
वृतं नैकात्मकं येन कृत्स्नं त्रैलोक्यमात्मना ।

B6. 7. 9 वशिष्ठ (for वसिष्ठ). — b) K1 क्षरते यं; K7 Da3. a4 क्षरं ही(K7 क्षरंती)दं (for क्षरतीदं). — c) K1. 2 V1 B6. 7 Da4 G2 यत्तत्; D5. 7 एतत् (for यत्र). ❀ Cs: पूर्वेण, अतीतेन कालेन। ❀ — d) K1. 2. 4 भारत; K6 Bo Da3 Dn1. n4 Ds1 D2–4. 8 G2 वाप्यथ; Da4 चाप्यर्थं; G1 च व्यथः (for चाप्यथ). ❀ Cn: यावत्कालेन, कृत्स्नेनापि कालेन ॥ Cs: यावत्कालेन, भविष्यत्कालेन च । ❀

14 a) G1–3. 6 युग- (for युगं). Da4 -साहस्रे (for °स्रं). — b) K1 V1 Bo. 8 Da3 Dn1. n4 Ds D2. 3. 8 G1 M5 (*inf. lin.*) Cv चतुर्युगं (for °र्गुणम्). — c) M1. 7 दशाकल्प- (for दश°). K1 -शतावृतं; K2. 4. 7 V1 D4. 9 °वर्तं (for °वृत्तं). — d) K1. 4. 7 B8 (orig.) तदहन्; K6 V1 Bo. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 Ds D2. 3. 8 अहस्तद् (by transp.); G2 तदहो. K7 ब्राह्मयम् (for ब्राह्मम्). — G3 om. (hapl.) 14ef. — e) Bo रात्रीश्च. K7 D4. 5. 7. 9 T G1. 6 M1. 5–7 तावता (for एतावती). — f) Ds Cs तस्यांते (for यस्यान्ते).

15 a) K1. 2. 7 D4. 9 G2 सृजत्यनंत- (for सृजत्य°). B8 (marg. as in text) -कर्माणि (for °णं). ❀ Cs: अनन्तकर्माणम्, असंख्येयानां सृज्यानां कर्तारम् । ❀ — b) K1 अग्रणं; K2. 4. 6 अव्ययं (for अग्रजम्). — K2. 4 om. (hapl.) 15cdef. — c) B9 तस्य मूर्तिम्; Da4 D4 मूर्तिमतम्. K1 Ds1 T2 G1. 3 M1 5–7 अमूर्त्यात्मा; B8 (marg.) °र्तायो (for °र्तात्मा). — d) K1 विश-; K6 V1 B6 D4. 9 G2 विश्वः; D5. 7 विष्णुः; Cs. v विश्वं (as in text). B9 Ds T G3. 6 Cs शंभुं; Cv शंभुः (as in text). K6 Ds D4. 9 T G3. 6 Cs. v स्वयंभुवं (for °भुवः). G1 विश्वेशं विश्वशंभवं. ❀ Cs: स्वयंभुवं, अव्यक्तास्स्वयमेवान्यवधानेन जातम् ॥ Cv (reading विश्वं शंभुः स्वयंभुवं): शंभुः नारायणः ॥ ❀ — B8 reads 15ef twice. — e) K1. 7 B8 (second time) अनिमा; D4. 9 अणिमां (for °मा). D9 लघिमां; T2 महिमा (for लघिमा). K7 D4. 9 G2 प्राप्तिम् (for प्राप्तिर्). ❀ Cn: अणिमाद्या यत्र स्वयंभुवः, नित्यं स्वतःसिद्धाः, न तु हिरण्यगर्भादिष्विव तपसा आविर्भूताः । ❀ — f) K1 ईषाणं; K7 D4. 9 G6 Cp (Cpp as in text) ईशानो; D7 °न-; M1 °ना; M7 °नां (for °नं). M7 ज्योतिम्. K7 D4. 9 अव्ययः.

16 = (var.) 6. 35. 13: 12. 231. 29; B. 12. 285 [4]. 75c–76a; 12. 300. 14: B. 13. 14. 418c–419b: B. 14. 19. 49; 40. 4; Śvetāśvatara Up 3. 16. — a) K2 -पादांते; K6 D7 -पादं तं; K7 D4. 9 -पादांतः; B8 Dn1. n4 T G1–3. 6 M1. 5–7 -पादं तत् (for -पादान्तं). — b) K7 D4. 9 -मुखः (for -मुखम्). — c) K7 D4. 9 -श्रुतिमाल्ँ (for °मल्ल). K1 लोकः; K6 M1. 6 लोकं (for लोके). — d) K1 विष्टितं; Da4 वृष्ठति (for तिष्ठति). K2 सर्वमावृत्य धिष्टितं; M7 सर्वामाहृत्य तिष्ठति.

17 b) G1 एक- (for एष). K6 श्रुतिः; B9 स्मृतिः (for स्मृतः). — G1 om. 17cd. — c) G2 महाग्नि*चा योगेषु. — d) K4. 7 Bo. 6 (marg.). 7–9 Dn1. n4 Ds D2. 3. 8 विरिंचिर्; V1 विरंचिर्; D5. 7 विरंचम् (for विरिञ्च). K7 Bo. 8 (marg.) Dn1. n4 Ds D2. 3. 8 चाप्यजः; V1 चाव्ययः; D5. 5. 7. 9 T G3. 6 M1. 5–7 चाप्यथ (for चाप्युत).

18 a) G1 सांख्यैश्च (for सांख्ये). Ds1 पच्यते (for पठ्यते). T2 शास्त्रं (for शास्त्रे). — b) M1. 5–7 बहुलात्मकः (for °धात्मकः). — c) K2 -रूपे (for -रूपो). — d) D8 एकोक्षर; D7 एकाक्षरस्. ❀ Cs: एकाक्षरः, अभिन्नाक्षरः आत्मसमान इत्यर्थः । ❀

19 K1 Da4 D8 om. (hapl.) 19. — a) K6. 7 B6–8 Da3 D4. 9 Cp धृतम्; Ds2 वृत्तं; G2 M1. 5. 7 कृतं (for वृतं). K7 D4. 9 एकात्मकं; G2 एवा° (for

तथैव बहुरूपत्वाद्विश्वरूप इति स्मृतः ॥ १९
एष वै विक्रियापन्नः सृजत्यात्मानमात्मना ।
अहंकारं महातेजाः प्रजापतिमहंकृतम् ॥ २०
अव्यक्ताद्व्यक्तमुत्पन्नं विद्यासर्गं वदन्ति तम् ।
महान्तं चाप्यहंकारमविद्यासर्गमेव च ॥ २१
अविधिश्च विधिश्चैव समुत्पन्नौ तथैकतः ।
विद्याविद्येति विख्याते श्रुतिशास्त्रार्थचिन्तकैः ॥ २२
भूतसर्गमहंकारात्तृतीयं विद्धि पार्थिव ।
अहंकारेषु भूतेषु चतुर्थं विद्धि वैकृतम् ॥ २३
वायुर्ज्योतिरथाकाशमापोऽथ पृथिवी तथा ।
शब्दः स्पर्शश्च रूपं च रसो गन्धस्तथैव च ॥ २४
एवं युगपदुत्पन्नं दशवर्गमसंशयम् ।
पञ्चमं विद्धि राजेन्द्र भौतिकं सर्गमर्थवत् ॥ २५
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणमेव च पञ्चमम् ।
वाक्च हस्तौ च पादौ च पायुर्मेढ्रं तथैव च ॥ २६
बुद्धीन्द्रियाणि चैतानि तथा कर्मेन्द्रियाणि च ।

C.12. 11241
B.12. 303(2). 26
K.12. 308. 28

नैका°). — 19^{bc} is partly damaged in B6. — b) K2.4 B8 Dn1.n4 D8 D2.3 T G3.6 कृतं; G1 कृतस्; G2 M5.6 वृतं; M1.7 हृतं (for कृत्स्नं). G1.3 आत्मनः. — V1 reads 19^{c}–20^{b} on marg. — d) D7 विश्वरूपम्. K2.4 V1 च स (for इति). B0.9 Dn4 D8 D2.3 M5–7 श्रुतः; T2 स्मृतं; G2 (also as in text) M1 श्रुतिः (for स्मृतः).

20 V1 reads 20^{ab} on marg. — a) D5.7 विक्रियापन्नं (for °पन्नः). — b) K1.2 सृजता(K2 °त्वा)त्मानम्. — c) K7 D4.9 प्रजापतिर् (for अहंकारं). K6.7 Ds1 महातेजा. — d) T1 G1.3.6 प्रजापतिर् (for °पतिम्). K1 अहंगतं (for °कृतम्). K4 प्रजापतिमहाक्रतो. ❀ Cs: अहंकृतम्, यः प्राणिनां हृदये स्थित्वा अहमित्यभिमत्य संसारे पुरुषं प्रवर्तयति तमहंकारम् । ❀

21 K2.4 om. (hapl.) 21^{ab}. — a) K7 D4.9 अव्यक्तं (for °क्ताद्). K6 B0.6–9 Da3.a4 Dn1.n4 D8 D2.3.8 आपन्नं (for उत्पन्नं). — b) K7 D4.9 विद्यासर्गौ; B7 Dn4 D8.5.7 °संगं (for °सर्गं). D5 lacuna; G1 मे (for तम्). — c) T G1 M1.5.7 महतश्; G2 महतं; Cn (gloss: समष्टिं, चात् व्यष्ट्यहंकारं) महान्तं (as in text). K1.2.4 अपि; D9 वापि (for चापि). — d) K6 -स्वर्गम्; B7 Dn4 D8 -संगम्; D5.7 G1 -सर्गौ; G2 -सर्वं (for -सर्गम्). G2 lacuna for मेव च.

22 a) K1.2.4 B6 Da3.a4 Ca अचिरि(Da4 °र)श्च चिरि(Da4 °र)श्चैव; Dn1 अविधिं च विधिं चैव; T G1.3.6 Cv अप(T2 °क्ष)रश्च प(T2 क्ष)रश्चैव; G2 M1.5–7 अविदि(G2 °रि)श्च विदि(G2 °रि)श्चैव. ❀ Ca: अचिरिरचिरस्थायीति छान्दसम् । चिरिश्चिरस्थायीति ॥ Cn (reading as in text): तत्तदुपास्तिविधानमविद्या, सिद्धवस्तुकथनं विद्या ॥ Cv: परः महत्तत्त्वाभिमानी ब्रह्मा, अपरः अहंकारतत्त्वाभिमानी रुद्रः, एकस्मान्नारायणात् ॥ ❀ — b) K2 समुत्पन्नस्; K7 D9 °त्पन्ना (for °त्पन्नौ). D4 T G1–3.6 M1.5–7 अथ (for तथा). ❀ Cs: एकतः, ज्ञानस्वरूपत्वात् । ❀ — c) K6 चाख्यातौ; B6.9 Da4 चाख्याते; Dn1 विख्यातं (for °ते). — d) K1.2 D4.9 T2 G1 M1.5–7 श्रुतिश्; K4 श्रुतश्; T1 G3.6 श्रुती-; G2 श्रुत्या (for श्रुति-). K1.2.4 D4.9 T G1.3.6 M1.5–7 चाध्यात्म-; G2 चैवात्म- (for -शास्त्रार्थ-).

23 a) K1.2.6.7 V1 D4.9 G3 अहंकारं; Cpp अहंकारात् (as in text). — c) T G1.3.6 अहंकारं च; M5 (*inf. lin.* as in text) °काराच्च (for °कारेषु). K4.7 B0.7.8 Dn1.n4 D8 D2.3.8 M5 (*inf. lin.*) Cn (gloss: सात्त्विकराजसतामसेषु) Cs Cv (gloss: वैहारिकतैजसतामसाहंकारेषु) सर्वेषु (for भूतेषु). M1.6.7 अहंकारात्मभूतेषु. — d) ❀ Cv: वैकारिकतैजसाभ्यां यत्कृतं तच्चतुर्थं विद्धि । ❀

24 a) K7 B9 वायु- (for वायुर्). K2 V1 तथा (for अथ). — b) K1 आपश्च; B6.7.9 पयोथ; Da4 यथोथ; G1 अपोत (for आपोऽथ). — c) K1.6.7 B7 Da4 Ds1 T2 G1 M5 शब्द- (for शब्दः). K1 स्पशाश्; K7 B7 D5.7 T1 G1 स्पर्शं (for स्पर्शश्). Da4 M1.7 रूपश् (for रूपं).

25 a) T2 G1.3.6 M1.5–7 एतद् (for एवं). G2 उत्पन्न- (for °न्नं). T1 एतद्युगसमुत्पन्नं. — b) M1.7 दर्श- (for दश-). — c) T1 पंचविंशति राजेंद्र. — d) B7 संगम्; G1 सर्वम् (for सर्गम्). K2 अर्थवित् (for °वत्).

26 K7 om. 26^{ab}. — a) D4 G1 श्रोत्र- (for श्रोत्रं). D7 च (for त्वक्). — b) D5 प्राणम् (fo घ्राणम्). K1.2.4 G2 M1.5–7 घ्राण एव च पंचमः. — c) D8 बाहू (for वाक्च). — d) K4 पायान्; Ds2 G1 पायु- (for पायुर्). K7 D4 मेढ्रस्; D9 मेढ्रास् (for मेढ्रं).

27 a) K7 D4.9 सर्वाणि (for चैतानि). — c) Ds1

C. 12. 11241
B. 12. 302(?). 28
K. 12. 308. 28

संभूतानीह युगपन्मनसा सह पार्थिव ॥ २७
एषा तत्त्वचतुर्विंशा सर्वाकृतिषु वर्तते ।
यां ज्ञात्वा नाभिशोचन्ति ब्राह्मणास्तत्त्वदर्शिनः ॥ २८
एतद्देहं समाख्यातं त्रैलोक्ये सर्वदेहिषु ।
वेदितव्यं नरश्रेष्ठ सदेवनरदानवे ॥ २९
सयक्षभूतगन्धर्वे सकिंनरमहोरगे ।
सचारणपिशाचे वै सदेवर्षिनिशाचरे ॥ ३०
सदंशकीटमशके सपूतिकृमिमूषके ।
शुनि श्वपाके वैणेये सचण्डाले सपुल्कसे ॥ ३१
हस्त्यश्वखरशार्दूले सवृक्षे गवि चैव ह ।
यच्च मूर्तिमयं किंचित्सर्वत्रैतन्निदर्शनम् ॥ ३२
जले भुवि तथाकाशे नान्यत्रेति विनिश्चयः ।
स्थानं देहवतामस्ति इत्येवमनुशुश्रुम ॥ ३३
कृत्स्नमेतावतस्तात क्षरते व्यक्तसंज्ञकम् ।
अहन्यहनि भूतात्मा ततः क्षर इति स्मृतः ॥ ३४
एतदक्षरमित्युक्तं क्षरतीदं यथा जगत् ।

ह (for [इ]ह).

28 a) M1.6.7 स्वेव (for तत्त्व-). B8 (marg.) Da3.a4 T2 G1.3.6 -चतुर्विंशत्; B8 Cnp °विंशी; Cn.p °विंशा (as in text). K1.2.4 एष तंतु(K1 तत्त्व)श्चतुर्विंशत्; K7 D4.5.7.9 चतुर्विंशतिरेवैषा (D5 °ति चैतेषां; D7 °ति वैतेषां). — b) K1.2 विद्यते; K4 बुध्यते (for वर्तते). — c) K1.2.4 Da4 यं; M5 तां (for यां). D4 गत्वा (for ज्ञात्वा). G2 M1.5-7 नानु- (for नाभि-). — d) G1 ब्राह्मणाः सत्त्वदर्शनाः.

29 a) K7 D4.9 G2 M1.5-7 देहे; B8 (marg. as in text) देवं; Cn (gloss: क्लीबत्वमार्षं) देहं (as in text). Da3 D8 समाख्यानं (for °ख्यातं). — b) K1.2 त्रैलोक्य-; Ds1 °के (for °क्ये). K1.2 -देहिनां; D5 lacuna (for -देहिषु). — d) K1 सुदेव-; K6 सदेवे; Ds2 T2 G3 सदैव (for सदेव-). K4.7 V1 Dn4 D5.7 T1 G1-3.6 M1.6.7 -दानवैः (for °वे).

30 a) K7 Da3.a4 -गंधर्व-; D5.7 T1 G1.2.6 M7 -गंधर्वैः (for °र्वे). — b) D5.7 T1 G1.2.6 -महोरगैः (for °रगे). — c) K7 सकिंनर- (for सचारण-). Da4 T2 पिशाचे च; D5.7 °चैर्वा; T1 G1.3.6 °चैश्च; M1.5-7 -पिशाचौघे (for °चे वै). — d) D5.7 T1 G1.6 -निशाचरैः (for °चरे).

31 a) K2.4 -मषके; Da4 -मटके (sic); D5.7 T1 G1.6 -मशकैः (for -मशके). — b) K1 सुपूर्ति; D5.7 समूमि-; T1 G1.3 सलूति-; G6 सलूता-; M5 सवृत्ति-; M7 सपुत्ति- (for सपूति-). K1.2.4 B7 -क्रिमि-; Da4 G1 -क्रम- (for -कृमि-). V1 Bo.6-9 Da3.a4 Dn1.n4 D2-4.8 -मूषिके; D5.7 T1 G6 -मूषिकैः; G1 -मूलिकैः (for -मूषके). — c) K1.2 श्वनि; K7 शुने; T2 G1.3 सह (for शुनि). K1.2.4 वैनेये; K6 Bo.6-8 Da3 Dn1.n4 D2.3 7.8 चैणेये; K7 D4.9 वैदेहे; Ds1 णेवैये; T2 G1.3 सशुनि; G2 वैणे च; M1.5-7 वैणे च (for वैणेये). T1 G6 सह श्वपाकैः सशुनैः. — d) K1 om. स. K6 Bo.6-9 Da3 a4 Dn4 D8 D2-5.7.9 G1 सचांडाले (D8 °ल-). K1 सहक्कसे; K2.4 सपल्कसे; K6.7 Ds1 सपुकसे; V1 Bo.6.7.9 स(V1 च)पुक्कशे; Da3.a4 पुल्कशे; D4.5.7-9 सपुष्कसे (for °ल्कसे). T1 G6 सचंडालैः सपुल्कसैः.

32 b) Kumbh. ed. सवृके (for सवृक्षे). K1 G2 हि (for ह). — For 32ab, T G1.3.6 subst.:

752* सहस्त्यश्वैः सशार्दूले सऋक्षगवि चैव हि ।

[T1 G3 सहस्त्यश्वैः सशार्दूलैः (for the prior half). G1 समक्षा (for सऋक्ष-). T1 G3 -गवयैश्च हि (for -गवि चैव हि).]

—c) K1.2 यश्च (for यच्च). T2 पूर्तिमयं (for मूर्ति°). — d) K7 सर्वत्रैव; D9 सर्वं वैतन्; T G6 सर्वमेतन् (for °त्रैतन्).

33 a) K1 जलौ (for जले). — b) T G1-3.6 M1.5-7 नान्यथेति (for °त्रेति). K1.2.4 V1 B9 नान्यत्रं(K4 °त्रें)द्रियनिश्चयः (K4 °य). — c) G1 दानं (for स्थानं). K4.6 Bo.6.7.8 (marg.).9 Da3.a4 Dn1.n4 D8 D2.3.8 T1 G6 आसीद् (for अस्ति). — d) Ds1 अनुशुश्रुमः. K1.2.7 D4.5.7.9 T2 G1-3 M1.5-7 [इ]त्येवं समनुशुश्रुमः (K1.2 M5 °म).

34 a) K2 एतावता; B7 °वतं (for °वतस्). D5.7 कृत्स्नमेतदयं सूते. — b) K6 क्षरंति; K7 B6-9 Da3.a4 D5.7.9 क्षरति; G1 रक्षसे (for क्षरते). K7 D4.5.7.9 [अ]व्यक्त- (for व्यक्त-). K1 T2 G2 -संज्ञिकं; Bo.8 (marg.) Da4 Dn1.n4 D8 D2.3.8 -संज्ञितं (for -संज्ञकम्). — c) Da3 महांश्चैवाग्रजो नित्यं. — d) Da4 स्मृताः; D4.9 स्मृतिः. ❀ Ca: देहस्य क्षरणादात्मन्यौपाधिकोऽयं क्षरशब्दः, अत एव भूतात्मेत्युक्तम् । भूतोपहित आत्मा भूतात्मा । ❀

जगन्मोहात्मकं प्राहुरव्यक्तं व्यक्तसंज्ञकम् ॥ ३५
महांश्चैवाग्रजो नित्यमेतत्क्षरनिदर्शनम् ।
कथितं ते महाराज यस्मान्नावर्तते पुनः ॥ ३६
पञ्चविंशतिमो विष्णुर्निस्तत्त्वस्तत्त्वसंज्ञकः ।
तत्त्वसंश्रयणादेतत्तत्त्वमाहुर्मनीषिणः ॥ ३७
यदमूर्त्यसृजद्व्यक्तं तत्तन्मूर्त्यधितिष्ठति ।
चतुर्विंशतिमो व्यक्तो ह्यमूर्तः पञ्चविंशकः ॥ ३८
स एव हृदि सर्वासु मूर्तिष्वातिष्ठतेऽऽत्मवान् ।
चेतयंश्चेतनो नित्यः सर्वमूर्तिरमूर्तिमान् ॥ ३९
सर्गप्रलयधर्मिण्या असर्गप्रलयात्मकः ।

C. 12. 11254
B. 12. 305(?).41
K. 12. 308. 41

---

35 ^a) K7 D4.9 T2 G1.3.6 क्षरम्; D5.7 च क्षरम्; T1 क्षणम् (for अक्षरम्). — ^b) B6.9 Da3.a4 क्षरं चेदं; D8 क्षरतीति; G1 °तीतं (for °तीदं). K6 B9 Da3 तथा (for यथा). — ^c) K2 मोहात्मके (for °त्मकं). — ^d) K2.4 अव्यक्त-; B0.6.8 (marg.) Dn1.n4 D8 D2.3.8 M1.5–7 °क्ताद् (for °क्तं). K1.4 B8 (marg.) D8 -संज्ञितं; T2 G2 -संज्ञिकं (for -संज्ञकम्). V1 अव्यक्तं व्यक्तमेव च.

36 ^a) D5.7 महीं; M1.7 मोहांश् (for महांश्). K2 चैवाग्रजे; B9 चैकाग्रजो; Da4 D5.7 T1 G1.3 चैवाग्रतो (for °ग्रजो). — ^b) K7 D4.9 T G2.3.6 क्षेत्र-; G1 क्षेम- (for क्षर-). — ^c) D7 च (for ते). — ^d) M6 सर्वान् (for यस्मान्). K1 यः सा न वर्तते पुनः; K7 B0.8 Dn1.n4 D8 D2–5.7–9 यन्मां त्वं परि(B8 त्वमनु)पृच्छसि (D9 °ति).

37 ^a) K4 T G1–3.6 -विंशतमो; K6 B6 Da3.a4 M7 (*inf. lin.*) -विंशतिको (for °तिमो). B5 विष्णो; Da4 विष्णुं; D5.7 जीवो (for विष्णुर्). ❀ Cn: पञ्चविंशतिमः, तकारलोप आर्षः । ❀ — ^b) K2.4 निस्तत्त्वास्; K7 D4.9 निर्द्वंद्वस्; B9 निस्तत्त्वं; D5.7 निःसत्त्वः; T1 G1.3.6 विततस्; Ca (gloss: गुणातीतत्वात्) निस्तत्त्वस् (as in text). D5.7 सत्त्व- (for तत्त्व-). K1.2.4 B0.8 Dn1.n4 D8 D2.3.8 -संज्ञितः; T2 -संज्ञिकः (for -संज्ञकः). ❀ C8: ननु पञ्चविंशो जीवः षड्विंशः परमात्मेति सर्वशास्त्रप्रसिद्धिः । अत उक्तं निस्तत्त्वः, तत्त्वेभ्यो निष्क्रान्तः, तत्त्वसंज्ञितः अंशेन चतुर्विंशतितत्त्वानुप्रसिद्धः । ❀ — ^c) K1.2.6.7 V1 B0.6.7.8 (also as in text).9 D5.7 M1 सत्त्व- (for तत्त्व-). K2 -संश्रवणाद् (for °यणाद्). K1 (also as in text).4.7 D4.5.7.9 एष; T G1.3.6 M1.5–7 एतं (for एतत्).

38 ^a) K1.2.4 Da3.a4 यदमूर्त्या; K6 यन्मूर्त्यं च; K7 B0 यन्मूर्त्यम्; B8 (marg. as in text) यन्मूर्तिर्; Dn1.n4 D8 D2.3.8 यन्मर्त्यम्; T G1.3.6 इदं मूर्तिं; G2 यद्यमूर्तम् (for यदमूर्ति). — ^b) K6 [अ]धितिष्ठितं; B7 अवतिष्ठति (for अधि°). K1.2 तत्त्वं मू(K2 °तन्मू)र्त्याधितिष्ठति; K7 D4.5.7.9 तन्मूर्तिं(K7 D4 तन्मूर्तं-; D7 स मूर्तिं)मधि°; Da4 तत्त्वमूर्त्याव°; G2 corrupt; M7 तर्कमूर्त्यधि°. — ^c) K1.2.4 तयोर्विंशतिमो; Da3.a4 पंचविं°; T G1.3.6 M1.5–7 पंचविंशतिको (T2 °गो); G2 °तमो (for °तिमो). — ^d) D5.7 T2 ह्यमूर्तिः; T1 G1.6 ह्यव्यक्तः (for ह्यमूर्तः). D7 पंचविंशतिः (for °विंशकः).

39 ^a) K7 D4.9 T1 G2.6 M1.5–7 एष (for एव). B0 सर्वं- (for हृदि). — ^b) C8 as in text. Dn4 वृत्तिं वा (for मूर्तिषु). K1.2 V1 महान्; K6 [ऽ]र्थवान्; Da3.a4 पुमान् (for ऽऽत्मवान्). D4.5.7.9 T G1.3.6 मूर्तिष्वात्मावतिष्ठते. — K2 om. (hapl.) 39^cd. — ^c) B0 चेतनश्; Da3.a4 चेतया(Da4 °यां)श्; Dn1.n4 Ds1 D2.5.7.8 केवलश्; Ds2 D8 चेतना (for चेतयंश्). G2 M7 चेतना; M5 °नं (for °नो). K6 B0.6.8 (marg.).9 Da3.a4 नित्यं (for नित्यः). K1.4.7 V1 B8 (orig.) D4.9 चेतयंश्चे(K7 °नं चे-; B8 °नश्चे)तनायुक्तः; T G1.3.6 चेतनोचेतनो नित्यं (T2 G3 °त्यः). — ^d) K6.7 D4.9 सर्वमूर्तिष्वमूर्तिमान्; D8 °मूर्तिषु मूर्तिमान्; T G1.6 सर्वज्ञत्वादमूर्तिं(T2 °बुद्धि)मान्; G3 सर्वमूर्तावमूर्तिमान्.

40 ^a) K4 G1 -प्रत्यय-; D5.7 -प्रणय- (for -प्रलय-). D4.9 Cp -धर्मिण्याम् (D4 °ण्यम्) (for °ण्या). K1 T G2.3.6 M1.5–7 सर्गप्रत्ययधर्मिण्याम्; K2 सर्गप्रतियधर्मोणम् (sic). — ^b) K4.6.7 V1 B6–9 Da3.a4 Dn1.n4 D8 D2.8 G2 स सर्ग-; B0 D3.5.7 संसर्ग-; M7 असर्गः (for °र्ग-). K1.2.4 B7.9 D5.7 T G1.3.6 M1.5–7 -प्रत्ययात्मकः (K1.2 °कं); K7 D4.9 -प्रलयात्मकं (for °त्मकः). — ^c) Da3 गोचरो (for °रे). Ds1 नित्य-; D5 नित्ये (for नित्यं). ❀ Cp: सर्गप्रत्ययात्मकः, सर्गस्य सृज्यमानपदार्थस्य, प्रत्ययो भासक एव सर्गप्रलयधर्मिण्यां मूर्तौ प्रविश्य गोचरे विषयवर्गे वर्तते, विषयाभिमुखो भवति । गोचरे, अहमित्यादिप्रत्यक्षादिगोचरे वा । ❀ — ^d) B0.8 Da3 Dn1 Ds1 D3.8 निर्गुणं; Dn4 Ds2 D2 G1 M7 निर्गुणे (for °णो). M7 गणि- (for गुण-). K2.4 -संज्ञिकः; K6 B0.7.9 Da3.a4 -संज्ञितः; Dn1.n4 D8 D2.3.8 -संज्ञि(Dn4 °ज्ञ)तं; T1 G3.6 -संज्ञके; T2 G1 -संज्ञिके (for -संज्ञकः).

C. 12. 11254
B. 12. 303(1) 41
K. 12. 308. 41

गोचरे वर्तते नित्यं निर्गुणो गुणसंज्ञकः ॥ ४०
एवमेष महानात्मा सर्गप्रलयकोविदः ।
विकुर्वाणः प्रकृतिमानभिमन्यत्यबुद्धिमान् ॥ ४१
तमःसत्त्वरजोयुक्तस्तासु तास्विह योनिषु ।
लीयतेऽप्रतिबुद्धत्वादबुद्धजनसेवनात् ॥ ४२
सहवासो निवासात्मा नान्योऽहमिति मन्यते ।
योऽहं सोऽहमिति ह्युक्त्वा गुणाननु निवर्तते ॥ ४३
तमसा तामसान्भावान्विविधान्प्रतिपद्यते ।
रजसा राजसांश्चैव सात्त्विकान्सत्त्वसंश्रयात् ॥ ४४
शुक्ललोहितकृष्णानि रूपाण्येतानि त्रीणि तु ।
सर्वाण्येतानि रूपाणि जानीहि प्राकृतानि वै ॥ ४५
तामसा निरयं यान्ति राजसा मानुषांस्तथा ।
सात्त्विका देवलोकाय गच्छन्ति सुखभागिनः ॥ ४६
निष्कैवल्येन पापेन तिर्यग्योनिमवाप्नुयात् ।
पुण्यपापेन मानुष्यं पुण्येनैकेन देवताः ॥ ४७
एवमव्यक्तविषयं क्षरमाहुर्मनीषिणः ।
पञ्चविंशतिमो योऽयं ज्ञानादेव प्रवर्तते ॥ ४८

इति श्रीमहाभारते शान्तिपर्वणि एकनवत्यधिकद्विशततमोऽध्यायः ॥ २९१ ॥

---

41 [a]) K7 B8 (marg. as in text) D4. 5. 7. 9 एष एव; Da3 a4 Ds1 G2 3 M1. 5–7 एवमेव (for °ष). — [b]) K1. 2 4 V1 T G1–3. 6 M1. 5–7 -प्रत्यय- (for -प्रलय-). K4 -कौविदः; B6. 9 D5. 7 G2 M1. 5–7 Cp -कोटिशः (for -कोविदः). — [c]) T1 G1 6 अक्षरक्षरमास्मानम्. — [d]) G1 -मजाति (for -मन्यति). K1. 2 बुद्धिमान् (for [अ]बु°). K7 V1 Da4 Dn4 D5. 7 अभिमन्यत (V1 Dn4 °न्य च; D5. 7 °न्य स) बुद्धिमान्; Ds1 °मत्य**मान्.

42 [a]) K2. 4 T G1 6 ततः; G3 अथ (for तमः-). K1 -रयोयुक्तस्. — [b]) G3 तासां (for तासु). — [c]) K6 Ca नीयते; G1 स्थी° (for ली°). Ds1 G1 -बुद्धित्वाद् (for -बुद्ध°). — [d]) K6 G2 अबुद्धि- (for °द्ध-). Da4 अबुद्धिद्धिजसेवनात् (sic).

43 [a]) T G1–3. 6 Cv सहवासान् (for °वासो). K6 सहवासविवासार्था; K7 D4. 9 °वासे वसन्नात्मा; V1 B6 (marg.) Da4 Ds °वासनिवास(Ds °सि)त्वान्; Bo. 6 (orig.). 7–9 Da3 Dn1. n4 D2. 3. 8 °वास(Dn1 °सं)विनाशि(Bo. 6. 7 °श)त्वान्. — [b]) K2 नान्ये (for नान्यो). K6 मन्यसे (for °ते). — [c]) K2 यं हं; K6 सोहं; T2 M1. 5. 7 योयं (for योऽहं). D4 योहम्; M1 योगम् (for सोऽहम्). K2. 4 D5. 7 त्यक्त्वा; K7 D4. 9 T G1. 3. 6 M1. 5–7 [इ]त्युक्त्वा; Da4 ह्युक्ता (for ह्युक्त्वा). — [d]) K6 V1 Bo. 6. 7. 8 (marg.). 9 Da3. a4 Dn1. n4 Ds D2. 3. 5. 7. 8 Cv एवानु- (D7 °ति-); K7 एव तु (for अनु नि-). B8 G2 विवर्तते (for नि°).

44 [a]) K1. 2. 4 तमसस् (for °सा). — [c]) K1. 2 Ds2 D4 रजसो (for °सा). Da4 राजसाश्च. — [d]) K1. 6. 7 M1. 5. 6 -संश्रयान् (for °यात्).

45 [a]) K6 -कल्पानि; Dn4 -कृष्णाभि- (for °नि). Cs शुक्रशोणितकृष्णानि. — [b]) K6 रूपानि (for °णि). K7 D4. 9 च; D5. 7 [उ]त; M1 षट् (for तु). — [c]) K6 B6. 9 Da3 T G1–3. 6 M1. 6. 7 अन्यानि (for एतानि). — [d]) K1. 2. 4 Bo. 3 Dn1. n3 Ds D2. 8 यानीह; T G1–3. 6 जातानि (for जानीहि). K1 प्रवृत्तानि; K2. 4 G3 M5 प्रकृ° (for प्राकृ°). K1. 2 4 तु (for वै).

46 [a]) Da3 तमसा; Da4 तपसा (for तामसा). V1 Bo. 6 D4 याति. — [b]) Da3 D5. 7 T1 रजसा (for रा°). K4. 6. 7 B8 T G1–3. 6 M7 मानुषास् (for °षांस्). V1 Bo. 6. 7 8 (marg.). 9 Da3. a4 Dn1. n4 Ds D2. 3. 8 अथ (for तथा). — [d]) K1 गच्छति. Ds1 -भागिणः (for °नः).

47 G3 om. (? hapl.) 47[a]–48[b]. — [a]) K2 निष्कैवल्ये तु; B7 °वलेन; G2 निष्केवल्येन. ❀ Cv: निष्कैवल्येन, नितरां केवलभावो यस्य । केवलपापेनेत्यर्थः ॥ ❀ — [d]) K1 M7 पुण्यैनैकेन; K4 पुण्येनैकं न. K1. 2. 4. 7 T2 देवतां; K6 देवता; T1 G1. 2. 6 दैवतं (for देवताः).

48 G3 om. 48[ab] (cf. v. l. 47). — [a]) K4 T2 -विंशतितमो; M1. 7 °तिको; Cv °तिगो (for °तिमो) K1. 2. 4 योसौ; G1 यूयं (for योऽयं).

२९२

वसिष्ठ उवाच ।
एवमप्रतिबुद्धत्वादबुद्धमनुवर्तते ।
देहादेहसहस्राणि तथा समभिपद्यते ॥ १
तिर्यग्योनिसहस्रेषु कदाचिद्देवतास्वपि ।
उपपद्यति संयोगाद्गुणैः सह गुणक्षयात् ॥ २
मानुषत्वाद्दिवं याति दिवो मानुष्यमेव च ।
मानुष्यान्निरयस्थानमानन्त्यं प्रतिपद्यते ॥ ३
कोशकारो यथात्मानं कीटः समनुरुन्धति ।
सूत्रतन्तुगुणैर्नित्यं तथायमगुणो गुणैः ॥ ४
द्वंद्वमेति च निर्द्वंद्वस्तासु तास्विह योनिषु ।
शीर्षरोगेऽक्षिरोगे च दन्तशूले गलग्रहे ॥ ५
जलोदरेऽर्शसां रोगे ज्वरगण्डविषूचिके ।

S. 12. 11258
B 12. 204(3). 6
K 12. 303. 6

Colophon. Ś1 D6 missing: K3, 5 B1–5 Da1, a2 Dn2, n3 D1 G4, 5 M2–4 absent. —*Sub-parvan*: K1, 4, 6, 7 V1 B6, 7, 9 Da3, a4 Dn1, n4 Ds D2, 3, 5, 7, 8 T G1–3, 6 M1, 5–7 मोक्षधर्म. —*Adhy. name*: K1, 4 करालजनकवासिष्ठसंवादः; K2 D2, 3, 8 करालजनकसंवादः; K6 B6, 8, 9 Da3, a4 Dn1 वशि(B8 Da3, a4 Dn1 °सि)ष्ठकरालजनकसंवादः; K7 D4, 9 करालवसि(K7 °शि)ष्ठसंवादे सं(D9 स्व)भावानुवर्गः; V1 Bo, 7 वसि(V1 °शि)ष्ठजनकसंवादः; Dn4 G2 वसिष्ठकराल(G2 °ळ)संवादः; Ds करालजनकवाक्यं; D5, 7 करालजनकसंवादे अक्षरप्रभाववर्णनं; G1, 6 कराळजनकवसिष्ठसंवादे क्षराक्षरविभागयोगः (G1 om. योगः); M5 वसिष्ठकरालजनकसंवादे क्षरमार्गकथनं; M6 वसिष्ठजगसंवादे (sic) क्षरमार्गकथनं. —*Adhy. no.* (figures, words or both): K6 27; B7 M1, 6, 7 125; B8 T1 G1, 6 126; Dn1 128; Dn4 Ds2 G3 M5 127; Ds1 116; D8 123; T2 139; G2 142. —*Śloka no.*: Da4 D8 48; Dn1 49; Dn4 47.

292

☞ This adhy. is missing in Ś1 D6 (cf. v. l. 12. 274. 13; 283. 15).

1 K6 युधिष्ठिर; K7 V1 B7, 9 वशिष्ठ (for वसिष्ठ). —a) K6 एव सुप्रतिबुद्धत्वाद्. —b) G1 अबुद्धिस्. K1 corrupt; B6 Da3, a4 T2 G1, 2 M1, 5–7 अनुवर्तनात्. T1 G3, 6 अबुद्धजनवर्तनात्. —c) T G1, 3, 6 देही (for देहाद्). —d) T G1, 3, 6 सदा; M1, 5–7 देही (for तथा). K1 D4 corrupt; B7 (marg. as in text) समभिपच्यते; D5, 7 °वर्तते (for °पद्यते).

